पि ग्रहणे कः सवर्णे इत्यनेनैव सिद्धौ वार्त्तिकस्य वैयर्थ्यापत्तेः। एङः पदान्तात् किं भवति। सर्वत्र वि। प्रकृत्यान्त
इति सूत्रात् प्रकृत्येत्यनुवर्त्तते प्रकृतिशब्दोऽत्र स्वभाववाची दुस्संज्ञा प्रकृतिरित्यादौ तथा दर्शनात् प्रकृत्या स्वभा
वेनावस्थानमित्यर्थः। अत एव प्रकृतिभावेन पूर्वरूपं नाप्यपादयइति भावः। नान्तःपादमिति पाठे त्वनेन सूत्रे
णगोशब्दस्य यत्प्राप्तं तन्नेति व्याख्यानेन नान्तःपादमित्यनेनैव। पूर्वत्वादिकं विकल्पेन नानिषिध्यत इति बोध्यं
अवङ् स्फोटायनं यस्य स स्फोटप्रतिपादक इत्यर्थः। स्फोटायनस्येति पाठे नडादित्वं कल्प्य स्फोटायनो व
ङः स्मर्त्तान्यस्तु तदभावस्येति स्मृसंतरानुसंधानद्वारेणात्र विकल्पो बोध्यः। नित्यमिति। अत एव इन्द्र इति सा
मर्थ्यान्नित्यमिति भाष्यादावुक्तं। गवाग्रमिति। सं निपातपरिभाषया अनित्यत्वाद्दीर्घ इति बोध्यं। व्यवस्थिते
ति। देवत्रातो गलो ग्राह इति योगे च सद्धिधिः। मिपस्ते न विभाष्यन्ते गवाक्षः संशितव्रतस्तेन प्राप्य वृष
वेनेति शाकल्योरिति सूत्रे भाष्ये स्पष्टं। अग्नीत्प्रेषणे इति सूत्रे। अग्नीदग्नीन्विहरेत्यत्र एतद्याप्लुत्यर्थं वा
र्त्तिकं वद्बहुलग्रहणघटितन्यासं कृतवान् तत्प्रत्याख्यानाय भाष्ये कृत्तेन विभाषेति योगविभागेन वि

वद्ग्रहणं बोधकत्वानिष्पन्ने रिति यः। सूत्रस्थसवर्णपदानुवृत्तिमभिप्रेत्याह। ऋत्ति सवर्णे इति। तत्फलं दघृ
कारादावेतदप्रवृत्तिः। एतद्विधेययोर् इउ एसूत्रानंतरं पाठादत्तेन तयोः स्थाने प्लुतसिद्धिस्तयोश्चानर प
रत्वं। द्विमात्रमिति। अत एवाकः सवर्णे इत्यनेन वऋकारद्वयस्य स्थाने रेफद्वयवत्तारूपणं एकता तये
एकदाचि [illegible] द्रेफद्वयगर्भस्य
विवृतलातये एकदाचिद्विवृतस्य लकारवत्तां तयें एकदाचिद्वि लकारस्य कदाचिद्विवृत्तः लसाम्येन रे
फवत्तासाम्येन च ताद्दृशस्य ऋकारस्यासिध्या विकल्पफलसिद्धिमाश्रित्येतद्वचनद्वयं तुल्यास्येति सूत्रे भाष्ये
प्रत्याख्यातं। द्वौ रेफाविति। अत्रापि तदेव भाष्यमानंदिरे फललोहि रेफद्वयवतिस्यान्निन्यय लकारवत्त्वपरइ
ति व्यवस्था सिध्यति। अभित इति। द्वौ रेफाविलनुपलप्यते तन्त्र्वद्वितीयांतमभितः पदयोगात्। एओङ् सूत्रे भाष्ये
मात्रहणं मिलादौ णल्वादिति अर्थमवश्यमंगीकर्तव्ये वर्णैकदेशावर्णग्रहणेन अ्य इति पद्मेप्रलूयरवद्वाभि
ह्रस्वर्द्ध र्व चातरतीत्यादौ तु रोरु द्याजलं [illegible] नाशकायां दीर्घादिति लिंगविधान। सामर्थ्यतिपकरणसामर्थ्येनोद्ध
वइति सूत्रस्थ नो ग्रहणसामर्थ्यं भेदेनाप्रतिमा समाने युवर्णविययवेध्युअवयवसदृशस्वतंत्रवर्णाश्रय
कापि भावज्ञापनरूपसमाधानस्य चकारेण बलात्तन्त्रितमि। स्मन्त्ररोवीत्यस्यातत्दल्कार इत्यादौ तोतीत्यस्य च
शंकासमाधानाकरणेकरणेन यत्तद्वकालरंभतो रितिहयवरट्सूत्रस्थ भाष्येण च ऋऌकसूत्रस्ययोरु
र्द्धमात्राद्भागस्याभितः लृत्वेन तथैवोचितत्वादिति भावः। द्वौ लकाराविति। हलद्वयवत्सूचं वसाह चर्पादि
तिभावः। अन्नवात्ति के [illegible] दे - - - - - - -

ल०श०शो०भू० पार्श्वमित्ति।पर्श्वीस्यास्वत्तम इति।एसासिति चेत्तिपदत्वं।ऋ सकः।सवर्णार्थमनिगद्यं चेदं।होतृ ऋकारः।ब्रह्म ऋषिः
३७ आर्छदिति।आटो धात्ववयवत्वेनापदांतत्वादितिभावः।ईषदसमाप्त ऋ छकोव हू छकइत्यपिभावसं बोध्यं
एतेनाटश्चेतिपुनर्वृद्धिविधानार्थं नचेनो स्योमाङ् न्तु परकृपवाक्यात्प्रकृतिभावस्यापिवाधेनेष्टसिद्धि
रित्यपास्तम् समासेपीति। आख्यानादितिभावः।सप्त ऋषीणामिति।दिक्संख्येइतिसमासः।प्रकरणम्नुवृद्ध्येप्रकृ
तिभावविधायकसूत्रद्वयमुपन्यस्य प्लुतप्रगृह्याइतिसूत्राकांदित प्लुतप्रगृह्ययोर्मध्येप्रथमोपात्तत्वात् प्लुतप्रकर
णमारभते वाक्यस्यटेः।वाक्यस्येत्यस्याभावे पदस्यटेरित्यर्थेनंत्यस्यापिपदस्यटेः प्लुतः स्यात्तत्त्वेत्वाक्यस्यटेः।रत्य
पदस्येवसंभवतीतिनदोषः।टिग्रहणाभावे प्लुत अलोपस्थितात्परिभाषयाजंतस्यैवस्यात्।टिग्रहणेतुसामर्थ्याट्टिना
चोविशेषणाद्यंजनांतस्यापिभवति।प्रत्यभिवादे।प्रणामादिभिराशिर्वचनामानोगुर्वादिर्यस्मिन्तिसंभाषतेतत्प्र
त्यभिवादः।नत्वाशीर्वचनंश्रू द्रे आशीर्वादरूपप्रत्यभिवादाभावेनाशूद्रइत्यस्यवैयर्थ्यापत्तेः।अतएवभाष्येऽ
शूद्रेइतिकिंकुशलत्वमसिरुषजकेतुत्तं।अभिवादयेइति।नमस्कारपूर्वमाशीरादिवाचयामीत्यर्थः।आयुष्मानि
त्यायुष्मत्त्वस्याविधेयत्वात्संबोधनविभक्त्यभावः।एधीतिभवेत्यस्याप्युपलक्षणं प्रत्यभिवादेशर्मा दिप्रयोगोननि
यतः।एचोप्रगृह्यस्येतिसूत्रेप्रत्यभिवादे तस्येचः प्लुतविधानात्।आयुष्मानेधिअग्निभूताइतिभाष्येतदुदाहर
णाच्च शर्मादिप्रयोगेत्वतद्दरेव प्लुतः।शर्मांतं नामब्राह्मणस्येत्यादिस्मृत्यात्तस्यनामावयवत्व बोधनात्।स्त्रियोने
ति।स्त्रियाअपि नाम्नाभिवादप्रत्यभिवादेइत्यर्थस्यभाष्यसंमतत्वादितिभावः।नामगोत्रंवेति।अभिवादप्रत्यभिवा रामः
देनामगोत्राभ्यामेवस्मृतिषुप्रसिद्धे।तत्राधिकृतस्यपदस्येत्यस्य प्रत्यभिवादेइत्यनेनविशेषणत्वात्तस्याप्र ३७
त्युद्यमानार्थवाचकस्येव प्लुतइतिभावः।तत्रनामश द्वेनह्रादयो हि पिनादिकंतगृह्यते।अतएवायुष्मान्भ

प्रगृह्याइत्यस्यप्रकृत्येतिपाठएवसामंजस्यंमत्वाहाप्रकृतीति।नन्वेतत्घटकपदार्थज्ञानाय ५

भावेत्यस्यव्यवस्थितविभाषात्वंध्वनितं।तथाचाजेर्व्यघञपोरितिव्यवस्थितभावेति।अजेर्वीसूत्रेभाष्येस्पष्टं।न
चव्यवस्थितविभाषयेंद्रे नित्यावङ्सिद्धेइंद्रेचेतिवैयर्थ्यमितिवाच्यं।भाष्योक्तातिरिक्तव्यवस्थितविभाषाणाम
प्रामाणिकत्वज्ञापनार्थं तत्सत्वादित्याहुः।इंद्रेच।क्वचित्ताभाष्यपुस्तकेचशब्दरहितःपाठःइंद्रावयवेचीत्य
र्थस्तेनषष्ठीतत्पुरुषोत्तरपदषष्ठीतत्पुरुषेगवेंद्रयज्ञइत्यादावपवङ्सिद्धिः।अन्यथावाक्येगोशब्दस्येंद्र
परत्वासंभवेनसमासाल्लोपादिंद्रशब्दस्योत्तरपदत्वएवप्रवृत्तिःस्यात्।प्लुतप्रगृह्यत्वादिकथनं पूर्वंयुक्तमिति
वाच्यं।इंद्रेचेत्यत्रप्राचीनपठितनित्यग्रहणस्यप्रामादिकत्वंबोधयितुंतदव्यवहितमेतत्सूत्रलेखनात्तत्रनित्य
ग्रहणेतदव्यवहितोत्तरेतत्सूत्रेतद्वैयर्थ्यंस्पष्टमेवेत्याशयेनाह।प्लुताःप्रगृह्याश्चवदंतेइति।अचीत्यनुवर्त्त
मानेपुनरज्ग्रहणमत्यासत्यायत्राचिअनयोःप्रकृतिभावस्तदज्निमित्तकार्यस्यैवतेनाभावइत्यर्थलाभार्थं
तेनजानुउअस्यरुजत्तिजानूअस्येत्यादौसवर्णदीर्घरूपसंधिर्भवत्येव।एहिकृष्णेति।दूराद्धूते चेतिप्लुतः।
अत्रप्लुतस्याश्रयासिद्धत्वंबोध्यं।नित्यमितिकिमिति।वाग्रहणनिवृत्त्यैवतल्लाभइतिप्रश्नः।माभूदिति।नित्य
ग्रहणसामर्थ्येनपुनर्विधानाद्बाधकविषयेप्ययमेवेतिभावः।इकोसवर्णे।एङ इत्यतःपदांतादित्यनुवृत्तं
प्रथमयाविपरिणम्यतइत्याह।पदांताइति।वेतिह्रस्वयणोर्विधानसामर्थ्यात्तुनविकल्पसिद्धिः।अपदांतादौयणश्च
रितार्थत्वात्।सामर्थ्यादेवेतिचेन्नप्रकृतिभावाकर्षणेप्लुतकाइत्यत्रचानुकृष्टत्वेनतदसंबंधइतितदर्थंह्रस्ववि
धानसामर्थ्यस्यावश्यकत्वेनचकारोव्यर्थइतिभावः।भाष्येस्थितमिति।प्रकृत्यास्तुनेइतिशेषः।एतेनह्रस्वाभावेप्रकृति
भावार्थंचकारइतिन्यासाद्युक्तमपास्तं।[illegible]बोध्यं।नसमासे।सितिचेतिवार्त्तिकं।

ल०श०शे० दूराद्धोधन एव प्रवृत्तिस्तदाह। दूराद्धूत इति। दूरत्वं चात्र विवक्षितं तेन प्रत्यभिवादे भोराजन्येत्यस्य विषयेऽप्यसंप्र
पू० वृत्तिः। तद्विषयेऽप्युपलक्ष्यबोधनस्य सत्त्वात्सर्वं प्लुतप्रकरणस्य तु न शेषः। तथा हि सति वाक्यस्य टेरित्यनेनास है वा
३८ स्यान्यधिकारत्वमेव कुर्यात्। एतन्न्याय विषयमे[...]वेदमिति प्रकृतस्तू त्रेनुदात्तं प्रश्नान्तेति सूत्रे च कृतोस्पष्टम्।
अपि शब्दो यथाप्राप्तिसमुच्चयार्थः। यदि त्वगुरोः संनिधानादंत्यो गुरुरेव समुच्चीयते तदा त्वलघुमति। अनंत्य
पदस्य ५ गुरावेव तस्यात्वलघौ दूराद्धूते च त्वादीनां दुर्वारत्वेन प्लुतसमावेशापत्तिः। एकैकग्रहणं त्वेतद्विधि विहिता
नामेव पर्यायार्थं स्यात्। तेन यत्रांत्योपि गुरुरनंत्यश्च याद्दिर्वा गुरुस्तत्रैव पर्यायः स्याद्व्याख्यानात्त्वैतदर्थलाभः
38 अनंत्यस्यापीति। अपिनांत्यस्य गुरोरगुरोश्च त्वर्थः। पर्यायार्थमिति। अन्यथा समावेशः स्यादिति भावः। अनुदात्तं पद
मितितु त्रिपाद्यां न प्रवर्त्तत इति तत्रैव वक्ष्यते। प्राचामिति त्वपद्धोसर्वेषां प्लुताभावार्थं विकल्प इतिसा च व्यवस्थि
त विभाषा तेनाऽग्नीदग्नीन्विहरेत्यादावग्नी त्विषएइति न भाष्येतु विभाषापृष्टेतिसूत्रे विभाषेतियोग विभा
गो दर्शितः सापि व्यवस्थित विभाषेति कैयटः। अत एव ओ श्रावय परस्येति वक्तव्यमिति वचनस्याग्नीदग्नीदित्यादौ
प्लुतनिवृत्तये कृतस्य विभाषेतियोगविभागेन प्रत्याख्यानं भाष्योक्तं संगच्छते। एवं च भाष्यसंमतैषा व्यवस्थित विभा
षेत्याहुः। अप्लुतवदित्युक्त्या प्लुत इत्यध्याहारस्तदाह। प्लुतोऽप्लुतवदिति। प्लुत एव निषिध्यते इति तत्स्थाने अप्लुत
स्य विधानेन स निवर्त्तत इत्यर्थः। प्रसज्यप्रतिषेधेन व्याख्यानं तु न युक्तं। गौरवात्। किंच। तथा सति प्लुतप्रकरणे
एव नोपस्थित इति वदेत्। न च पर्युदासे ऽग्नी इतीत्यादौ प्रगृह्याश्रयप्रकृतिभावं बाधित्वा परत्वादप्लुतवद्भा
वे दीर्घादिकं स्यादिति वाच्यं। शास्त्रत इतिशब्दसापेक्षाप्लुतवद्भावापेक्षया वर्णमात्रापेक्ष प्रकृतिभावस्यांतरंगत्वा रामः
त्। अप्लुतवदित्यस्य प्लुतकार्यं नेत्यर्थस्तु न ... दोषः। प्लुते प्लुतत्वात्ष्टप्प विधानस्यैव शब्दतो लाभात्। ३८

वदं ङि नित्यादौ प्लुतो नेति स्पष्टं भाष्ये । भोराजन्येति । भोशब्दस्य राजन्यवैश्यवाचकनाम्नश्च टेः प्लुत इत्यर्थः । भोशब्द
स्याप्राप्ते इतरयोस्तु नामत्वात् प्राप्ते विभाषेयं । दूराद्धूते । यावति देशे प्राकृतप्रयत्नोच्चारितं संबोध्यमानो न शृणो
ति किन्त्वधिकप्रयत्नमपेक्षते तावद्दूरम् । दूरादाह्वानं च दूराद्बोधनस्योपलक्षणं । न तु संबोधनविभक्तिनि
यामकस्याभिमुखीकरणसंबोधनरूपस्य संबोधनस्योपलक्षणं । आगच्छ भो भवान् देवदत्त इत्येवमाह्वानस्यापि
संभवात् । अत एवाकडारसूत्रे नदीगुरुसंज्ञयोः समावेशे वा त्वं बंधुरित्यत्र गुरोरिति प्लुतो नदीबंधुनीति पूर्व
पदांतत्वं च फलमुक्तं भाष्ये । अन्यथात्र संबोधनाभावेन गुरोरित्यस्याप्राप्त्या तदसंगतिः । स्पष्टं च । उपलक्षणत्वादस हृ७
त्यप्याह्वाने भवति तदाह । सक्तूनित्यादिः । अत्रापि दूराद्धूत इत्ये । तदनुवृत्तस्य पदस्येत्यस्य विशेषणं तेन हूयमा
नार्थवाचिनः पदस्यैव टेः प्लुतः तच्च रूढं यौगिकं वेत्यन्यत्र । हे हे प्र । हे हयोः संबोधनद्योतकत्वेन केवलाभ्याम
पिताभ्यां संबोधनदर्शनेन च तयोरपि हूयमानार्थपदत्वात् । गुरोरनृत इत्येव सिद्धे नियमार्थमित्याह । हे हयो
रेवेति । हे हे त इत्येव सिद्धे प्रयोगग्रहणं दनत्ययोरपि तदाह । हे राम ३ इति । केचित्तु । एकहे हे ग्रहणमनर्थमन्यथाव्या
कस्पष्टेरित्यधिकारादनयोरेव तयोः स्यात्तदाह । हे ३ राम ३ इति । प्रयोग इति यत्संबोधनेतरं तयोः प्रयोगस्तत्र तेनै
वाभिमुख्यस्य द्योतितत्वेन द्योत्याभावादनर्थकयोरपि तयोः प्लुतार्थं तदाह । राम हे ३ इति । अन्यथा प्रयुक्तयोः प्लुता
संभवात्तद्वैयर्थ्यं स्पष्टमेव । हे हयोरिति । तु तयोर्हूयमानार्थपदत्वाभावादप्राप्ते विध्यर्थं नियमेत्वमानं तेना
त्र प्लुतसमावेशः । एतत्सर्वं भाष्यकैयटयोः स्पष्टमित्याहुः । यत्तु अयं हूयमानार्थपदस्य टेः प्लुतस्य बाधकस्तत्र
कौ ङि न्यादिति । तन्न । शिव हे इत्यादौ तस्याप्राप्तेरन्यायविषयाभावात् । गोरः । दूराद्धूत इत्यनुवर्तते तेन

ल०शे०शे०भू त्‌। प्रगृह्यसंज्ञाप्रकरणेन प्रगृह्यत्वस्यादेशस्य च सह विधानात्‌। ऊँ इति विती ति च न स्यात्‌। आदेशे प्रगृह्यत्वकार्यं
३९ तु स्थानिवद्भावेन वोध्यं। प्रगृह्यत्वस्य सादेशोद्देश्यसंबंधस्य लक्षणतयात्र विधेयविशेषणत्वे मानाभावात्‌। शा
काल्यग्रहणानुवृत्तावपि प्रगृह्यत्वस्य ऊँ आदेशस्य च विकल्पे ऊँ इति विती ति सिध्यति न तु उ इती ति प्रगृह्यत्व
विकल्पेन पक्षे तदभावेपि। अस्सतात्पर्यादेतदभावे निपात एकाजित्यस्याप्रवृत्तेः। तदुक्तं। भाष्ये योगविभागं प्र
दर्श्य किमर्थो योगविभागः। शाकल्यमते ऊँ विभाषा यथा स्यात्‌ ऊँ इति उ इति। अन्येषामाचार्याणां मतेन। विभा
39 ष्यते विकल्प्यते इति विभाषा गुरोश्च हल इत्यप्रत्यये टाप्‌। न वेति विभाषायामिति भाष्यप्रयोगात्‌। भाष्ये तु क्रिय ६७
र्थमिदमुच्यते अनुपस्थितार्थं तत्र ईग्रहणेन नार्थः। अविशेषेण चाक्रवर्मणस्याप्लुतवदित्येवेदमपि सिद्धं वशाद्विय
वशेयामि युक्तं तद्बलेनोपस्थिते पूर्वविप्रतिषेधेन ईग्रहणेपि नित्याप्लुतवद्भाव एवेष्टः प्रसाख्याने नित्याप्लुतवद्भा
वस्य येन नाप्राप्तिन्यायेन वैकल्पिकतद्बोधिताभावांशबाधकत्वात्‌। उपस्थित इत्यस्य निष्क्रिया परविप्रतिषेधा
दुभयत्र विभाषेयमिति कैयटस्य प्रमादः। सूत्रे लितिशब्दभिन्ने वैदिके इतिशब्दे चेत्येवं परतया कथंचिद्व्याख्येय
मित्यन्ये। उद्देश्यप्रतिनिर्देश्ययोरैक्यमापादयत्सर्वनामपर्यायेण तत्तल्लिंगभागितीयमिति निर्देशः। विशे
षणेन तदंतविधिमाश्रित्याह। ईदूदेदंतमिति। द्विवचनमिति। संज्ञाविधौ प्रत्ययग्रहणे तदंतविधिनिषेधा
दितिभावः। एदंतमिति व्याख्याने फलमाह। पचेते इति। निपात एः। निपात इति किं। चकारात्र प्रत्ययस्य शास्त्र रामः
कल्पितार्थवत्वात्‌। एकाजिति। कर्मधारयो वृत्तिपदार्थप्रधानत्वेनांतरंगत्वाद्व्याहरति मृग इति निर्देशाच्च।
तेन नेदमित्यादौ न दोषस्तदाह। एको जिति। आङ्वर्ज इति पर्युदासस्योचित्यात्‌। अत एवैकाज्‌ नाङिति ३९

भाष्ये प्लुतकार्यप्रतिषेधार्थमित्युक्तिस्तु फलितार्थाभिप्रायेणेति बोध्यं। प्रगृह्याश्रय इति। प्लुते कृतेपि तस्यासिद्धत्वात् दी
र्घत्ववृद्धिवत् तत्र कृतं प्रगृह्यत्वमनुकार्ये सुलभमनुकरणे तु प्रकृतिवदनुकरणमित्यतिदेशात्तल्लभमिति भावः। किम
पाकृतमित्यमिति पक्षे आह। चिनुहीदमिति। विभाषा पृष्टप्रतिवचने हेरिति प्लुतः। इदंशब्दोत्र वाक्यान्तरस्थ
इति हेरिकारस्य वाक्यटित्वं। ऊँ भयत्र विभाषेयमिति। उपस्थितेत्र प्राप्तेऽनुपस्थिते चाप्राप्ते इत्यर्थः। (अत्रास्यः
शोधः एतदंकपंक्त्याधो द्वितीयपंक्तिस्थ यत् (द्विभाष्यत इति तदारभ्य) तदुत्तर यत्राकपंक्त्याधो द्वितीयपंक्तिस्थंस्थय
स्मरेतितदवधिको बोध्य) गांविस्मृ तस्यस्मृतिविषयता एवं किलतदिति स्मृतार्थनिर्देशः। निपात इत्यनु
वृत्तमोदित्यनेन विशेष्यत इत्याह। ओदंत इति। निपातसंज्ञा चादिपदोपस्थितत्वादीनां सति संभवेऽर्थवतामेवे
ति सार्थकनिपातानां निपातपदेन तत्तदर्थविशिष्टानामेवोपस्थितिरिति गोणमुख्यन्याये न प्रकृतसूत्रस्थ
निपातपदेन गोणार्थानां न ग्रहणमिति गोभवदित्यादौ च्यते नास्य प्रवृत्तिः। एवंच कार्यकालपक्षेपिच्छं
ता निपाता इत्यस्योपस्थितिरेतत्परिभाषावशात् अव्ययसंज्ञादौ तु नैतत्परिभाषाप्रवृत्तिरनित्यत्वादत एवानर्थ
केपि निपाते सा संज्ञा सिध्यति। त्र्योइतीत्यादौ प्रगृह्यत्वायाह। संबुद्धिनिमित्तक इति। संबुद्धिपर इति व्याख्याने
तु सो लुकालुप्तत्वेन तत्परत्वाभावान्न स्यात्। न लुमतेति निषेधा। नित्यत्वमणतिकृणतिः। इत्तावितिकिं। पटोत्र। अ
नार्षे किं। ब्रह्मबंधवित्यब्रवीत्। संहितायामविवक्षायामप्यवादिरहितप्रयोगार्थमिदं। तद्धिवद्धा च वर्णोच्चार
णो निपतेनार्धमात्राकालव्यवाये नोच्चारणे तदधिकार्धमात्राकालव्यवाये नोच्चारणे च तदविव
द्धितिबोध्यम्। ऊँञः। अनोश्चि निपात एव। ऊँ उँ इत्येकरूपत्वे तु शाकल्यग्रहणं ननुवृत्तौ ऊँ इतीत्येकमेवसा

कल्पमते इति तयोरेकप्रयोगएव प्रवृत्तिः स्यादिति वाच्यं। योगविभागसामर्थ्येन शाकल्यमते एव भावाभावकल्पनात्।
वस्तुतस्तु अनुवादेन संज्ञादेशयोः सहविधानमेव न्याय्यम् अदेशोस्थानिवद्भावात् प्रगृह्यकार्यं भाव्ये प्रगृह्यसंज्ञकस्य
तस्यस्थानिवद्भावलब्धार्थस्वरूपकथनमिति न्यायविदो विचारयन्तु। मयउञो। आख्यानादत्र मयप्रत्याहारः असत्रे
पादिकत्वे नासिद्धत्वात् प्लुतप्रगृह्या इत्यनेन बाधः। नानुस्वार इति। किंवितीत्यादौ प्रगृह्यसंज्ञाभावे स्यासिद्धत्वा
दिकोयणचीति यणि अनुस्वारो भवत्येव। ननु यः शिष्यते स लुप्यमानार्थाभिधायीति न्यायेन गौरीशब्दस्य सप्तम्य
र्थवृत्तित्वे पीकारस्य तत्त्वाभावात् आह। ईदूदेतमिति। शब्दस्वरूपस्याविशेष्यत्वान्नादन्तविधिरिति भावः। मामकीतनू
इति। प्रगृह्यत्वेष्विति शब्दप्रयोगस्य पदकारैर्नियमितत्वात् सदपाठे प्रगृह्यत्वफलमत्र बोध्यं। ईदूतौ किम्। अन्नाभवा
ति सम्याडादेशः तपरत्वमसंदेहाय। सप्तमी ति किं। धीतीमतीहृस्वाताभ्यां तृतीयैकवचनस्य पूर्वसवर्णे सवर्णदीर्घः
अर्थग्रहणं किमिति। न च तदभावे ईदूदेदिति वदीदूदन्तयोः सप्तमीत्वर्थापत्तिः। तथा च यपीत्यादावेव स्यात्। एका
देशस्य पूर्वान्तवद्भावे न सप्तमीत्वान्नतु गौरी यादाविति तत्सिद्ध्यर्थं तदावश्यकमिति वाच्यं। ईदूतौ सप्तमी प्रगृह्यम
दसः एद्वृद्धिवचनमित्येव सिद्धे गुरुभूतन्यासकरणेन तत्प्रकरणापेक्षया वैजात्यबोधनाद्दूकारांशे संभवात्सं
ज्ञाविधाविति तदन्तग्रहणनिषेधाप्रवृत्त्या ईदूदन्तं सप्तम्यन्तमित्यर्थेनेष्टसिद्धेरिति प्रश्नः। पर्यायादेरनभिधानमे
वेति परे। वृत्ताविति। अर्थग्रहणसामर्थ्यात् सप्तम्यर्थमात्रे पर्यवसन्नमित्यर्थे नात्र तत्सञ्चार्थयोरर्थे पिवृत्तेर्न
दोषः। संज्ञायामिति समासे जहत्स्वार्थायां वृत्तौ पूर्वपदस्यानर्थक्ये पि सुप्सुपेति समासे अजहत्स्वार्थायां प्रसक्तादो रामः
षस्योक्तरीत्यैव वारणमिति भावः। गौरी अधिश्रितइत्यत्राधिश्रयणक्रियायामेव गौरीपदवाच्याधिकरणत्वान्व ४०

नासूत्रे।वासुदेववाचकस्याशब्दस्या ङासहार्थेऽव्ययीभावे।आङ्आत्ऽप्रभित्यादौसत्यभिधानेस्यत्तआङ् भिन्नत्वेनू
पूर्वातवत्वेनानिपातत्वेपिप्रगृह्यत्वंन।पूर्वान्तवत्वेनाङ्त्वातिदेशेनातिदिश्यमानधर्मविरुद्धस्याश्रयधर्मप्रयुक्तकार्य
निवृत्तेरतिदेशस्वभावसिद्धत्वात्।ओदितिसूत्रेआउओइत्यत्रानाङितिप्रतिषिद्धार्थोयमारंभइतिभाष्यंतुपर्युदासेपि
गम्यस्यप्रतिषेधस्यसत्वान्नानुपपन्नं।अनाङितिपर्युदासादेवानिपातेकाग्रूपत्वेलब्धे।निपातेकाज्ग्रहणं स्पष्टार्थं।
स्वांगसमुदायेस्वांगत्वाभाववदज्समुदायेऽज्त्वाभावादजितिवाच्यसमुदायग्रहणाभावेसिद्धेएकग्रहणमन्यत्रवर्ण
ग्रहणेजातिग्रहणार्थं।तेनाधिम्पतीत्यादिसिद्धिरितिभाष्येस्पष्टम्।जातिग्रहणार्थमित्यस्योपात्तजात्याश्रयैकानेक
व्यक्तिग्रहणार्थमित्यर्थस्तेनतितऊशब्देकदेशस्यऊोइत्यस्यानुकरणेओअकरोदित्यत्रानुकरणंचानितीतिनिपातत्वे
पिप्रगृह्यत्वाभावएकग्रहणफलंबोध्यं।ननुङकारस्यक्वाप्यश्रवणेनाङिदङिद्विवेकोदुर्ज्ञेयइत्यतआह।वाक्यस्म
रणयोरिति।वाक्यशब्देनस्वार्थगतमननभिमतत्वं।स्मरणविततीति।अनेनहियोगविभागस्यउइतिरूपसिद्धिःफलमिति
स्पष्टमेवलभ्यतेतीयोगविभागेनव्याचष्टे।उञइति।उञोवाचकंप्र गृह्यपदमितिअर्थः।शाकल्यस्येतोप्रगृह्यमित्य
नुवर्त्तते।तदाह।उञइतौवेत्यादिविकल्पानभुक्तो हिनिपातएकेत्येवसिद्धेइदंवर्षमेवसादेवंचप्राप्तविभाषेयं।ऊं
इत्यत्रशाकल्यप्रगृह्यपदयोःसंबंधेउञइत्यस्याधिकारादप्रगृह्यस्यैवादेशोतस्येकोयणितियणिऊंइतीत्यस्यासि
द्धिः।दीर्घोच्चारणवैयर्थ्यापत्तिःअविकल्पमात्रसंबंधेपिऊंइतीत्यस्यासिद्धिरितिविधानसामर्थ्यात्प्रगृह्यपदसं
बंधःप्रगृह्यपदमात्रसंबंधेऽप्यधिकारादप्रगृह्यस्यानित्येऊंआदेशेऊंइतीतिप्रगृह्यस्यउइतीतिसिद्धेपिवितीति
नसिध्येत्तदाह।उञइतौदीर्घोऽनुनासिकोत्यादि।अत्रविशिष्टस्यविधिरितिनवाक्यभेदः।नचप्रगृह्यत्वमादेशस्याशा

ल॰शं॰शे॰ष्टु॰ त्वेनजकारेचर्त्वमिति बोध्यं। तयोरत्रालेखवस्तुवैचित्र्यार्थः। विग्न इति। यजयाचयतविच्छप्रच्छरक्षो नङिति नङित्त्वा
५१ दिति शादेशो ङित्वाद्गुणाभावः। प्रश्ने चासन्नकाल इति निर्देशात्संप्रसारणाभावः। जन्दीता। पदाद्दोरिलेवसिद्धे तद्ग्र
हणंस्पष्टार्थं॥ द्योः किमिति। धकारस्यापि पदान्ते जश्त्वविधानात्। अश्नः ह्रस्वात्त्वादावित्तिवलस्यासिद्धत्वाज्जश्त्वा
भाव इत्युत्तरं। वर्णानावतिरिति। धञ्धिकानवर्त्तिरिति विग्रहः। वर्णग्रणार्थं इति। पष्पकृपदे। परेतु। पदान्तस्य किं।
वेद्भिं वध्नाति। स्पष्टश्चरितार्थ इति। उपलक्षणमिदं बलयोरपि प्रवृत्तेः। एतच्च जातिपक्षे स्पष्टं। व्यक्तिपक्षेपितादृश
शक्तेश्चरितार्थस्य रात … द्व्यक्तिविषयतयोपप्लव एवनेति बोध्यं। स्पष्टं चेदं कौमुदी सत्रकेयटे। परेतुस्था
नेऽन्तरतमसूत्रेस प्रसंगत पाठस्य भाष्यकृता दूषितत्वेन व्युत्पत्तेरुक्तिसंभव एव न। तस्मादनुस्वारस्येतिसूत्रात्सवर्ण
41 ग्रहणमपकृष्य परसवर्णोनुनासिको भवतीत्यर्थान्नदोषः। तदुक्तं भाष्ये रेफेनुनासिकपरसवर्णे त्वयोः प्रतिषेधो
वक्तव्यो न वक्तव्यो रेफोष्मणां सवर्णा न सन्तीति। चिन्मयमिति। स्वार्थिकस्त्वस्य कृतवचनइतिमयट्। तत्र तदितिवा
क्यभेदेन क्वचित्स्याच्चातुर्यरूपप्रकृतवचनाभावेपि मयडर्थे। अतएव चिन्मयं ब्रह्मेति सामानाधिकरण्यं चिन्मा
त्रमिति। क्वाचित्कोपपाठः मात्रचः प्रत्ययस्यात्रोपपत्त्यभावान्मयूरव्यंसकादित्वेवार्थमार्थमात्रशब्देनात्रसमास
स्यवक्ष्यमाणत्वात्। निपातनादिति। पवादिगणेऽकुदमानिति प्रकृतिप्रत्ययसमुदायः पठ्यते इतिमते नेदम्॥
उदःस्था। तस्मादित्युत्तरस्येतिपरिभाषालभ्यमर्थमाह। उदःपरयोरिति। अत्राघोषस्येति। समनियतत्वेनान्य
तमाग्रहणेवाध काभावेन श्वासविवारयोस्त्यागेपि न न्यूनतेति बोध्यं। पूर्वस्यासिद्धत्वादिति। त्रिपाद्यां पर
त्वादितिभावः। हलो यमामिति सूत्रोक्तभाष्यसंमताष्टाध्यायीपाठेपस्यासिद्धत्वाभावेनत्वत्त्वं भवत्येव। अत एवोत्सूर्वस्कं रामः
देरोगे उपसंख्यानं। उक्तं दोरोग इति भाष्ये संगच्छते। म … ल्तं तु प्राचामनुरोधे नेति परे। नचेदंसूत्रम्पर्थं ५१

यद्दत्तिणोर्यद्यधिकरणकेलन्वाणायांमा नाभावइत्तिन तत्रदोषः। वाप्यामश्वइतिस्त्रश्रुपेतिसमासः। संज्ञायामितिवान
नुसंज्ञायामितिसमासेवाक्येनसंज्ञानवगमान्नित्यसमासत्वेन विग्रहोनुचित इतिन्वेन्न। [illegible] तेश्रुस
माससमानार्थकवाक्याभावेननित्यसमाससहृशत्वेपिनित्यसमासत्वाभावात्। विभाषाधिकारवाधेमानाभावात्।
नित्यसमासेहिवृत्तिघटिकपदानांपृथक्प्रयोगाभावएवात्रतुपृथक्प्रयोगेपितद्वोधविशिष्टार्थप्रतीतिमात्र
मित्याहुः। अणोऽप्र। अनुणइतिकिं। कर्तृहर्तृभवानमएवौणौव्यारव्यानात्। आगच्छतभग्नीइत्यादौप्लुतस्यासिद्ध
त्वात्ततःप्रागेवयणोदृष्टत्वाजातेप्रगृह्यत्वेपश्चात्तुप्लुतेतस्याननुनासिकप्रतिवंधार्थंपुनःसंज्ञेतिनानुनासि
कसंज्ञायाःकार्यार्थत्वात्पुनःप्रवृत्तौकापमिववीजस्यानिवत्तुन। प्लुतस्यस्थानेपलक्षितिथर्मत्वेनात्वविधित्वा
त्। पूर्वसवर्णेकितेद्विवचनत्वंतुप्रादिवभ्दावेन। तेनताद्रूप्यानतिदेशेपितद्धर्मातिदेशांगीकारात्। अतएव
रामा। वित्यादौप्रादिवभ्दावेनसुप्त्वादत्वसाधितमंतादिवत्स्त्रेभाष्येइतिस्पष्टमाकरे। अन्चोचिरिति। सिध्दम
नच्त्वादितिवार्त्तिकप्रयोगेणत्वाच्चरमितिसोन्नप्रयोगेणकथमच्त्वमितिभाष्यप्रयोगेणच वृत्तिघटकाचदे
पदांतकार्यस्यतत्संनिधानेनअनुत्वस्यचाभावोवोध्यतेइतिकेचित्॥ ॥इतिस्वरसंधिः॥ ॥स्तोश्चु। सिति
शितिचलुप्तविभक्तिकेभिन्नेपदे। योगइतिसंयोगइतितदर्थः। तेनचितमित्यादौनदोषः। अत्रपदसंलधि
कृतमपिनसंवध्यते। शादितिज्ञापकात्। तेनयाञ्चासिध्दा। शात्सरस्यस्तोश्चुत्वनिषेधकाच्त्वादितिलिंगा
देवनिमित्तकार्यिणोर्यथासंख्यन। एवमुत्तरस्त्रेपितोःषीतिज्ञापकान्नतत्। शकारचवर्गोस्तइतियथासं
ख्यमितिशेषः। हरिशश्शेतेइति। [illegible] नुत्वस्यासिद्धत्वाज्झलेनदत्वेतस्यचु

ल॰श॰शे॰न्दु॰ ५२ त्वाद्रोसमासनिर्देशे साहित्येद्वंद्वबोधनादप्राप्तक्रमान्वयबोधनार्थं चेदं एवं च तत्र यथासंख्येनान्वयबोधकवाक्यक
ल्पने तत्सामाख्यात ते अवबोध इति बोध्यं। अत्र स्वरिते ने त्यपकृष्यात इति ख्यत्यादित्यादो नातिप्रसंगस्तत्र प्रतिपत्तिकालि
कमेव संख्यासाम्यमेतच्छास्त्रप्रवृत्तावुपयोगीति अमङः एनमित्यत्र भाष्ये स्पष्ट। एते पवला। निरनुनासिका एव विधीय
मानत्वेन सवर्णग्राहकत्वा ज्जातिग्रहणप्राप्तस्य वगुणभेदकत्वप्राप्तस्याप्यप्रत्यय इत्यनेन निषेधाच्च। एवं मय उञ
इत्यत्रापि। अत एव मतो मस्य नानुनासिको वकारः। अन्यथा तद्विद्यामित्यादौ नित्यानुनासिकापत्त्यात न्निर्देशासं न ६
गत्यापत्तिरित्याहुः। चयो द्वितीयाइति। नादिन्याक्रोशे इत्यत्र भाष्ये इदं। एतत्सामर्थ्यादेतत्कृत द्वितीयस्य चर्त्वं ज
ष्मोदयं प्रथमं सशेर्ष मेके द्वितीयमाहुरपदांतभाजमिति प्रातिशाख्ये ऽपदांतभाजमिति चर्त्वासिद्धत्वात्त्वद्यार्थ्या
नुवादः पदांते जश्त्वप्रवृत्त्या चयो लाभात्। अत्र त्वकृते न जश्त्वप्राप्तिरस्यासिद्धत्वात्। अफसए व चयसाइति भाष्यो
दाहृते ष्वादसत्वांच्च त्वस्यासिद्धत्वेन। एवं च प्रातिशाख्ये ऽपदांतभाजमित्युत्सर्गः पदांते योरप्युसन्नत्वं न त्वपू
र्वत्रासिद्धे रिति विदिः सोवेत्यन्यत्र विस्तरः। ङः सि। सीतिसप्तमीव्याख्यानादाह संस्येति। पदस्येत्यनुवर्तमानस्य वैयधि
करण्येनान्वयात्सदावयवस्य सस्येत्यर्थः। षट्त्संत इति। धुटिधस्य चर्त्वेलिङ्गभेदात्तुनङ्स्य चर्त्वं। नश्च। नका
रांतादित्ति पदस्येत्यनुवर्तयं च म्यावि परिणम्यत इति भावः। वैयधिकरण्येनैवान्वय इति ङः सुट्सूत्रस्थभाष्यस्व
रसः। नस्य पदांतस्येति। अपदांतनकारे ऽनुस्वारप्रवृत्त्या फलितार्थ प्रदर्शनमिदं। नांतस्य पदस्येत्युचितं। चलष्
यमितिवद्रूपमाण विकल्पैरिति भावः। तेन त्वकश्रुलेछलस्या सिद्धत्वाच्चयो द्वितीया इति पदेऽचस्य छत्वेन छका
रशकारघटितरूपद्वयाधिक्ये ऽपत्यानुस्वारविसर्गीणांचुल विकल्पेनाधिक्येपि न दतिः। ङमो। पदस्येत्यनुवृ रामः
त्तसामानाधिकरण्येनुरोधात्स्वगमार्थं परिणम्यत इत्याह। तदंतं यत्पदं तस्मादिति। तत्र ङमः स्वयं ह्रस्वादिति ५२

42

लोऽलीसनेनसस्यलोपेऽस्थानस्यसिद्धेरितिवाच्यं।ऽलादौप्रसये तेनलोपइत्यस्यस्थानेनज्ञापनात्।उदस्यादि
सत्रतुनिर्दिश्यमानपरिभाषयानिर्दिश्यमानादेरेवस्थानित्वान्नदोषः।ऽयइतिपंचमीत्याह।ऽयःपरस्येतिछंदसिले
नुवर्त्तते।चोऽवतइति।समनिपातेलोपिविगमनाविरहात्स्वरूपप्रतिपादनायत्रितयग्रहणंऽयइति।पदांतादिस्यपि
वाच्यं।तेनविरप्शमित्यादौछत्वंन।जकारेकतेइति।छत्वमित्तिशेषः।छत्वेक्तिभाष्यसंमतामष्टाध्यायीपाठेचत्वसिद्धत्वं
प्रत्यसिद्धत्वात्।मोनु।पदस्येत्यधिक तंमइत्यनेनविशेष्यतइत्याह।मांतस्येति।हलिसर्वेषामित्यतोहलिइत्यनुवर्त्तते।
हलिकिंरामप्राप्नुयः।नश्च।चेनमोनुकृष्यते।अपदांतस्यकिं।राजन्याहि।यशांसीति।यशस् शब्दे जसः शौनपुंसक
सेतिनुमित्यांतेतिदीर्घः।आक्रंस्यतइति।क्रमेर्लृट्।आङ्उद्गमनइति तङ्स्यः।अनुस्वारस्य।परेति।लुप्तषष्ठीकंछ्यकूपदं
अत्रएवोदः स्थेत्यादौसवर्णग्रहणानुवृत्तिर्यरोनुनासिकइत्यत्रतदपकर्षश्चासिद्धः।यपीतिस्पष्टार्थदंशानमित्यादौ
नदोषः।शकारस्यवर्णप्रसिद्धेःप्रयत्नभेदेऽलोःसावर्ण्याभावात्।अचि अनुस्वाराभावात्।मोराजि।नेतिसिद्धेमइत्यु
क्तिर्हेमपरेइत्यत्रविकल्पेप्रमाणम्।हलयतीत्यादौमोनोधातोरितिनत्वंधातुनिर्देशत्वनंतरत्वादनुस्वारस्यैवस्यात्
ध्वनितंचेदमेतदेवमोमामिष्ठितिस्रूत्रयोभिन्ने।हेमपरइतिमपरइतिबहुव्रीहिःमोनुस्वारइत्यतोमइत्यनुवर्त्ततेयथा
संख्यांसम्यक्रव्यानंसंख्याक्रमेणैवविधिर्हिनत्वान्यत्साख्येःप्राप्यतेस्थानमित्यत्रसंख्याशब्दस्यज्ञानार्थतयादृष्टत्वा
त्।तमनतिक्रम्ययथासंख्यं।अनुदेशःपश्चाद्भववाक्यार्थबोधकालिकःसंबंधःसाम्यंसंख्ययायोग्यतायाख्याना
त्।एवंचसमसंख्यानांसंबंधोयेनक्रमेणपदज्ञानयदादुपस्थितिर्वातेनेवक्रमेणवाक्यार्थबोधविषयः
संबंधस्तेषामित्यर्थःफलितमाह।समसंबंधीति।यद्यपिस्थानात्पलौकिकप्रमाणादेवसिद्धंतथापिपर
मेपदानामेवोपयवा यावद् धनार्थेप्राप्तौदृष्टिकताति

ना॰ ९ | धना॰ १० | पा॰ ५

ल०श०शे०ऽः विधेयइत्यर्थः।एवं चास्यासिद्धत्वाभावेन विसर्गाभावेन च तत्सिद्धिर्नाम प्राप्तिरेवेति भावः।स्पष्टं चेदं भाष्ये
४२ विसर्गस्थानेन सत्वविधाने ऽत्र गौरवं स्फुटं।लोपस्यापीति।यत्तूपधारंजनं कुर्यान्न मोरुप्रकरणे सति लोपप्रकृ
तिभावे वा नोपधारंजनमतं।उपधारंजनमनुनासिकानुस्वारागमरूपं।नमोः नकारमकारयोः प्रकृतिभावोदा
हरणं।न्तु न्याहीति।तत्तु प्राप्तिशास्त्रत्वात्तत्कार्यमात्रविषयमितिभावः।अत एव भाष्ये समादिषु सत्वं वक्तव्यं
रुत्वपक्षे चानुनासिका प्राप्तिर्द्विवचनेन नोक्ता।ननु लोपपक्षे एव द्वित्वेन द्विसकारस्यासिद्धत्वात्समः सुटीति व्य
र्थमत आह।त्रिसकारकमिति।स्कोरिति सलोपस्तु नास्यासिद्धत्वात्।पुनर्द्वित्वे नात्रि सकारस्यासिद्धिरिति तु न युक्तं।
लक्ष्ये लक्षणस्येति न्यायात्।एतेन समः सुटीत्यत्र वेति पाठे नैव पक्षे मोनुस्वारेणासिद्धे ऽनुनासिकात्परइति व्यर्थमि
43 त्यपास्तं।ननु व्यंजनात्परस्यैकस्यानेकस्य वोच्चारणे विशेषाभावो ऽत आह।अनुनासिकवतामिति।अपि नाकस्य सं
ग्रहः लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तेराह।वचनांतरेणेति।यणोमयइत्यनेन।तन्नोच्चारणे विशेषाभावकल्पनेइदं
वचनं व्यर्थमेव स्यादिति भावः।हयवरट् सूत्रे भाष्योक्तशर्षूपसंख्याने फलमाह।अनुस्वारवतामिति।एकस्यैव शास्त्र
स्य पुनः प्रवृत्तौ हि सन्न्यायइतिभावः।पूर्वत्रासिद्धत्वेन पूर्वद्वित्वस्य पूर्वप्रवृ सातेन द्वितीयस्य साधुत्वबोधिते
तदनंतरं परद्वित्वाप्रवृत्त्यात योर्मध्ये पुनरन्यस्य साधुत्वबोधत इति त्रितयस्य निर्वाहो बोध्यः।अनचि चेत्यत्र य
णोमयइत्यस्योपसंख्यानादचोरहाभ्यामित्यस्तस्य परत्वं बोध्यं।पुमः खः।अम्परइति बहुव्रीहिः ꣳकꣳपयोरिति।
कुप्वोरिति सूत्रे विधेययोरित्यर्थः।इदुदुपधस्येति सूत्रे ऽप्रत्ययस्येत्यस्य प्रत्ययावयव भिन्नस्येत्यर्थादितिभा रामः
वः।अनुवर्ततीति।तत्सद्दो प्रकृतिप्रत्ययविभागाभावादितिभावः।कस्वेति।इदमनुनासिकपक्षे।अनुस्वारपक्षे ४२

विशेषणसंबंधमनुभूयपदविशेषणत्वेनतदंतपरइतिभावः।ङमइतिपंचमीबलाद्वीतिसप्तमीवष्ठ्यर्थेतदाह।अ
चइति।सप्तमीनिर्देशस्तुलाघवार्थः।ङमोह्रस्वाचइतितस्मिन्नितिसूत्रस्यभाष्यात्।ङमंतंयत्पदमितिकिं।अनी
तीत्यादौङमुण्माभूदितिभाष्येलुविभक्तिव्यत्ययकल्पनेगौरवात्पदावयवङमःपरस्येतिवैयधिकरण्यमेवोक्तं।दंडिने
त्यत्रङमुडभावोमंडूकप्लुत्याऽचिचपदेइत्यतःपदइत्यनुवर्त्याजादेःपदस्यङमुडित्यर्थेनबोध्यः।पदस्येत्यस्याच
त्यासंबंधेपिविशेषणविशेष्य[illegible]योरुभयोःसप्तम्यंतत्वेएव।तदादिविधिप्रवृत्त्यातदलाभःस्यात्।एतदर्थमेवा
चीतिसप्तमीनिर्देशःङमंतंयत्पदमित्यर्थेपिपरमदंडिनेत्यादावेतद्वारणायपदेइत्यनुवृत्तिरावश्यकचेवांतर्वर्ति
विभक्त्यादंडिनित्यस्यपदत्वात्उत्तरपदत्वेचेतिप्रत्ययलक्षण[illegible]निषेधस्तुन।मावकुंभवापेनेत्यादौपदव्यवाये
पीतिनिषेधापत्त्योत्तरपदस्यकार्यित्वात्रैवप्रवृत्तेः।तेननिषेधेनसिद्धमितितत्सूत्रस्यभाष्योक्तिस्त्वेकदेशि
नइतिदिक्।इकोयणचीतिसौत्रोनिर्देशःतृप्रकरणइति।अतएवसमःसुटीत्यादौप्रश्लेषेणसविधानमितिभाष्येउक्तं।
रोःपूर्वस्येत्युपलक्षणंतृप्रकरणेविधेयस्सएवमुत्तरत्र।रोःपूर्वस्मादित्यपि।अयमधिकारःतेनोत्तरसूत्रविषयेएवा
स्यप्रवृत्तिः।नतुमतुवसोरितिसूत्रस्यवार्त्तिकयोश्च।अत्रेतितुप्रकरणादेवास्यसंबंधोनत्वग्रेढोढेलोपइत्या
दावित्यर्थसूचनार्थंस्पष्टार्थमेववातुशब्दःपरस्मिन्नित्संज्ञकःपूर्वोनुनासिकइतिविशेषणद्योतनार्थः।रोःपूर्वस्ये
त्यस्यचरुःस्थानिनःपूर्वस्येत्यर्थोबोध्यः।अत्रानुनासिकात्परइत्यत्रानुनासिकादितिल्यब्लोपेपंचमीव्याख्या
नात्।अयमागमोऽनवयवरुरवावयवत्वेमानाभावात्।खरीतिविसर्गौद्विष्ठसाप्यवसानेस्यनुसंबंधोभावा
नात्।सोवक्तव्यइति।समःसुटीत्यादिसूत्रेपोत्तइत्युपसर्ग्यायसमःसुटीतिनसकारंप्रश्लिष्यतेतेःसकारएव

स ४

ल०श०शे०पू० तितुगितिचवर्त्तते।अस्खेनेतिस्वच्छशब्देउपपदेछ्यतेः केस्वच्छशब्दोनिर्मलेरूढः।एवंनञ्पूर्वोच्छादयतेडेञ्छशब्दइति
४४ पदांतत्वंबोध्यंस्पष्टंचेदममरटिप्पणे।आङ्मा।आङः साहचर्यान्माङव्ययमेव।दीर्घस्यायमिति।वद्धपमाएज्ञापकाद्व्या
ख्यानाद्वादीर्घादितिमध्यलोपेपंचमीतिभावः।एञ्ङ्सूत्रेभाष्येध्वनितमेतत्।वेच्छिद्यतइति।तुकोहलादिःशेषस्तुना
भ्याससंज्ञाप्रवृत्तिकालेस्थानिद्वारासाद्याद्वासंनिहितानांहलामेवतेननिवृत्तेः।अतएवनुगतइत्यादिचरितार्थं।दी
र्घात्पदांतादिति।पदांतस्यदीर्घस्येत्यर्थः।योगविभागोनयारेवआो ङितिसूत्रेभाष्येस्पष्टः।दीर्घातस्यपदस्येत्यनेन
44 सिद्धेतद्ग्रहणंपदांतविधित्वमसनपदविधित्वमितिवोधनद्वारासामर्थ्यपरिभाषानुपस्थित्यर्थं तेनासामर्थ्येप्यस्यप्र
वृत्तिरितिसमर्थसूत्रेकैयटः॥ ॥इतिहल्संधिः॥ ॥विसर्जनीय।प्राग्व्याख्यातमपिविसर्जनीयपदानुवृत्ति
य८ प्रदर्शनार्थमारितं।शर्परइति।बहुव्रीहिःविशेषणंचावध्यवधिमतोःसाजासाविसर्जनीयाद्विषुः खरेव।विसर्गस्य
विसर्गविधौफलमाह।नत्वन्यदिति।अन्यदेवविधत्तेति।इहेति।त्रैरूप्यमिति।विकल्पद्वयसामर्थ्यादितिभावः।सो
य।अपदाद्योरितिसूत्रेसोन्नत्वादेकवचनं।अनव्ययस्येति।अत्राव्ययीभावातिरिक्ताव्ययस्यैवग्रहणंव्याख्यानात्।तेत
नोपपयस्काम्यतीत्यादौसत्वसिद्धेरितिस्पष्टमव्ययीभावस्त्वेत्यत्रभाष्ये।जीःकाम्यतीति।वाःकाम्यतीत्यस्याप्युपलक्ष
णमिदं।इणःषः।इदुदुपधस्येत्यस्यासिद्धत्वात्सर्पिष्याशमित्यादौसत्वनिवृत्त्यर्थंजीर्व्याशंदोष्कल्पमित्याद्यर्थंचेदं।
अत्रानव्ययस्येत्यपदादावितिकाम्येइतिचसंवध्यते।तेनोच्चैःकल्पंदोःपद्मणीःकाम्यतीत्यादौषत्वं न।अतएवात्रप्रक
रणेसत्वमेवविधेयं।इणउत्तरस्यविसर्गस्थानिकसस्यानेनषत्वमितिभाष्योक्तपदांतरसंगच्छते।विसर्जनीयस्था राम:
निकेसुतुपप्युस्तुत्रइत्यादौनदोषस्तत्रहिषस्थानिकःसः।अत्रविसर्जनीयस्येत्यनुवृत्त्यैतदर्थलाभः।अनव ४४

तुकुक्वोरित्यस्यैवप्राप्तिः अनुस्वारव्यवधानेनोदुपधत्वाभावात्। दुंदीरमिति। दार्धातोरुपधायाईत्वे। अच्च स
येदीरसितिभावः। नञ्ज्ञवि। अप्रशानितिषष्ठ्यर्थेप्रथमा। नृन्पे। नॄनिति। द्वितीयांतानुकरणंषष्ठ्यासौत्रोलुक्न
लोपस्तुसौत्रत्वान्न। एवंकानित्यत्रापि। चाद्विसर्गइति। शर्परे इतिसूत्रात्तदनुकर्षश्च वेनेतिभावः। येननेति। येनना
प्राप्तेयोविधिरारभ्यतेसतस्यबाधकइतिन्यायेनेत्यर्थः। येननेत्यादेरयंकिंचिकावश्यप्राप्ताविलर्थः। नन्वयंयस्यप्रकृता
दा५ पर्हप्येबाधकत्वात्। प्राप्तेइतिभावेक्तस्तदप्राप्तियोग्यविषये ऽचारितार्थ्यंहिबाधकत्वेबीजं। तदुक्तंशर्पूर्वइतिसूत्रे
भाष्येशर्पूर्वाइत्येतद्धलादिःशेषस्यबाधकं। नचविषयभेदेकथंबाधकत्वं इदंतावदयंप्रष्टव्यःपदितत्रोच्येतकि
मिहस्यात्। हलादिःशेषश्चेन्नाप्राप्तेतस्मिन्नारंभादिदंतद्बाधकत्वंभविष्यतीति। अजादेर्द्वितीयस्येतिसूत्रेभाष्येपि
स्फुटमेतत्। नतुशर्परेइति। नचास्यविसर्गस्यकःपौ दुर्वारौ किंचास्येवतौस्यातांखरवसानयोरितिविहितस्यतुएत
योरसिद्धत्वात्सत्वमेवस्यादितिवाच्यम्। शर्परेइतिसूत्रे तुकुक्वोरित्यनुवर्त्यशर्परयोःकुप्वोःकःपयोरपवादोविसर्ग
स्यविसर्गइतिवाक्यभेदेनव्याख्यानेनादोषात्स्पष्टंचेदंभाष्ये। वार्त्तिकेकानुग्रहणंशक्यमकर्तुमित्याह। पदेति।
एवंसम्ग्रहणमपित्यक्तुंशक्यं पुम्ग्रहणंत्ववश्यकमेवानुनासिकपक्षेइणःपरत्वेनषत्वापत्तेः। प्रत्याहारइति। ग
णोक्तत्सत्वषत्वाना मेवपाठादितिभावः। कःपयोरपवादइति। तद्विहितविसर्गस्यापीत्यपिबोध्यं। कांस्कानिति
वीप्सायांद्वित्वं। संहितायां। संहिताचस्वरसिकार्द्धमात्राकालव्यवधानोच्चारणंततोधिकार्द्धमात्राकालेनोच्चारणेऽवग्र
हएतदधिकारोक्तकार्याभावतये इदंतदधिककालव्यवायेतुनसाधुत्वं नापिबोधइष्यतेइतिवृद्धाः। तेषांशास्त्रवि
षयतैवनेतिभावः। छेच। छे। [illegible] तुक् ह्रस्वस्यपित्तितितो ह्रस्वस्य

ल०श०शे०रू: दित्यत्रापिषत्वंभवत्येव। नचेदुदुपधस्यसस्योविसर्गइतिह्यवस्थाभाष्योक्तेः कथमत्रषत्वमितिवाच्यं। विसर्गस्यपा
४५ ठाभावेनोपधात्वासंभवात्तत्स्थानिनिमित्तमुपधात्वंग्राह्यमितिभाष्यतात्पर्यात्। अतएवसमःसुटीतिसूत्रभाष्येसंपुंकानां
मित्यनेनरुविधिरेवास्त्वित्याशंक्यपुंस्कामेत्यत्रषत्वापादनंसंगच्छते। नचकस्कादिषु इत्येवकस्कादिषु विद्यमानस्यपदस्ये
दुदुपधस्यषोविसर्गइत्यस्यापिच पंचकपालःकरोतीत्यादौदोषोनापिचतुष्कपालीत्यादावव्याप्तिरितिद्वित्रिश्चतुरितिम
येमितिवाच्यं। कस्कादिष्वित्यस्यासिद्धत्वेनचतुःशब्दइदुदुपधस्येतिनित्यषत्वापत्तेः। प्रकरणेप्रकरणमसिद्धमिति
पदान्तस्तूपसर्गादसमासेपीतिसूत्रेकैयटे। पूर्वपदादितिसूत्रेभाष्येचदूषितएवउपसर्गादितिसूत्रेचोपपादयिष्यते
किंचपूर्वत्रेतिपूर्वशब्देनप्रकरणग्रहणेऽवहितप्रकरणएवत्रिपाद्यसिद्धत्वस्यानवसंपूर्णसप्ताध्यायां। किंचास्या
45 धिकारत्वात्सूत्रमुपस्थितस्यापातियोगमसिद्धत्वंदुर्वारमित्यन्यत्रविस्तरः। इस्तुसोः। अत्रइसुसोःप्रातिपदिकावयव
योर्ग्रहणंतेनपेचुःकाष्ठैःसखुःपाकःकविभिःकृतमित्यादौनषत्वं। नित्यंसमासेइतिसूत्रोदाहरणेसमासविषयेनयो
रेवसंभवेनार्थाधिकारानुरोधात्साहचर्याच्च। इस्सुसंतपदावयवविसर्गस्येत्यर्थः। पदस्येत्यधिकारात्। नचप्रत्ययग्रह
णपरिभाषयापरमसर्पिष्करोतीत्यादौषत्वानापत्तिरवयवस्येसुसंतत्वेपिउत्तरपदत्वेचेतिनिषेधेनापदत्वादितिवा
च्यं। अनुत्तरपदस्थस्येतिनिषेधेनक्वचिदुपात्तविशेष्यस्यापिशब्दरूपविशेष्यमादायतदंतविधिज्ञापनेनशब्द ना२
रूपविशेष्यमादायप्रत्ययग्रहणपरिभाषयालब्धमिदंतदर्थकस्यपदविशेषणत्वेयेसुसंतंतस्येत्यर्थेनादोषात्। अत
एवकनोरच्चेत्यादौनदोषः। ब्राह्मणस्यसर्पिष्करोतीत्यादौसापेक्षत्वेनासामर्थ्यान्नाशंक्यंतस्यैकार्थीभावसामर्थ्यवि
षयत्वात्। अप्रधान भिहितंसमानाधिकरणमसमर्थवदितिसुक्तेः। सर्पिःकालकमित्यादौनषत्वमथात्वभिहितमित्युक्तेः। राम:
सर्पिष्पीयतइत्यत्रषत्वसिद्धिः। धातुसहचरितप्रत्ययाभिहिताचेनसमानाधिकरणमसमर्थवन्नेतितदर्थः। य ४५

पस्येत्यादि चात्र पदो न संबध्यते तेन द्विष्कृतं दुष्कृतं दुष्कामपतीत्यादौ षत्वसिद्धिः । णीः कास्पतीत्यादौ सकाराभावादेव
न दोषः । अपदादाविति च न संबध्यते । तेन दुष्करोतीति षत्वसिद्धिः परत्वस्य पदो संगतः । उत्तरसत्वस्यासिद्धत्वे
न निष्कृतमित्यादौ षत्वासिद्धेः प्रकरणे प्रकर णमसिद्धं न योगे योग इति पदास्तु नास्त्येव तत्रापकाससंभवादिदुप
सर्गाद्समासेपीत्यत्र निरूपयिष्यामः । विसर्जनीयस्यैव षत्वमिति मक्तोक्तपदो तु सकारषकारयोः स्वरितत्वे पि
यथायोगं संबंधो मंडूकप्लुतेस्येत्यन्यत्र विस्तरः । नमस्पु इत उत्तरमपदादाविति न संबध्यते व्याख्यानात् । सान्द्रा
सम्पत्तिलादिति । ऊर्ध्व इत्युक्तिलभ्यते स्वरादिपठितस्य गतित्वाभावस्ते न सान्द्रास्नम्पत्तिशुच्यर्थवचने पि न द्वातिरिसम्पे ।
इदुदु । अप्रत्ययस्येति पर्युदासो लाघवात् । तत्र प्रत्ययपदं तत्संबंधिपरं तेन संबंधिभिन्नस्येत्यर्थो त एव कविभिः कृ
तमित्यादौ न षत्वं स्पष्टं चेदं भाष्ये इत्यन्यत्र विस्तरः । एकादेशशास्त्रेति । एकादेशशास्त्रसंपन्नरेफस्यानिकलेन विस
र्जनीयस्यैकादेशशास्त्रनिमित्तकत्वं बोध्यं स्पष्टं चेदमत्रसूत्रे उरण्रपर इति सूत्रे च भाष्ये इत्यन्यत्र विस्तरः । प्रत्ययभि
न्नसंबंधिन इति तु नार्थः । अग्निः करोतीत्यादावपि प्रत्ययभिन्नसमुदायसंबंधित्वेन षत्वापत्तेः । तपरकरणं किं । गीः क
रोति । उपधाग्रहणं किं । उपधाग्रहणं न करिष्यते इदुभ्यां परं विसर्जनीयं विशेषयिष्याम इति हपवरट् सूत्रभाष्योक्तेः ।
तिरसोन्य । अत्र गतिग्रहणं नानुवर्त्तते परभावे तिरस्कारशब्दप्रयोगात् । अन्तर्धौ वृत्तिरस्तोगतित्वात् । द्वित्रिकृत्वो
र्थ इति न विसर्गविशेषणं । चतुःशब्दे असंभवात् किंतु द्व्यादीनामित्याह । वर्त्तमानानामेषामिति । इसुसोरिति सूत्रव
दप्रमाणानीत्यासु च इति सूत्रे न पिलुप्तं चितमसुजंतां तस्यपदस्येत्यर्थात् । चतुष्कपाल इति । इदुपधस्येति निरपेक्षः चतुः
शब्दो युक्तन्न इति । अप्रत्ययस्येति पर्युदासो न । अत एव चतुष्पाड्भ्रो ढगित्यादिनिर्देशाः संगच्छंते । चतुष्पं चाश

वो ध्यं। भास्कर इति तपरकरणादतः कार्यस्याप्राप्तिः॥ ॥इति विसर्गसंधिः॥ ॥ मतुखौजसिसत्रकारेवपाठ्यः
सर्वत्र सुग्रहणे ग्रहणमेवास्त्वितिचेन्न। पथौ त्रैत्यादौ रोरसिद्धत्वादुत्वानापत्तेः तोरोरित्यस्य प्रथमैकवचने
चारितार्थ्यात्तद्ध्वनयन्नाह। स्वौजसेति। पदस्येत्यनुवृत्तं ससजुषोरुरित्यं विशेष्यते तेन तदंतविधिरादेशस्त्वलो
त्यस्येत्यंतस्य तत्फलितमाह। पदांतस्येत्यादिना। सजुरित्यत्रापदे शिवभावेन सिद्धिः। अपदे शिवभावे प्रातिप
दिकेनग्रहणवता प्रातिपदिकेन तदंतविधिर्नेति परिभाषाद्वयं प्रत्ययविधिविषया भित्यसमासे निष्कादिभइत्यत्र
भाष्ये स्पष्ट। इदं जश्त्वापवादः अयानित्यादौ त्वस्यासिद्धत्वात्संयोगांतलोपएवेति दिक्। यत्वस्यापवाद इति। यदीदंन
स्यात्तर्हि यत्वं प्राप्नोतीत्येतावता कृते त्वस्मिन्यत्वस्यासिद्धत्वादुत्वगुणयोर्वा प्राप्तिरेवेति भावः। प्रथमयोःपाख्या
46 नात्प्रथमयोरित्यनेन प्रथमाद्वितीयारूपसुप्विभक्त्योर्ग्रहणं तदाह। प्रथमाद्वितीययोरिति। पूर्वग्रहणं किं। अ
ग्नीत्यत्र परसवर्णो माभूदिति। दीर्घग्रहणं तु त्रिमात्रस्थानिना त्रिमात्रो माभूदिति। सवर्णग्रहणं तु स्पष्टार्थं
पूर्वस्यादीर्घत्वात्पूर्वजातीय इत्यर्थे निष्ठसिद्धेरिति स्पष्टं भाष्ये। आद्गुणइति। तौ सदिति निर्देशेन भ्रष्टावसरत्वा
पत्यात्रशास्त्रेनाश्रयणादिति भावः। देवदत्त हंतृ हतन्यायस्यत्वनात्र प्रवृत्तिः। देवदत्त हंतृहनने हि नो जीवनं देव
दत्तहननप्रसक्तौ हनने त्वस्यैव देवदत्तजीवनप्रकृते तु न देवदत्तस्थानीयगुणहंतुः पूर्वसवर्णदीर्घस्य लक्ष्ये प्रवृ
त्तिः किंतु हननोद्यमसजातीयं प्रसक्तिमात्रं प्रसक्तस्य निबंधे वा ध्यो जीवनेन बाधकमिति स्पष्टं चेदं स्वादिष्विति
सूत्रे कैयटे। सुस्नोतइति। सुस्नोतस्य शब्दः कस्यचित्संज्ञा ततः संबुद्धौ दूराद्धूते चेति प्लुतः तत्सामर्थ्यादिति। प्राप्त रामः
योगित्वेन तदाश्रयणसामर्थ्यादित्यर्थः। आश्रयात्सिद्धं इति भाष्योक्तेः। पयस्यात्ति पयो ददातीत्यर्थे। आगच्छ हे ४६

दातुसर्पिरादिकमलुक्समस्तं प्रातिपदिकं पाणिनेः कुण्डादिष्वलुक्तिपक्षाइतिआयनेयीनीति सूत्रे भाष्येऽलुक्युक्तेः।
तत्र हि शंखइत्यादावादेशानां क्योण्णादीनां प्रतिषेधो वक्तव्यः। प्रातिपदिकविज्ञानाच्च। भगवतः पाणिनेः सिद्धमि
त्युक्तं। अप्रयामं ताल्वा यैसन्त्रि क्विब्वृत्तिसूत्रे व्याकरणान्तरगीसेदसर्वं नामस्थानमितिमहासंज्ञावत्। अतएव भाष्ये
उणादयो ऽव्युत्पन्नानीत्येवोक्तेन लनेकार्थो ऽपि धातवइतिवदलुक्समस्तान्यपीत्युक्तं तदाइदुदुपधस्येतिनिस
मले प्राप्तेने नविकल्पइतिप्रत्ययग्रहणाभावात्तत्परिभाषानुपस्थितेः। परमसर्पिष्करोती सादौ षत्वविकल्पः सिद्धः।
नित्यंसमासे इतिसूत्रमनुत्तरपदस्थस्येति प्रतिषेधार्थं नित्यग्रहणं तु न कर्त्तव्यमेव। समासे नित्यषत्वस्य इदुदु प
धस्येत्येव सिद्धेः। सर्पिष्कलादौ षत्वलब्धपदो केचित् न्यद्दे वे सर्पिकाद्यहुलग्रहणादितिस्पष्टभाष्येऽपेक्षेति
व्याख्यानात्। एकार्थीभावसामर्थ्यग्रहणपरमसर्पिः कुण्डिके सादौ समासे विकल्पापत्तिः। अनुत्तरपदस्थस्य निषेधादुत्तर
सूत्रस्यनप्रवृत्तिरितिभावः। नन्वनेनैवसिद्धे कस्कादिषु सर्पिष्कुण्डिकाशब्दपाठो व्यर्थइत्यत आह। कस्कादिष्वि
ति। एतेन तत्सामर्थ्यादुत्तरपदस्थस्यापि षत्वमित्यपास्तम्। अपेक्षाविरहेपीति। आनय सर्पिः कुण्डिका तिष्ठती सादौ। नां ५
अपेक्षायामिति। इदं सर्पिष्कुण्डिकायाइत्यत्र प्रत्ययभिन्नविसर्गस्येत्यर्थे इदुदुपधस्येत्यत्र व्याचक्षाणव्याख्याद
र्शी क्तामतेऽपेक्षापांते नसिद्धेरितिभावः। एतेन कस्कादिपाठस्यानपेक्षायां चारितार्थ्येन अपेक्षायां तस्यासि
द्धत्वाद्विकल्पस्य वो चितइत्यपास्तम्। प्रत्ययसंबन्धिभिन्नविसर्गस्येत्यर्थे तदप्राप्तिरेवेत्यपेक्षायांवि
कल्पएवेतिबोध्यं। अतः कस्कादिषु नतद्वादिग्रहणंसमासाद्दिमोत्तरपदस्यविषेध्यत्वात्। विष्वग्देवयोरितिसू
त्रेवप्रत्ययग्रहणेन धातोर्विशेषणत्वे तदादिविधिज्ञापनात्। अयस्कुम्भीत्यादौ लिंगविशिष्टपरिभाषयासत्वं

ल०श०शे०ष्ठ: वम्भावेनस्तुवं तस्य तत्प्रयुक्तकार्यस्यवालाभेनतत्सिद्धेः प्रत्ययलक्षणेनापि नप्राप्त्यवृत्तिर्धर्मलाभः लक्षणपदोपादा
४७ नेनप्रत्ययनिमित्तककार्यस्यतन्निमित्तकमवहारस्यवातिदेशात् एवंदीर्घोहो निदाघेत्यादौ हलन्त्यादिलोपेउक्त
रीत्यास्यानिनिजायमानस्यास्तुपीतिरत्वनिषेधादेशोदीर्घोहिनश्शब्देतिदेशेनप्रवृत्त्यानरेफइतिदिक्। तेवांरोरिति।
इदंचनिपातानामस्यायविभाषाभवदितिवार्त्तिकं प्रत्याचक्षाणस्यवृत्तिकृतोमतेनपरंतु तेषामपिरोरित्यर्थः। अपिना
विभाषाभवभ्दगवदघवतामोश्चावस्येतिवार्त्तिकनिष्पन्नसंग्रहः। एषामंतस्यरुःस्यादवस्य च ओकारः संबुद्धावित्ति
तदर्थः। अवग्रहणसामर्थ्यादलोंत्यस्येति निवृत्तिवोध्यं वार्त्तिके निष्पन्नानां त्रयाणां भोशब्दनिपातस्यावश्यकत्वम
प्यत्रस्यष्टमित्याहुः। व्योर्लघु। यघपिवर्णसमाम्नायेयस्यप्राथम्यात् व्योरित्युचितं तथापिलोपोव्योरितिलोपवारणा
47 यसौत्रक्रमाश्रयणीयंस्यादतोव्योरित्युक्तं। लघुत्तरः प्रयत्नोयस्योच्चारणेसलघुप्रयत्नतरः। अन्यपदार्थसंबंधोत्तर
वर्त्तिपदार्थप्रकर्षविवक्षायासाधुः। प्रयत्नेलघुतरत्वंचैषांशैथिल्यजनकत्वमेव। लघूच्चारणवितिलघुतरोच्चा
रणविलम्बः। सूत्रेसौत्रत्वादेकवचनं। वकारोदाहरणमसा वादित्य इतीतिवृत्तिः। ओतो। ओ रिसत्रयकारसाहच
र्यविकारोधात्वनवयवएवात्राप्यर्था। धिकारात्तथैव तेनसम्प्रतोवच्युतेत्यादौनदोष इत्यत्राह। यस्येति तादृशवस्यासंभवा
दितिभावः। भोभगो इतिलनानुवर्त्तते विच्छेदात्तद्ध्वनयन्वदपति। पदांतस्येति। तोयमिति इदंलघुप्रयत्नयोर्नगा
प्युप्लुतस्येत्याह। अ लघुप्रयत्नस्येति। छग्जार्थमिति। आख्यानादितिभावः। तादृश अभोसादिपूर्वक एवेत्याशयेनाह।
भोअच्युतेति। भाष्यानुसारिणस्तु भोइत्याद्यनुवृत्तेः। स्युतोवित्यादौनदोषः। तस्यानभिधानाच्च। अपूर्वस्येतिलोत
इत्यनेनविरोधान्नसंवृध्यते लोपः शाक ल्यस्येत्येवभोभगोइत्याद्यनुवृत्त्यासिद्धेनिरत्यार्थमिदमित्याहुः। उञि रामः
च। भोइत्यादिपूर्वस्यष्टवेणस्य च होरादार्द्वयोरिति। एतदपिनियमेवप्रत्तापिगार्ग्यग्रहणानुवृत्त्यासा लघु ४७

पयोदृ॰ आगच्छहे पयोदेत्यादावेकपदस्य वर्णद्वयसापेक्षमंतरंगमुक्तं प्रतिवाक्यसंपादकपदांतरसापेक्षप्लुतस्यासिद्ध
त्वादुक्तेप्लुतसिद्धिरन्यथा प्लुतस्योवद्दृष्ट्यासिद्धत्वासरत्वात् प्लुतेऽप्योऽप्लुतपरत्वाभावादसेऽप्लुतासरत्वाभावादुक्तंन
स्यात्परिभाषादृष्ट्यावहिरंगासिद्धत्वेपिनक्षतिः स्वदृष्ट्या सिद्धत्वेपि परंप्रत्यसिद्धत्वप्रतिपादनसंभवात्। स्वदृष्ट्या
ऽविद्यमानस्य परंप्रत्यविद्यमानत्वप्रतिपादनात्। अंतरंगस्यासिद्धत्वेत्वप्रतिपाद्याभावे कंप्रत्यसिद्धत्वंप्रतिपाद्येतत
त्राद्येवाक्यस्टेरिसटशब्दाकारः प्लुतोसे रेफदकारसंयोगपरत्वेनाकारस्यगुरुत्वाद्गुरोरितिप्लुतः आश्रयेणतुये
ननाप्राप्तिन्यायेनप्रसद्दत्वेनचपूर्वत्रासिद्धत्वमेववाध्यते नत्विदं। सुश्लोतादसादौत्वेकवाक्यमात्रसापेक्षत्वात्प्लुतो
तरंगोभिन्नवाक्यस्थाकारसापेक्षत्वादुत्वंवहिरंगमितिस्पष्टंभाष्ये। उकारानुबंधेति। उकारेत्संज्ञकरेफस्येत्यर्थ इतिभा
वस्तेनदेव रुहीत्यादौनदोषः। भोभगो। रोसुपीत्यत्रोरितिवर्त्ततेनतुरोरीत्यत्र इति प्रातरत्रेत्यादावतिप्रसंगात्।
अशब्दांतद्वंद्वेनपूर्वशब्दस्यवहुव्रीहि माभिप्रे साहे तत्पूर्वस्येति। नन्वेवं पूर्वरूपापत्तिरतआह। असंधिरिति। भ
गोअचोशब्दौकारयोरकाराभावात्पूर्वरूपात्मकसंधिकार्याभावइत्यर्थः। इदंप्राचामनुरोधेनवस्तुतः सूत्रेरांत
नामेवानुकरणमसंधिर्न्यायप्राप्तएवेतिवोध्यं। नहापमितिति। इदमर्वाचामनुसारेण। भाष्येतुरेफस विसर्गस्यानित्वेनतद्वृ
त्तिरुत्वाश्रयमपीदमल्विधिरेव। स्यान्यत्वव्यतिथर्माश्रयत्वात्। अथहीदृसत्रचदीर्घे लोपेचेद्त्वेनैवानिवेशइतिवि
शेषोतः पयः स्विलादौदोषः। तत्राहिरोः सुपीतिविसर्गः नियमशास्त्राणि चविधायकान्येवा न्यवस्त्राधिकार्यमादायतु
निषेधकानीतितत्रापिरोरेफस्य विसर्गइत्यर्थेविशेषग्रहणंव्यर्थमित्युक्तं। नन्वेवं हेरामेत्यादौसंवुध्यवयवहलः सस्यलो
पेतद्वृत्तिसुप्त्वस्यालब्धमत्वेनस्थानिवत्त्वाभावेपदत्वासिद्धिरितिचेन्न। आनुमानिकादेशस्य रामेसस्यानि

स्त्री सत्र प्रायेणराज्ञेति पाठात्स्वेदृशानामनभिधानमेवेत्याहुः। अनन्यत्वादिति। त्रिषद्वां तत्समासादन्यत्र समासांतेष्व
प्येति त्वेति लोपे विरात्रिशब्दत्वादृतेरिति भावः। अनुवादे रेफविशिष्टस्योपादानाद्रेफस्य रेफविधानार्थमत आह।
विसर्गापवाद इति। ढ्रलोपे। नायं तत्पुरुषोऽनडुपरि चकारेत्यादौ चेदोणापत्तेर्नापि बहुव्रीहिर्व्यधिकरणत्वादतो णि
जंतात्कर्मण्युपपदसमास इत्याह। ढरे फा वित्यादि। भाष्ये तु व्यधिकरणबहुव्रीहिरेव दर्शितः। न चाज घोइत्यादौ
सिपि धातोरिति रुत्वस्य लो ढ इत्यादौ ढत्वादीनां पित्तूराज्ञमित्यादौ संयोगांतलोपस्यासिद्धत्वात्कथं दीर्घ इति वाच्यं।
ढग्रहणेन पूर्वत्रग्रहणेन च लत्वस्य नैजर्घा इति भाष्योदाहरणेन च तत्तच्छास्त्रैकवाक्यतापन्नपूर्वत्रासिद्धमिति सू
त्रस्य पूर्वग्रहणेन तत्सूत्राग्रहणबोधनात्। अणः किमिति। अचइत्येवास्त्विति प्रश्नः। तृंह इति पाठे नकारजा
वनुस्वारपंचमावितिवक्ष्यतोरनिदितामिति नलोपे तृढ इति रूपं। अत्राणपूर्वेणैव व्याख्यानात्। विप्रतिषेधेति।
विप्रतिपूर्वात्कर्मव्यतिहारे वर्तमानात्सेधतेर्घञि परस्परविरोधार्थो विप्रतिषेधशब्दस्तत्र नित्यस्यावश्यक त
यांतरंगस्य ज्ञापकादिनाऽपवादस्य च नशास्त्रगण्याबाधकत्वेऽस्थितेत भिन्नोऽस्या विषय इत्याह। तुल्यबलेति। द्वयोः
शास्त्रयोः क्वचित्लब्धावकाशयोरेकत्र प्रयोगे युगपत्संभवः स्वकार्यसम र्पणं व्यसः। तत्र प्रायेणैकस्य कार्यद्वय
योगेक्तेऽसंभवे एतस्य प्रवृत्तिः यथा वृक्षेभ्य इति। तत्र हि दीर्घत्वयोर्युगपत्प्रवृत्तौ स्वस्वनिमित्तानंतर्यसंभवः। क्वचि
केवलासंभवोपि यथा शिष्यादित्यादौ। अत्र हि तातङ्शाभावयोर्युगपत्प्रवृत्तौ स्वस्वनिमित्तानंतर्यसंभवः। यद्यपि ता
तङादेः स्थानिवत्त्वेनास्त्येव तत्तथापि अतिदेशादादेशप्रवृत्तेरुत्तरमेव न तु तत्प्रवृत्तिकाले इति युगपत्संभवोऽस्त्ये
वेति परत्वात्तातङि सकृद्गतिन्यायेन न शादेशः स्पष्टं चेदं सर्वं प्रकृतसूत्रे इकोगुणवृद्धी अदसोमादित्यादा

प्रयत्नस्यैव लोपः। एतेन भोऽइत्यादिषु वलघुप्रयत्न लोपार्थमत्रापि तदनुवृत्तिरित्यपास्तम्। वकारोदाहरणं त्वसाउ तु २
एकाग्निरिति वृत्तिः। उत्तरार्थमिति। ङमो ह्रस्वादचीत्यर्थमित्यर्थः। एतत्तत्रैव निरूपितं। हलि सर्वेषामिति त्यादौ न संभ
वते। अपहितेऽङमङसत्रैव प्रयोजनकथनपरम् व्यग्रमाणात्। अत एव लिटत्वइत्यादौ धुडादयः। अन्यथा सा
दोषपदे इत्यर्थान्नस्युः। अत एव भाभ्यामित्यादौ हलि सर्वेषामिति लोपसिद्धिरिति दिक्। हलि स। भो भगो इत्याद्य
नुवर्त्तते तत्रोक्ता शाल्यस्य लघूच्चारणस्यैवानेन लोपः। अलघूच्चारणस्य लोप इत्येव सिद्धं। अपूर्वे तु। भयोरपि।
न चापूर्वलघुप्रयत्ने असाद्धिद्धत्वाल्लोपः शाकल्यस्येति प्राप्नोतीति वाच्यं। लघुप्रयत्ने स्यैवानेन लोपे व्योरिति
सूत्रे चेतीतिकरणेन हलि विधानाभावेन वसिद्धावस्य सूत्रस्य वैयर्थ्यापत्त्या तद्बाधात्। न चालघुप्रयत्नयोरेव लोपः
स्यात् व्योरित्यधिकारादिति वाच्यं। उभिमान्ग्रहणं यस्य सर्वेषामिति सर्वेय्यर्थ्यापत्तेः विकल्पस्य विच्छिन्नत्वेन
नित्यत्वसिद्धेः। च्चयकार एवानुवर्त्तते न वकारः अत एव मित्यादौ न वस्य लोपः। फलाभावात्। वा
व्यपरे इत्यादिनिर्देशाच्च। अन्यथा। तत्रसोऽन्त्यमाद्याश्रयणीयस्यात्। तदाह। लघ्वलघूच्चारणस्य यस्येति। नतु रूपी
ति। पर्युदासो हि रूपसदृशे प्रत्ययएवस्यादेव चाह भूतीलम्ने न स्यात्। यदि तु सुप् भिन्ने शब्दे स्यात्तदीर्घो होनिदा
घइत्यत्रापि स्यात्। एवं तद्दलपर्यस्तु न। उत्तमैकाभ्यामित्यादिनिर्देशः। सप्तमीतिनिर्दिष्टे प्रत्यये तदन्तविध्यभावज्ञापनात्।
लद्पानुरोधेन क्वचित्प्रत्ययग्रहणे स्वाद्यन्तस्य तापारवाश्रयणाच्च। अत एव भ्यां निष्ठेत्यादौ न दो
षः। अहरहइति नित्यवीप्सयोरिति द्वित्वं नलुमताति निषेधाल्लुप्तस्य लोपाभावः। गतमहोरात्रिरिति। केचित्तु भाष्ये ग्रा
तिदेशिकस्याहोरात्रस्यैवोदाहरणात्। नलोपः प्रातिपदिकान्तस्येति सूत्रेन हितपरान्तरयन्तरे रो वा विशेषो

ल०श०शे०इ: रित्यत्र कैयटस्पष्टमेवं चाविप्रतिषेधे इत्येवाय योद्देशैवे ति स्थितं त्रिपाद्यां कार्यकालपक्षेप्य प्रवृत्तेः पूर्वदृष्टस्यापरावस्था
४८ नाभावादित्यन्यत्र विस्तरः। इत्तिलोपे इत्ति। उक्तं नित्यमिति तु नभोभगो इति रूपे तानीत्यलोपस्यात्विधित्वात् स्थानिवत्त्वेन त
द्भ्रीतिदेशे पित्त्व्यारणप्रसंगरूपस्यानुषङ्ग्यपभावेन लोपे तदप्राप्तेश्च। एतत्तदोः। अनुकार्यस्वरूपमंग्यभिप्याकोशा
इव कशेषाभाव। एतत्तदोरनंतरइत्यर्थः। तेन परमसददातीत्यादौ न दोषः। ओणे लनदोषः। तत्र सदाद्यत्वाभावेन हल्
49 ङ्याद्दिलोपस्य दुर्वारत्वात्। सुइति प्रथमैकवचनमेव व्याख्यानात्। अनञ्समासे किमिति। तस्य पूर्वपदार्थप्रधानत्वादुप
सर्जनत्वाभावेन हल्ङ्याद्दिलोपो दुर्वारइति प्रश्नः। उत्तरपदार्थप्रधानः सइत्युत्तरं। सोचि। सइति प्रथमांतस्य लुप्त
नञिव युक्तम षष्ठीकमनुकरणं। सेमामविड्ढीति। द्वादशाक्षरपादा जगतीछंदः। स एव मुक्त्वेति। लोपे त्र पादापूर्तेर्न लोप इति भावः।
न्यसदृशाधि अवधारणं त्विति। कुङ्केर्व्याख्यातमवधारणं त्वित्यर्थः। बहुलत्वादिगमकांतरभावादितिभावः। एवं च तदनुक्तौ वक्त व०
करणे तथा ह्य चिदप्रवृत्तौ सिद्धायामवधारणपरतया व्याख्यानं व्यर्थमितिभावः। सर्वमेतदवधारणं त्विति ळनारूढ्वितमित्यलं॥
र्थगतिः। न इति स्वादिसंधिः॥ ॥स्वादिविधौ प्रातिपदिकाधिकारात्तां संज्ञामाह। अर्थवदिति। अधातुरित्यादिपर्युदासोत्या घवा
ञ्युक्तमिव युक्तं त्. प्रत्ययांतमिति। आवर्त्तिते प्रत्ययपदे प्रत्ययग्रहणपरिभाषया तदंतग्रहणं संज्ञाविधावितिनिषेधस्तु प्रत्ययस्य यत्र
त्तं वायत्क्रि संज्ञा तद्विषय इति भावः। अत्रसूत्रे उत्तरसूत्रे चार्थवत्त्वमेतत्संज्ञाफलीभूतविभक्त्युत्तरसमभिव्याहारानपेक्षया लोकेर्थवि
वित् दृश्यते षयकबोधजनकत्वम् अन्यथा धातुरिति पर्युदासेन व्याख्यानादर्थवत्त्वेन वत्सादृश्यग्रहणेन सिद्धे तत्र सूत्रे कृदादीनामन
तत्र तस्माभ्दि र्थकानामप्रसिद्धेस्तद्वैयर्थ्यस्यात् वचनं शिवयुक्तेन्यायानित्यत्वज्ञापनार्थं तत्। तदनित्यत्वज्ञापने भाष्यसंमतदृष्टांतरफ रामः
न्नेसदृशे धि लाभावात्। अहन्कांडेइत्यादावेतत्साध्यविभक्त्यपेक्षत्वे पितदितरानपेक्षत्वमस्त्येवेति तत्पर्युदासः सार्थकः। न च त
करणे द्रव्ये केवलप्रत्ययस्य। तदुक्तं। संख्यायाः अति शदंतायाः इति कन् इति भाष्ये नहि लोके केवलेन प्रत्ययेनार्थो गम्यते केन तर्हि स ४८
कार्यं विज्ञाय ते हि पतस्तत्याप्यगतिरस्तीत्यर्थः २

वाक्ये । तत्र युगपदुभयोः कार्ययोरसंभवात्पर्यायेण त्वादिवच्छास्त्रद्वयप्रसंगे । नियमार्थमिदं परमेवेति तेन ति
स्थानाभिसूत्रयोर्यौगपद्यासंभवेन परत्वात्तिस्त्रादेशे पुनः स्थानिवत्त्वेन त्र्यादेशो न तत्प्रसज्यते सकृद्गतौ विप्रतिषेधे यद्बाधि
तं तद्बाधितं तद्बाधितमेवेति । यद्वा यथा लत्ववलयोरेकः प्रेष्यो भवति स तयोः पर्यायेण कार्यं करोति यदा तमुभौ युगप
त्प्रेष्यतो नानादिक्षु च कार्ये भवतस्तदोभयोर्न करोति यौगपद्यासंभवात्तथा शास्त्रयोर्लाटप्रेष्ययोः क्वचिद्विषये यौ
गपद्यासंभवादप्रवृत्तिप्राप्तौ ज्ञाप्यामिदं परं भवतीति विध्यर्थं तत्र कृते यदि पूर्वस्यापि निमित्तमस्ति तदा तदपि भवत्येव तत्
प्रसज्यते पुनः प्रसंगविज्ञानात्सिद्धमिति । यथा भिःसत्रतात ङ्भिभावयोर्युगपदेकस्थानिसंबंधस्वागरूपनिमि
त्तानंतर्यस्वावानसंभव इति भावः स्पष्टं । कार्यपरत्वं च परशास्त्रविहितत्वं । कार्यकालपक्षेऽप्यष्टाध्यायीपाठकृतपरत्वमेव
नियामकम् । अत एव ङमो ह्रस्वादित्यादौ त्रिपादीस्थे कार्यकालपक्षे एव परिभाषयोः प्रवृत्ता एकदेशस्थत्वेऽपि परत्वा
त्तस्मादित्युत्तरस्येत्यनेन व्यवस्थेति संगच्छते । त्रिपादीस्थेन शास्त्रेण विरुद्धपरिभाषाद्वयमध्ये परं वकाल्पते । प्राक
ध्यते न पूर्वेति तत्त्वं । संज्ञानां तु कार्यकालपक्षे प्रदेशे एव वाक्यार्थे न तद्धि श्रोतरमेव विरोधप्रतिसंधानं कार्यत्वान
वेति तत्र सपरत्वमेव तत्सूत्रप्रवृत्तौ बीजमत एव कार्यकालपक्षे ङ्याद्भ्यः परैव प्रत्ययसंज्ञेति । अदसो मादित्सूत्रे
भाष्येऽक्तं । परिभाषाणां तु तत्तदपि त्वस्वदेशे एवैकवाक्यत्वेन बोधोऽस्येति तासां पाठकृतमेव तदेतत्सूत्रप्रवृत्तौ नियामकमिति
बोध्यं । यद्यपीयं परिभाषा तत्प्रापिका येनानेकार्यभानुग्रहणात्तस्मिन्निति तस्मादितिपरिभाषयोरपि व्यवस्थापिका
कार्यकालपक्षेऽपि नैकपरिभाषादिवद्विधेयकवाक्यतां गतत्वात्कार्यानिष्पादिका किं च वाक्यभेदेन बकार्यव्यवस्था
पयतीति यथा वृद्धो भ्य इसेत्यदीर्घत्वयोः प्राप्तयोः परमेव प्रवर्तते यतिः ... हि रंगमिसादायोपीति खरवसानयो

ल०श०शे०भू० इति। एतेनयत्तच्चब्दार्थयोरनुगतत्वेनशब्दानुगमस्याप्रयोजकत्वेनव्यवच्छेद्यानननुगमेपि तत्स्वभावेनचप
५० न्नसंघातइत्यादिप्रयुक्तमिवेत्यपास्तं।पदशब्देना न्नरवातंत्र्येणापिप्रयोगार्हमर्थवत्तयैव्यते।अतएवार्थवत्समुदाया
नांसमासग्रहणंनियमार्थमित्युक्तमत्रभाष्ये।भाष्येऽत्र्ववंतानामित्यत्रेनभेदसंसर्गद्वारका र्थवत्तउपलभ्यते
य४ इतिकैयटेनस्पष्टमेवोक्तं।तेनगवित्ययमाहेत्यादौगोइत्यादीनांसुबंतत्वाभावेपिनसमुदायस्यप्रातिपदिकत्वं।अनुकर
णस्यानितिपरस्यापिप्रयोगसत्वेनतावन्मात्रस्यापिपृथक्प्रयोगार्हत्वात्।बहुपटवइत्यादौप्रातिपदिकत्वसिद्धयेत्वा
50 तंत्र्येणेतित्र्यह्वइत्यादिद्विधत्वपरेआमपित्वातंत्र्येणप्रयोगार्हार्थवत्तामेवग्रहणान्तु नकाम्येत्यादौनदोषः।अतएवांग
संज्ञासूत्रेभाष्येप्रत्ययग्रहणेयस्मात्सविहितस्तदादेस्तदंतस्यग्रहणमितिपरिभाषायाःफलानिकापराणावसरेदेव
दत्तोगार्ग्यइतिसमुदायस्ययञंतत्वेनप्राप्तप्रातिपदिकसंज्ञाभावःफलत्वेनोक्तः।यथाश्रुतमूलोक्तानियमेऽज्ञनियमे
नैवतदप्राप्त्याभाष्यासंगतिःस्पष्टैवएतेनकुमारीवसुरित्यादौपूर्वभागस्यभत्वात्पूर्वेभागःपदमित्ययुक्तमित्यपास्तं।वा
क्यस्यनेति।प्रातिपदिकत्वेहिलुपःअश्रवणनापत्तिःपिंङीमित्यादौवाक्यैकदेशप्रयोगेलुक्समास चांगाधिकारविहि
तस्युप्प्रत्ययनिमित्तकार्याणांस्ववादेशानांचचारितार्थ्यंविकल्पेनसमासविधानं चस्वरार्थमितिभावःशश
अगादिपदानांचवाच्छेशशांअगादौशक्तिरितिपूर्वेणैवप्रातिपदिकत्वंसिद्धं स्वगन्नाद्यनुरोधेनचवोध्यपदार्थ
स्यावश्यकत्वं।अदौहिर्णीरप्यंतरादिपदेषुअवयवानामसंतानिरर्थकानामप्यन्यत्रदृष्टार्थारोपेणप्रातिपदिक
त्वंसुवुसत्यादिनाध्यपाकथंचित्साधुत्वान्वाख्यानंबोध्यं।अधिका रोयमिति।संज्ञाधिकारइत्यर्थः।संज्ञात्वावगम रामः
स्तुआख्यानात्।विकारागमानांतुनसंज्ञा।प्रत्ययइति।महासंज्ञयास्वस्वप्रकृत्यन्यतरार्थप्रत्यायकस्यैवतत्संज्ञ ५०

प्रकृतिकेनेति। हीरस्याह। धात्वादीनां विना तिङ्भिन्नौ किकोऽर्थो न विद्यते। कृत्तद्धितानामर्थश्च केवलानाम लौकिकः
प्रातिविभक्तेस्तदंतस्य तथैवार्थो न विद्यत इति। अतएव। पदसंज्ञासूत्रे तद्ग्रहणस्य संज्ञाविधौ तदंतविध्यभावज्ञापक
त्वेकृत्तद्धितेतिसूत्रे तद्ग्रहणं कर्त्तव्यमर्थवदितिवर्त्तते। कृत्तद्धितांतं चैवार्थवन्न केवलाः कृत्तद्धि
तावेति भाष्यमुपादाय शास्त्रीयार्थग्रहणे एवं ज्ञहणानुवृत्तिर्व्यर्थेन तदनुवृत्तिसामर्थ्यात्। लौकिकार्थप्रत्यासन्नो
भिव्यक्ततरो योऽर्थः प्रत्ययांतेषु लक्ष्यते स आश्रीयत इति कैयटेनोक्तं। लौकिकं यल्लक्ष्यं तदर्थस्य प्रत्यासन्नः शा
स्त्रकल्पितत्वादिप्रकृतेरर्थः प्रत्ययांतेषु रूढत्वात् सुपाभिव्यक्ततरो लक्ष्यते बोधकैः सदृशमन्वयः। यत्तु प्रत्ययांत
विलसस्य कदाचित् विलसर्प इति तन्न। तावन्मात्रेणैकस्याप्यर्थाभिव्यक्तेरप्यभावेनाभिव्यक्ततरत्वस्य सुतरामभावात्।
अर्थवत्सूत्रेऽप्येवमेवेति अनुवृत्तिसामर्थ्यादित्यनेन सूचितमन्यथा तत्सामर्थ्यादित्येव वदेत्। पूर्वसूत्रे यादृशार्थवत्व
ग्रहोऽत्राप्यनुवृत्तिसामर्थ्यात्तादृशार्थस्यैव ग्रहः शास्त्रीयार्थग्रहणे तदनुवृत्तिर्व्यर्था स्यादिति तद्भावः। किंच पूर्वसूत्रे
सामान्यतोऽर्थवत्त्वग्रहणेन किंचित्कालं प्रत्यये ... वृत्तिमात्रे दानातिरिक्ते अतएव तद्धितग्रहणस्य नियमार्थत्वात् प्र
यणेन हस्वो नपुंसके प्रातिपदिकस्येत्यादिना काण्डे इत्यादौ हस्ववारणं स्त्रीलोभावे नवाभाष्ये तत्प्रत्याख्याने पंच
नावर्थे प्रत्यये इत्यादौ पंचनावेत्यस्यानेन न प्रातिपदिकसंज्ञा सूत्रेण प्रातिपदिकत्वेतु ङीवापत्तिः। एवं च प्रत्य
यस्य प्राप्तिरेवनेति केवलप्रत्ययपर्युदासो विफलः। दशदाडिमानि षडपूपा इत्यादि निरर्थकपदसमुदायव्या
वृत्तिरर्थवद्ग्रहणफलं तत्र हि सुपो धातुप्रातिपदिकयोरिति लुगापत्तिरिति भाष्यस्वरसमिति दिक्। पूर्वसूत्रेणेति। प्रत्ययग्रहणे
यस्मादिति प्रत्ययांतलाभावादिति ... संदर्शयितुमाह। पूर्वभाज

तमितितदर्थः। परिनिष्ठितत्वंचाप्रवृत्तनिमित्तविध्युद्देश्यतावच्छेदकानाक्रांतत्वं निहितोत्तिङंतादवव्याप्तिवारणाय। प्रवृत्ते
तिवैकल्पिके ङाग्मोद्देश्यतावच्छेदकाक्रांतत्वे स्वेसादावव्याप्तिवारणाय निमित्ते तीति दिक्। ङ्याप्प्रातिपदिकात्। समा
हारद्वंद्वः। ननु परश्चेत्यनेन प्रकृतेराक्षेपात्प्रातिपदिकाधिकारो व्यर्थः। तिङंतात्तु न द्वितीयादिः संख्याभावात्संख्याया
स्तिङोक्तत्वाच्च। आलम्भस्तु न तिङामपवादत्वात्। तस्येसोसमर्थविभक्तिनिर्देशात्तमुद्दिश्यैवेति ङ्श्चेतिज्ञापकाच्च न
त्वम्यस्तद्धितमात्रस्यर्थ इति चेन्न। तदभावे स्वार्थद्रव्यलिंगसंख्याकारकप्रयुक्तकार्यैः संस्कृतस्य बहिर्भूतापत्त्यादि
योगइतिकुत्सितइतिसूत्रभाष्योक्तन्यायेन तस्यापसमित्यादेस्तवं प्यपसमित्याद्यर्थेप्रयुक्तोच्चारितवोधात्प्रत्ययःस संदे
र्थस्यसत्वेन चसार्थकतद्धितानां सुवंतादुत्पत्त्यानुदात्तादेरित्यस्य प्राधान्यादुपस्थितसुवंतविशेषणत्वापत्तौ सर्वस्य
51 विकारः सार्वइत्यत्राञ्नापत्तेः सर्वस्य सुपीत्याद्युदात्तत्वात्। तदधिकारसामर्थ्यात्तु प्रातिपदिकस्यैव तद्विशेषणमिति न
दोषः। सर्वशब्दस्योंछादिपाठे नांतोदात्तत्वात्। स्पष्टं चेदमत्रभाष्ये न चांतरंगानपीति न्यायेन लुक्निमित्तप्रत्ययात्पू
र्वं माद्युदात्तत्वान प्राप्यात स्वसुवंतविशेषणत्वेपि न दोष इति वाच्यं। तेन न्यायेन धर्मिग्राहकमानादंतरंगनिमित्त
विनाशकलुक एव प्रावल्यवोधनेन दोषात्। सर्वस्य सुपी सत्रे सौवरीणां सप्तमीनां तदंतसप्तमीत्वात् प्रत्ययेपरतः
पूर्वकार्यत्वाभावेन न लुमते स्यस्याप्राप्तौ प्रत्ययलक्षणे न सुवंततया तस्यांतरंगनिमित्तविनाशकत्वाभावात्। अ
त एवसर्वस्तोमादिवहुव्रीहे राद्युदात्तत्वसिद्धिः। न चानुदात्तादिप्रकृतिकषष्ठ्यं तादित्यर्थे न न दोष इति वाच्यं। गर्गा
दिभ्य इत्यादौ सुवंतं प्रति गर्गादीनां विशेषणत्वासंभवाद्गणत्वालक्षणस्वीकारेपि प्रकृतेलक्षणायामानाभावात्। रामः
कांडांतादिति तु स्त्रेत्रेरखेति नियमार्थं तेन नद्धिकांडी रज्जुरित्यत्र न द्वौ वितस्तौ पचतीति पचेर्द्विवीभवनानुकूलो व्यापारोऽ
र्थः। अत्रोन्मानत्वादढकोत्तक। आचितः शाकटोभार इत्युक्तेराचितः परिमाणमिमेके। आचितो दशभारास्युरि
त्युक्तेरुआनमेतदिति एतदपि नियमार्थमित्यन्ये। प्रमाणे इति। षोडशहस्तप्रमाणादंडवाचक कांडशब्दस्यायाममात्रपरि
छेदकत्वेन प्रमाणत्वमिति भावः। उरुषामप्रमाणे। उरुषस्यो र्ध्वाधरदिगवस्थितवस्तुमात्रपरिछेदकत्वेनोन्मानत्वादुन्मा
नस्य चेद्धिलाद्रेरवेति नियमान्निषेधाप्राप्तानित्यं डीपि प्राप्ते किमर्थमिदं। अत्र परिमाणशब्दः परिछेदकमात्रपरोन
त्वायामपरिछेदवाची अत एव तस्य पुरुषविशेषणतानसंगता। जातिवचनस्यापि पुरुषशब्दस्य पंचारत्नि पुरुष इति
शुल्वसूत्रादत्र प्रमाण इति विशेषणं ह्यो कव्यवहाराच्च। परिछेदकवाचित्वमपि। द्विपुरुषीति द्वौ पुरुषौ प्रमाणमस्या
इत्यर्थे तदस्य परिमाणमिति प्रत्ययस्याध्यर्द्धेति लुकि उदाहरणं तत्र हि परमाण शब्दे नोत्तरसूत्रानुरोधात्परिछेदकमात्र
स्य ग्रहणमिति सिद्धांतः। ऊधसो समासांतो यं तत्र स्त्रियामित्युपसंख्यानादाह। स्त्रियामिति। बहुव्रीहौ सक्थ्यक्ष्णो रित्यतो
बहुव्रीहावित्यनुवर्त्तते ऊत्वाच्चास्यादेशत्वं। उपूडी न्निषेधेषिति। समासांतानामलोकिकेवाक्य एव प्रवृत्त्या पूर्वमनडो
षां प्राप्तिः। अनउपधालोपिन इत्यत्रैस्यानुवृत्त्या डीपो पिवाधः। एतेनमध्येपवादन्यायाद्डान्निषेधयोरिदं बाधक
मित्यपास्तमिति भावः। डीषिति। डीपि तु कुंडोधनशब्दे पूर्वपदप्रकृतिस्वरेण धकाराकारस्यानुदात्तत्वादुदात्तनिवृत्तिस्व
राप्राप्तांतोदात्तत्वं न सिद्ध्येत। कुंडमिवोधोयस्या इति विग्रहः। बहुव्रीहेः किं। ऊधः प्राप्ता प्राप्तोधाः प्राप्तापन्नेति समासः
अव्ययग्रहणाननुवृत्तेरिति। अस्वरितत्वादिति भावः। निहायनी द्विवर्षा गौरिति प्रायोवाद इत्येके। बालत्वस्य गोरित्यर्थः राम॰
११२

सर्वत्र। सर्वेषां मते इत्यर्थस्तदाह। नित्यमिति। प्राचामित्यस्यानिवृत्त्या नित्यत्वे सिद्धेपि प्राचां ष्फ इत्यस्य सर्वत्र ग्रहण
पक्षेण बाधकविषयेपि प्रवृत्त्यर्थं तत्। तेनावट्यायनीत्यत्रावट्याच्चेति चापं बाधित्वा प्राचां मते ष्फ एव प्रवर्तते गार्ग्या
दिच्चाप्यु। उदीचां मते प्राप्तङीप् बाधनेन चरितार्थः। सर्वत्रग्रहणं तद्बाधकत्वमेव चापो शर्द्वे शर्कंध्वादित्वात्पर
रूपं तेन शाकल्यायनत्वनंतरत्वष्फबाधकत्वं चापि कृते तु न ष्फप्राप्तिरतं इत्यधिकारात्। लोहितादिर्गर्गाद्यंतर्गणः
यद्यपि तत्र कतशकलशब्दौ इति पाठात् शकलस्य लोहितादिकण्वादि [illegible] बहिर्भूतत्वात् ष्फायोगेन ततः प्राप्नुत
स्तथापि कतंतेभ्यः कण्वादिभ्य इत्युभयत्रापि षष्ठीतत्पुरुषबहुव्रीह्योरेकशेषेण न दोषः। कतंतनी शाकल्यस्य
छात्राः शाकला इति च सिद्धं। टाप्ङीपोरिति कौरव्यशब्दे योपधप्रतिषेधाट्टाप् मांडूकशब्दे जातित्वान्ङीषिति भावः।
टाप्ङीपोरपवाद इति पाठस्तु प्रामादिकः। वयसि। प्राणिनां कालकृतावस्थाविशेषो वयः। वयसीत्यस्य वयोरूपे प्र
वृत्तिनिमित्ते इत्यर्थस्तदाह। प्रथमवयोवाचिन इति। तेनोत्तानशय्यादीन। प्रकरणादिना वयः प्रतीतावपि नायं तद्वा
चकः यापिप्याधादिवशाउत्तानाशेतेतस्या अपि प्रतीते। द्विवर्षेत्यादिरपि न वयोवाचीशास्त्रादावपि प्रयोगात्। कौ
मारयौवनस्थूलभेदास्त्रीणि वयांसि। आयुषस्तु तुर्यो भेदश्चत्वारि वा॥ अनीका समाहारे तद्धितार्थेति द्विगुः। अका
रांतोत्तरपदात् ङीलं। अपरिमाण। अत्र परिमाणशब्देन परिमाणं तु सर्वत इति पारिभाषिकमेव गृह्यते स्वर्णबिस्तो हे
मोऽस्त्रीकंबल्यमूर्णापलशतमिति कोशबलेन कस्मादपि न बिस्तकंबल्यग्रहणं तु उन्मा [illegible] नस्येचेद्बिस्तकंबल्ययोरेवेति निय
मार्थं तेन द्विनिष्का सिद्धा द्विवर्षे न तावदप्यांशातायां कीर्तितर्थे द्विवर्षी द्विशतातिर्यङ्मानेद्विहस्ताभित्तिरित्यादौ च निषेधः सिद्धः

ल॰श॰शे॰टी॰ योगाभावात्पूर्वेणाप्राप्तेः। स एवं त्वाभावो नैतदप्राप्तेरिति भावः उपचारादिति। पाणिग्रहणाश्रयादिति भावः। यद्वे
११३ ति। इदं प्रौढ्यातत्प्रकृतिकं कर्तृं किं पिंडमानाभावात्। पूर्वसूत्रे यज्ञसंयोगइतिवृषलस्य पतिः। स्त्रीति प्रयोसाधना
र्थं सपूर्वस्य किमिति। अवयववाची पूर्वशब्दः किमर्थइति प्रश्नः। गवांपतिरिति स्वामिनीत्यर्थः। निपात्यत इति तेन
चोदात्तसादेशस्यैव प्रवृत्तेः सपत्नीशब्दस्याद्युदात्तत्वमपि सिद्धं। किंच समानस्वामिकस्त्री विशेषस्यैव वृढ्या वो धनार्थे
ङीप्प्रकार विशिष्टोच्चारणं। अत एव समानस्वामिकदासीमुख्यादौ सपत्नीत्येव समानत्वं चैकस्यैव तत्र पत्नीसंबंधेन भ
दमारोप्य वोध्यं मुख्यसादृश्यवत्त्वाभावास्तु न तथा प्रयोगइष्यते त्रि सत्रीति व्याख्यानादिति भावः। संनियोगशिष्ट इति ते
113 न तदभावे ङीवापि नेति भावः मितांतानामित्यत्राकारउच्चारणार्थः। मितंतानामिति पाठे जरत्वाभावः सौत्रः। आरोप
तानीति। अत्रैतशब्दस्योपसर्जनत्वेन तदंतमनुपसर्जनमेवानुपसर्जनादित्यत्र तदंतविशेषणं। अत एव गृहरक्षिके
ता नारायणेनात्र बहुव्रीहिं कृत्वाऽनेन ङीबुक्तं तदनुसारेणाचष्टे। परेतु। उपमानेइति सूत्रस्य भाष्यस्वरस्यात्। टिड्ढाण
ञित्यादेरगृह्यमाणविशेषणस्य स्वस्य स्त्रीप्रत्ययत्वाज्ञापितत्वेवोचितं। तन्न हि शस्त्रीश्यामेत्यादौ श्यामाशब्दः शस्त्रीमिव उ
पमेयं तु समासवाच्यमिति पक्षे शस्त्रीश्यामो देवदत्त इत्यत्र ह्रस्वत्वं न सिध्यतीति। यद्युपसर्जनस्येति ह्रस्वत्वं तदा कुंभकपा
ललोहिनीत्यत्रानुपसर्जनलक्षण ईकारो न प्राप्नोतीत्युक्तं। आरोपसस्य त्रिषु स्थानेषु रघ्यसमर्थो बोध्य इत्याहुः आर्षे
मात्रणात्वं वर्णाः किं प्रकृतागतिरंत इत्याद्युदात्तः। अंतोदात्त इति। श्वेतो वाजी जायते इत्यादौ तथा पाठादिति भावः
हृदसिद्धमिति नादेशापवादस्तेन उत्सर्गसमानदेशा अपवादा इति न्यायात्तत्स्थानिकत्वं ङीप्संनियोगशिष्टत्वं चास्यैवो राम॰

११३

इत्यन्ये। नित्यसंज्ञा ननु संज्ञाशब्दा नियतानुपूर्विका अनादयश्छंदसि च दृष्टस्यैव विधानमिति ङीब्भावविशिष्टस्यात
त्रप्रयोगासंभावादन उपधेत्येव सिद्धे इदं व्यर्थमिति चेदुत्तरार्थत्वात्। योगविभागस्तु व्यर्थ एवेदं ध्वनयन्न लक्षणांतरसि
द्धमुदाहरति वेदे पंचदाम्नीति। क्वचित्तु शतमूर्ध्नीति पाठः। केवलमामक। अस्मच्छब्दादणि तवकममकावेकवचन इ
ति ममकादेशः। भागशब्दात्पुल्लिंगात्स्वार्थे भिक्षेये स्वार्थिकेषु लिंगातिवृत्तेरपि सत्वात्स्त्रीत्वे पापशब्दोर्शआद्यच्चात्तद्व
तिवर्त्तमानः स्त्रियां। अपरः पचगमिध्माघ्नादित्वादंतोदात्तः। उतापरं पान्द्विश्वाभित्यादौ उताप रीभ्यो मघवेत्यादौ चां
तोदात्तपाठात्। पूर्वमपश्चापरमित्यादौ यद्यमानमाद्युदात्तमपि वृषादित्वात्पराः पूर्वीमभ्येतीत्यादावजादिपाठादपि
आर्येण कृतेति प्राक्सवुत्पन्नः। समासे दंतत्वं भेषजशब्दोप्युक्तमनइति। औषधेरूढः। भिषज इदमिति अणि भैषजशब्दो
प्यत्र। सुमंगलीरियं वधूरिति तु मत्वर्थीयेद्प्रत्यये बोध्यं। प्रकृति [illegible] भागाविति। नुक्संनियोगेनेति भावः। मतुविति
वत्वं तु मादुपधाया इति सिद्धं यज्ञेन संबंध इति। स्त्रिया इत्यर्थः। संयोगपदं संबंधोपलक्षणं संबंधश्च यज्ञफलप्रति
योगिकैश्वर्यवत्वं तदाह। तत्कर्तृकेति। विभाषासहशब्दो विद्यमानवाची पूर्वशब्दो स्वत्ववाची व्याख्यानात्। तत्र केवलप
व४ तिशब्दस्य विद्यमानपूर्वार्थयैत्वासंभवाद्व्यभिचाराच्च पतिशब्देन तदंतग्रहणमित्याह। पतिशब्दांतस्य त्वादिन पत्युरि
ति। सपूर्वस्येत्यनेन पत्यंतस्य गृहमारालादिति भावः। बहवो वृषलपतयो यस्या इति कर्मधारयोत्तरपदबहुव्रीहौ वा
रणायेहार्थेप्यनुपसर्जनेपदसंबंधइत्यतो। बहुव्रीहौ नित्यमुपसर्जनोपलक्षणं। तेन पतिमतिक्रांता तिपत्नीत्यपि। व्यस्तेइ
तिं विभाषा सपूर्वस्येत्यत्र यज्ञसंयोग इति न संबध्यते। ग्रामकथं तु षजकस्य पत्नीति व्यस्ते एव प्रयोगात्। वृषलत्वेन यज्ञसं

ल०श०शे०भू० ति। गौणत्वेप्यपदकार्यत्वान्न वृद्धिरिति भावः। विधित्वानुरोधादौण एवास्य प्रवृत्तिः। वर्णस्त्रेदिति। तद्धि शिष्टस्त्रेदत्य
११४ र्थः। अन्यथा गुणोक्तोक्तादय पुंसि इत्युक्त्या ऽसंगतंस्यादिति बोध्यं। स्त्रे वर्णशब्दो ऽर्शआद्यजंतः कालान्येति। औ
र्यगुणयुक्तेत्यर्थः। नील्या अनिति। वृत्त्यनुसारेणेदम् प्रातिपदिकत्वादन्नूक्तिकडीषंतत्र विषये नीलशब्दस्य वत्त्रग्र
हणांनत्वस्य लाक्षणिकत्वात्। अनाच्छादनइति। नीलवर्णवती शाटीत्यर्थे नीलीति वारणाय चरितार्थं नील्या रक्ता
गौरित्यर्थे नीलेत्येवोचितमिति परे। मैथुनेच्छा शब्दो ऽर्शआद्यजंतं तद्वतीत्यर्थः। अन्यति। मैथुनादन्यपक्षवृत्तिकमेतल्ल
114 रवपतेस्तुकन्न्। शोणशब्दो वर्णवाची वर्णानांतरणात्याद्युदात्तः अन्यत इति सिद्धे विकल्पार्थमिदं। वोतो। अत्र
गुणवचनशब्देन समस्तकृदंततद्धितांतसर्वनामजातिसंख्यासंज्ञाशब्दातिरिक्तशब्दो गृह्यते। आकडारसूत्रभाष्यपर्या
लोचनया तादृशानामेव तत्संज्ञालाभात्। तत्र हि प्रातिपदिकमात्रस्य गुणवचनसंज्ञामत्वाग्रेतद्बाधकत्वेनेताः क्र
मेण पठिताः गुणवचनेत्वन्वर्थसंज्ञया गुणोपसर्जनगुणिवाचिकानामेव तादृशानां सा संज्ञेति न रूपादीनां ग्रहणं जा च५
तिपदेनाकृतिग्रहणाद्द्रव्यरत्नि जातिवाचिकानामेव तत्र ग्रहणात्। कठादिशाखानदध्येतृणांतद्धितांतत्वादेवमोरंतिः
एतत्सूत्रभाष्योक्तं सत्वे निविशतेये ति पृथग्जातिषु दृश्यते। आधेयश्चाक्रियाजश्च सो ऽसत्वप्रकृतिर्गुणइति लक्षणं
त्वेकदेशपुंक्तिर्वहुविशेषणानां च वैयर्थ्यात्। भाष्यकृताव्याख्यानाच्च तस्मादाकडारसूत्रोक्तमेव भाष्यसंमतमिति भाष्य
प्रदीपोद्योते निरूपितं। शुचिरिति। शुचेरोणादिकः। किद्दिन् उत इत्यस्याभावे पिरवत्तसंयोगोपधान्नेत्यतत्सामर्थ्यनात इ
त्यस्यात्रासंबंधः। उणादीनामव्युत्पन्नत्वात्कदिकारादित्यस्यात्राप्रवृत्तिरित्यभिमानः। शुक्लेति तु प्रत्युदाहरणमुचितं। त राम० ११५

धं। विशुद्धिवाचीति पाठे तत्परत्वनिमित्तक इत्यर्थः। अमत्वे सन्निधानाद्व्याख्यानाच्चेतोपधस्यैव प्रतियोगित्वेनान्व
यइत्याह। नोपधमिन्नादिति। वर्णात्किंस्विद्वा। आघुदात्तः नर्तकीति शिल्पिनि ष्वुन्। गौरशब्दो वर्णवाचप्यंतो
दात्तइतीहपाठः। अनडुहीति। आमनडुहः स्त्रियां वेति वचनात्पक्षे आम्। सूर्येति। सचेद्यइति। सूर्यादीनामंगाना
मुपधाया इति व्याख्याने सौरी बलाकेति न सिध्येत। सूर्यरोकादिगित्यगंतान्ङी पि अणंतमंगं न सूर्यशब्द इति तदसिद्धिः
वचनंतु सूरी कुंतीत्यत्र चरितार्थं। अणो लोपेणाभीयत्वेनासिद्धत्वात् निमित्तकालोपस्तु याभ्युत्वान्नासिद्ध इतियुक्ता कां ६
पधात्वमुपधाग्रहणादेवमाधिकारमतिमाणाभीयासिद्धत्वमितिबोध्यं। यग्रहणंतूत्तरार्थं ड्याबिति निर्देशात्सम्यगेवच
नाग्रहणं। नक्षत्रस्यीति। नक्षत्रवाचकाद्याण् नत्वेत्यर्थः। तेनतिष्येणयुक्ते तैष्यमहःक्षिप्रभवत्तैषइत्यादिसिद्धं। मातरि
षिच्चेति पितामहीसिद्ध्यर्थमिदं। दंष्ट्रेति। दंशेर्दाम्नीशसेति करणेष्ट्रन्। अयमजादि षुपठ्यते गौरादिषु मातामहीश
ब्दपाठोनार्षइत्यन्ये। जानपदीति जनपदे न स्यर्थे उत्सादित्वादञ्। डण्णाघुदात्तत्वप्रसंगेनोदात्तार्थं वचनं। वृत्तिरनुष्ठद्या उ ६
जीविका। अप्रत्यय इति। तथाच क्रियाशब्दोयमिति भावः। अमत्रे। कमंडलुरूपे। कुंडी कमंडलौ जारात्पतिवत्नीसुतेपुमा
नितिमेदिनीकोशात् सत्तत्र नित्यस्त्रीलिंग इति भावः। यदित्तु पिठरेतुन नाकुंडमिति विश्वकोशेन तस्य नपुंसकत्वमप्यु
क्तं। पिठरामत्रशब्दौ च पर्यायौ पिठरं स्थाल्युखा कुंडमित्यमरेण नपुंसकत्वमात्रोक्तिः त्वत्पुमानुवादइत्युच्यते तदानेक
विधसंस्थानेषु अमत्रेषु कुंडव्यवहारेण कुंडत्वे जातित्वाभावादप्राप्ते ङीषिति बोध्यं। स्त्रीविषयत्वादित्युपलक्षणमि स्त्रि २
तिवक्तुः। कमंडलुसंस्थानस्यानुगतत्वात्तद्रूपमात्रवाचिनो जातित्वमप्यस्ति तु नियमार्थमेव। अमत्रे जारजा
यां कुंडेत्येवेत्यपरे। आवपनं च [illegible] आवपनमिति। सामान्येन पुंसकं। गुणयोगादि

सि॰शे॰पू॰
११५

यथा कथंचित्कारकग्रहणेपि कथंचित्कारकत्वमादाय गतिकारकोपपदानामित्यस्य प्रवृत्तेरन्तत्वभाष्यात्। उपपदम
तिङिति सूत्रभाष्याच्चलाभात्। यद्वा। तन्निषेधस्यानित्यत्वात्प्रवृत्तौ कारकषष्ठ्याः सुबुत्पत्तेः पूर्वं समासेन तत्रापीत्वं सु
लभं। सूर्येति। सर्त्तेः क्यप्याद्युदात्तः सूर्यशब्दः आप्यंतोदात्तमिदं। एतेन ङीन्निषेधेन टापेव सिद्धिरिति निरस्तम्। सूरीति। सूर्य
स्त्री या कुंती यं मानुषीनदेवतेत्यर्थः। महत्त्वे इति। नद्योगएवैषां स्त्रीत्वमिति भावः। यवनाल्लिप्यामिति। लिप्यर्थको ऽत्र ङी
ष्टतस्येदमित्यण्बाधक इति बहवः। लिपिरक्षरविन्यासः। मातुलेति। मातुलान्नित्यं प्राप्ते ऽउपाध्यायादप्राप्ते विभाषेयं
यानुक्तस्यमेवेति। अपादाने स्त्रियाघञ्उपसंख्यानं तदंताच्चवा ङीषिति स्त्रीयेऽउ श्रीति सूत्रेवार्त्तिकादिति भावः। उपेत्या
धीयते यस्मादिति विग्रहः। अर्येति। ह्रस्वादित्त्वदाह। स्वामिनीति १ अर्यः स्वामिवैश्ययोरित्युक्तेः। आर्येति पाठस्तु कै
यटाघसंमतः। स्वार्थ इति। अतएव भाष्ये यवनानी अर्ये त्यनेनोक्तं। पुंयोगएवमत्र कोतु उपाध्यायीतिवदर्यी तिपञ्चे ङीषमे
वोदाहरेत्। कर्मण्यण् इति सूत्रं लिंदीत्यादिस्वारस्यं पर्थमिति भावः। क्रीतात्करणात्करणादिति वक्तव्ये पूर्वग्रहणादनुव
र्त्तमप्रातिपदिकरूपान्यपदार्थेऽवयवत्वे पूर्वशब्देन बहुव्रीहिः। तेनवस्त्रेणक्रीतेति वाक्ये न। अत इति चानुवर्त्तते करु
णाकिंसुक्रीतेति धनक्रीतेति कर्त्तृकरणे इत्यत्र बहुलग्रहणेन गतिकारकोपपादानामित्यस्यानित्यत्वात्सुबुत्पत्तेः
मेव समास इति भावः। इत्युपपदमिति सूत्रे कैयटस्पष्टं। अपमज्जादिषु इत्यन्ये। गतीत्यादेरनित्यत्वनमानमिति तदाशयः
अतएवैतत्कर्त्तृकरणे इति सूत्रे बहुलग्रहणफलत्वेन भाष्येनोक्तम्। अंबावेति सूत्रे गवादिग्रहणं तु नियमार्थं तेन हरिद्यादि
ष्यादोषत्वंनेति दिक्। अश्वलिप्तीति। क्रुद्ग्रहणे गतिकारकपूर्वस्यापीति विशिष्टस्य क्तांतत्वं। अल्पाख्यायामिति समुदायोपा
धिः। अल्पत्वं करणगतं वा। क्तांतादिति। क्तांतांतादित्यर्थः। प्रत्ययग्रहणपरिभाषया लब्धक्तांतेन प्रातिपदिकस्य विशेष रामः
११५

परः किं वधूः । कास्तः वधूः स्नुषा नवोढा स्त्री कान्ता विकल्पवाचित्वादिति केशवलेन नवोढात्वस्य विकल
वात् त्वस्य च प्रवृत्तिनिमित्तत्वेन स्वरूपशब्दवद्गुणवचनत्वात् । पतिवदिति । पतिलाभोत्कण्ठावतीत्यर्थः । वह्वादेः
वहुशब्दस्योकारीत्या गुणवचनत्वाभावेन ग्रहणम् । कृदिकारादिति । सर्वत इति गणसूत्रम् । अक्तिनोपीत्यर्थः । अवस्थि
तविभाषाश्रयणात्क्वचिन्न सुगंधिः प्रियकृतिरेव तादीतिवृत्तिः । पुराणशब्दोत्र पठ्यते स पद्यपि अयं पंथा
नुचितः पुराण इत्यादावंतोदात्तदर्शनेन घृतादिपाठादंतोदात्त इत्युदात्तनिवृत्तिस्वरेण ततो ङीपुङीषोः स्वरे विशेषा
भावस्तथाप्यत्र पाठस्य सामर्थ्यात् [illegible] चेदेवेति बोध्यं । अजननिरिति आक्रोशे नञ्यनिरिति जननेरनिः । अह्नश
ब्दोत्र पठ्यते सामर्थ्यादुपसर्जनाधिकारबाधः । दीर्घाह्नी शरदिति ङीष्यंतोदात्तं वह्वादिराकृतिगण इति । जराद्यन्त्क
त । पुंयोगात् । हेतौ पंचमी । आख्यायामिति पंचम्यर्थे सप्तमी । आख्याशब्दो वाचकपरः । आख्या चोपस्थितत्वात्पुंस
एव न स्त्रियाः स्त्रियां वर्तमानस्य [illegible] आख्यत्वाव्यभिचारादाख्यापदवैयर्थ्यापत्तेः । पुंस्येव यः प्रसिद्धः शब्द इत्यर्थः । पुंयो
गाइति प्रवृत्तिनिमित्तारोपेण स्त्रियां वर्तमानात्पुंबोधकाच्छब्दान्ङीषित्यर्थः । योगः संबंधः । पुंयोगात्किं देवदत्ता ।
आख्यायां किं प्रसूतां गर्भे हि स्त्रियां वर्तमानं यत्प्रातिपदिकं पुंयोगहेतुकप्रवृत्तिनिमित्तकमित्यर्थोपि संभाव्येत । अ
स्ति हि तत्र प्रवृत्तिनिमित्ते प्रसवे पुंयोगहेतुकत्वं उक्तपुमाख्यानुनेषेति भवः । पुंयोगेत्र दांपत्यरूप एवेति भाष्यस्वरसः ।
यथेयं महीपापकृतान्बंधादीन्लभते एवं तत्रूपमपीति भाष्यात् । देवकीत्यादि तु गौरादिषु बोध्यमिति केचित् । गो
पालिकेति । गाः पालयतीति गोपालः स एव गोपालकः तस्य पत्नीत्यर्थः । एवं च तस्य तु कारकषष्ठ्यासमासनिषेधाच्छे
षषष्ठ्यासमासे आपः सुपः परत्वादिकं [illegible] कारकत्वोत्सर्गमते एवं भवतत्रापि समासः

ङीप्राणिस्थत्वाभावात्स्वलिङ्गस्योना सिद्धिः। एवं चेदं स्वलिङ्गस्योप्राणिस्थत्वमुपलक्षणमित्यत्र तात्पर्यग्राहकमिति भावः
न०श०शे०९ प्रतिमादिगतस्तनस्य प्राणिनिकरायद्रष्टत्वादाह। नन्वेवमिति। अप्राणिनोपिस्वांगं यदि तेन तज्जातीयेन वस्तुना प्राणी
११६ षु यथा संबद्धं तथाप्राणीसंबद्धस्त्वेदिस्मर्थः। अत एव तस्य चेत्तथायुक्तमित्यस्याप्राणिनोपिस्वांगमिति शेषे भाष्ये दर्शितः। पु
रस्तादिति। सद्यनंतरस्यैव बाधकः मध्ये इति स हि पूर्वस्यैव बाधकः। प्रामाणिकाइति। एवं च सुगात्रीत्याद्योपप्रयो
गा एवेति भावः। उरः क्रोडेति। टावंतोयं। स्वभावतो विशेषविषयः। शूर्पणखेति। पूर्वपदात्संज्ञायामिति णत्वं। केवलयो
226 गिकत्वे तु शूर्पनखीत्येव। नङ्कीविति अस्वरितत्वादिति भावः। इति सार्द्ध इति। एवं च भाषायामिति मध्ये छंदसीत्यस्य दिङ्
पूर्वपदादित्यत्रासंबंधेनास्वरितत्वाद [illegible] संबंधसिद्धेः
च८ परेतु दिगिति सूत्रे वाहइत्यस्य छंदसीति वर्त्तते। लोके त्वंतोदात्तमेव। प्राङ्मुखीति। एवं च तन्निवृत्तिबोधनाय विभाषाग्रह
णं। इति स्वार्थे तेन छंदस्यपि। अत एव ऊ रामृ इति सूत्रे कैयटे सख्यशिश्वीति भाषायामिति पाठो दृश्यते इत्याहुः। कश्चिदि
ति। सर्वविधीनां छंदसि वैकल्पिकत्वेन सख्यासपत्नीभवतीति सिद्धांतविघतरि शुरस्या इत्यशिश्वी केचिदस्याद्युदात्तत्वं तु छं
दस्त्वात्। जातिशब्देनार्थकीर्तिसंभवात् वाचकग्रहणमित्याह। जातिवाचीति। अनन्यभाविविषयशब्द इत्याह। न च
स्त्रियां नियतमिति भिन्नेष्वभिन्नाभिधानप्रत्ययनिमित्तं। जातिर्नित्यमेकमनेकानुगतं सामान्यमित्यस्य च शुक्लादि
ल३ णास्यैकत्वनित्यत्वपक्षेतत्रातिव्याप्तिर्जनिनेन प्राप्यते सा जातिरिति च। युवत्यादावव्याप्तमत आह। आकृतिग्रहणमि
ति। करणेल्युट्। सामान्येन नपुंसकं। आकृतिरवयवसंनिवेशः। आकृतिर्ग्रहणं यस्या इति विग्रहस्तदाह। अनुगतेति राम०
इहशाकारीगोरित्याकृतयदृशादिमापसार्थीः। न च ब्राह्मणत्वादिदाभेदभिन्नानेकदेहवृत्तित्वादिवतत्त्वात्साकृतिर्व्यंगेत्यन ११६

णात्। आहिते त्वीति। जातिकालसुखादिभ्यः परा निष्ठेति भिन्नशब्दस्य परनिपातः। पाणिगृहीतीति। अग्निसाक्षि-
कतया गृहीतपाणिकेत्यर्थः। भाष्ये तु पाणिगृहीत्यादीनां विशेष उक्तः। अस्वाङ्गपूर्वेन स्वाङ्गमस्वाङ्गं पूर्वं च तत्पदं च पूर्वप-
दं पुनः कर्मधारयः। अस्वाङ्गभूतात्पूर्वपदात्परं यत्क्तान्तं तदन्त बहुव्रीहेरित्यर्थः। उत्तरसूत्रे भाष्ये कल्याणपाणिपादेत्या-
दौ तत्प्रवृत्तिवारणाय तत्रैतदनुवर्त्य कर्मधारयस्याश्रयणेना त्रापि तथैवोचितमात्। तत्र यदुपसर्जनं पाणिपादमिति स-
मुदाययोर्न स्वाङ्गं स्वाङ्गसमुदायस्य न स्वाङ्गशब्देन गृह्यते। यत्तु स्वाङ्गं पादेति न तत्स्वाङ्गं तु पूर्वपदात्परमित्युक्तं। भाष्येऽ-
पं च करमुखी त्यादयस्या ध्येव। जातिपूर्वादित्यापि संबध्यते। ऽन्यथा बहुनञादीनामस्वाङ्गत्वेन विकल्पस्य तत्पूर्वके दुर्वारत्वा-
त्तदाह। नित्यप्राप्तेरिति। बहुलग्रहणेनेति। बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरे शेषनिघातेनानुदात्तोयं पुत्रादिनीत्यादौ सुप्यजा-
ताविति निदर्शनेनाकृतिग्रहणत्वाद्य भावेन च पुत्रशब्दस्य जातिवचनत्वाभावे पि पुत्रहतीत्यादौ गौरादिङीषिति बोध्यं
अस्वाङ्गादित्येव सिद्धे पूर्वपदग्रहणं स्पष्टार्थं। किंच। तदभावे स्वाङ्गादिति प्राधान्या बहुव्रीहि विशेषणं स्यादिति। स्वाङ्गा-
च्चोतदन्तादित्युपसर्जनग्रहणं लब्धं। बहुव्रीहिरित्यनुवर्तमाने उपसर्जनग्रहणफलमाह। अतिकेशीति। एकविभक्ती
ति केशानामुपसर्जनत्वमप्रधानत्वं च। शिखेति। इदमेव प्रत्युदाहरणं शोभनेत्यादि सुशिखान्तप्रसिद्धेः। विशिष्टं त-
त्वाभावेनाप्राप्तिः। यदपि भाष्येऽशिखेति प्रत्युदाहृतं तस्याप्यकेशशब्दवत्तात्पर्यं। नञ्पूर्वे सहनञिति निषेधेन प्राप्त्य-
भावात्। एतेन क्रोडादिषु शिखाशब्दपाठ इत्यपास्तं। ननु स्वमङ्गं स्वाङ्गं चेत्सुमुखा शालेत्यत्रापि स्यात् मुखस्य शालाङ्गत्वा-
त्सुकेशी रथ्येत्यत्र च न स्यात्। केशानां तदङ्गत्वाभावात्तत्राह। अद्रवमिति। स्पर्शवद्द्रव्यपरिमाणं मूर्तिः। रथ्येति। इ-

ग्लुचुकायनीभार्ये दोषः। इत्येको गोत्रसूत्रस्थभाष्ये युवापत्यस्य जातित्वाभावकथनं संगच्छते। अन्यथा जातिलक्षण
ल॰श॰शे॰पू॰ ङीषस्तत्परत्वादुक्तयुक्त्या पुंवत्त्वप्रतिषेधो न प्राप्नोतीत्यसंगतिः स्पष्टैव ग्लुचुकायनीभार्ये दोषस्तु ङीष्पुंवत्त्वप्रतिषे
११७ धयोरसिद्धित्वस्याबोध्यः सर्वतोक्तिन्नर्थादिति ङीषि तु पुंवत्त्वप्रतिषेधासिद्धिरेव दोषः। अत एव ब्राह्मणजाती
नितिसूत्रे पत्ये जातौ नेत्यर्थः संगच्छते। तच्चापत्यस्य जातित्वाव्यभिचारात्तदसंगतिर्ब्राह्मणो नारद इत्यसिद्धिरतः या
मर्थेनात्र शास्त्रीयगोत्रस्यैव ग्रहीतुमौचित्यं। अनंतरापत्यप्रत्ययान्ते वंतीत्यत्र जातिप्रयुक्ते ङीषि त्वनुपसर्जनादिति
227 सूत्रभाष्ये त्वनंतरे स्वस्याभिद्धारणाय निवर्द्धेत्र त्वारोप इत्यभिप्रायेण पूर्नित्तु न शास्त्रीयगोत्रत्वारोपस्तत्र युवेव न गोत्र
मितिनियमेन तत्संज्ञानिषेधात्तदाह। अपत्यप्रत्ययांत इति। अपत्यं पौत्रप्रभृतीति परिभाषित इति शेषः। शाखाव
ध्येत्रिति। षष्ठीतत्पुरुषः शाखायामस्त्री विषयत्वाभावात्। जातिकार्यं लभत इति। अनेन स्यातिदेशत्वं बोध्यति क
ठेन प्रोक्तमधीत इति। वैशंपायनांतेवासित्वात्प्रोक्तार्थणिनेः कठचरकादिति लुक्। अध्येतारः प्रोक्ताल्लुक्। व
ह्वृचो ध्येतव्यायस्या इति विग्रहे अनकारित्यसमासांतः। स्त्रिया अध्ययनाभावपि तद्रूपत्वात्प्रवृत्तं यथा न धी
यानेमाणवके। ब्राह्मणीत्यत्रापत्ये णिब्राह्मो जातावित्यत्र के टिलोपाभावः। परे तु। आकृतिग्रहणेत्येव लक्षण
माकृतिपदस्य पदेशोपलक्षणमाकृतिद्वारा साक्षाद्वोपदेशेन ग्राह्या जातिरित्यर्थः। तत्र दृशाकारा गौरित्याकृ
त्युपदेशग्राह्या गोत्वादिजातिः। अयं ब्राह्मण इति साक्षादुपदेशग्राह्या ब्राह्मणत्वादिजातिः। यदाकृतिग्रहणं
जातिग्राहकोपदेशस्याप्युपलक्षणं लिंगानां च न सर्वभागिति तत्स्वरूपानुवादं तेन स्युल्लादिगुणानामेकत्वेपि
जातित्वाभावो बोधितः। अत एव विशेषणानां चेति सूत्रे जातिरविशिष्टलिंगत्वं भाष्योक्तं अविशिष्टलिंगत्वं राम॰ २१

तत्रातिव्याप्तमिदमिति वाच्यं । समानकालिकानेकव्यक्तिवृत्त्यनुगतसंस्थानव्यंग्यत्वे तात्पर्यात् । अवस्थाभेदेपि तद्बुद्ध
प्रतीतेश्च स एवायमिति प्रतीतेश्च तज्जातीयोयमिति प्रतीतेश्च । अत एव वृद्धत्वादिकं न जातिः । पंचेंद्रोपाख्याना
दिभिरनेकेषां समकालिकत्वेपि सर्वेषां संस्थानस्यैकत्वे मानाभावात् । दुर्गापरेत्यादौ स्त्रीविषयत्वादपि न ङीष्
। तटीति । अनुगतसंस्थानव्यंग्यमेतत् । जलसमीपविशिष्टदेशो हि तटं । नन्वेवं वृषलत्वादीनां जातित्वं न स्यात् ।
अवयवसंस्थानस्य ब्राह्मणादिसाधारण्येन तस्या आकृतिग्रहणत्वाभावात् । किंतु साक्षादुपदेशगम्यास इत्यत आ
ह । लिंगानामिति । इयमपि जातिरित्यर्थः । लिंगानामिति कर्मणि षष्ठी सर्वाणि लिंगानि न भजंतीति सर्वशब्द
स्य लिंगपरत्वेपि भाष्यप्रामाण्याज्जोरिवः समासश्च आख्यातमाख्यानमुपदेशः । कथनादुपदेशात् एक
स्मिंदृष्ट्युपदिष्टे अन्यत्र तदूहे मानाभावान्नेंद्रत्वादिस्तथा ब्राह्मणत्वं तु एकत्रोपदिष्टं पित्रादिदृष्ट्या ग्रहं वृषलत्वं तदप
त्यतत्सहोदरादौ सुग्रहं । आकृतिग्रहणेति नित्यानित्यसाधारणमिति युवत्वादिकमपि जातिरेतन्मते । अपर
आह । इत्यादिना अयावद्द्रव्यभावित्वमित्यंशान्तरं लक्षणान्तरं भाष्ये दर्शितं । एवं च भिन्नकर्तृकैके लक्षणद्वय
निस ६ प्रामाण्येन कुमारादिशब्द जातिकार्यविकल्पः । अत एव युवजातिरित्यत्र पुंवत्त्वं स्थितमिति रत्न तदभावश्च भाष्ये उदा
हृतः । नन्वेतां भामेप्यौपगवीकठीत्यादेः संग्रहो नुगतसंस्थानव्यंग्यत्वाभावात्सर्वलिंगत्वाच्चेत्यत आह । गोत्रं चे
मित्यनुप ति । शास्त्रीयमत्र गोत्रमतः एकगोत्राधिप्रत्ययो भवति स्त्रियां तु गोत्रे माभूदौपगवीत्यादावित्युक्तेन्यत्रोपसर्जनानुप
सर्जन २ सर्जनेति लक्षणे इकारेण माभाषीति माभूदेव ग्रामणीतादनुपसर्जनादिति एवं भविष्यति यो ब्याह्रेव पद्धिणेकेन दगीकसेव
उहतस्यौपगवभार्यः । जातिलक्षणः पंचत्वप्रतिषेधेन प्राप्नोति माभूदेवं वृद्धिनिमित्तस्यैव भविष्यति । एवं तर्हि

मपि योगिकेर्थे लिंगांतरसंभवेन पूर्वेण सिद्धत्वेद्वयथार्थ्यं स्पष्टमेव। पाककर्णी। जातिवाचिन इति किं बहुपुष्पा शाखा। स्त्रीविषयाद

पीति। अजात्यर्थं तु न। प्राक्पुष्पादिषु जातिवचनेषु नित्यस्त्रीलिंगेषु सदक्कांडेत्यादिनिषेधात्। योपधादपीति। पुनर्जातिग्र
हणादिति भावः। अस्त्रीविषयादिति तु पूर्वसूत्रेण विच्छिन्नं। तिन्निदिं स्त्रीपुंसयोरपत्यांताद्विचतुः षट्पदोरगाइत्यमराद्यं द्वि
यामपीति भावः। इतः किं दरत्। ध्यञ्मधोत्परेगातस्त्रितिलुक्। ऊङुतः। उकारांतोऽधातोरिति विशेषणार्थः। अन्यथा। य
वाग्वेत्यादावपि निषेधः स्यात्। दीर्घोच्चारणं प्रश्लेषेण कारद्वयविधानद्वारा असवर्णद्वित्यादिबहुव्रीहौ परकपूर्निवृत्त्यर्थं
रूपाणां सवर्णदीर्घेण सिद्धेरिति भाष्यस्यार्थः। श्वश्रूरिति तु श्वशुरः श्वश्र्वेति निर्देशात्सिद्धं। कुरुरिति। एकादेशात्पूर्वां

तत्वात्स्वाद्यः। अध्वर्युरिति। अध्वर्युशाखाध्यायि वंशोद्भवेत्यर्थः। रज्ज्वादीति। उत इतितु नेह संबध्यते अलाबुरिति
भाष्योदाहरणादिति भावः। कृकवाकुरित्यत्र मनुष्यजातित्वाभावात्पूर्वेणापि न। पंगोश्च। पंगुशब्दो गुणवाचीति पूर्वेण
प्राप्तिः श्वशुरस्येति। श्वसेति निर्देशादस्याकारस्य लोपः। तन्निर्देशसिद्धमेवैतत्। भाष्येत्विदं न दृश्यते ऊङ्आवितिसूत्र
स्य भाष्यस्वरसस्त्वयमनूङंतोऽव्युत्पन्नं प्रातिपदिकमिति उक्तं। उपमीयते नयेत्तदुपमा उपमानं तद्भावः औपम्यमुपमान
त्वं। एवं च तद्बोधकोत्तरपदादित्यर्थः। उत्तरपदोस्मिन्पूर्वपदं प्रत्यासत्त्योपमानवाच्येव। अतः करभोपमोरुरित्यत्र
न तदाहोपमानवाचीति। करभेति। मणिबंधादाकनिष्ठं करस्य बहिर्भागः करभस्तद्वदूरू यस्या इत्यर्थः। उपचा
रादिति। शफशब्दप्रवृत्तिनिमित्तस्योत्तरपदार्थे आरोपादित्यर्थः। एवं च समासस्योपमानोपमेयभावबोधकत्वेन न पूर्व
मित्त २ सूत्रप्राप्तिस्तदारोपे च सर्वं निमित्यन्यदिति भावः। ननु सहशब्दग्रहणं व्यर्थं सविस्योऽस्त्वेन सहशब्दप्रयोगस्य तत्समभि
व्याहारे व्यर्थत्वे सहोरुरिति प्रयोगस्यैवाभावा दित्यत आह। सहितेति। रीतिक्रममिति शेषः। सह विद्यमानावूरू यस्या इ राम॰

नियतलिंगत्वमिति कैयटः । तच्च प्रायिकमिति केचित् भाष्यप्रामाण्यात् जातेरेकशब्दवाच्याया नवि लिंगता तटं त्रिषि
स्यादि कोशकृतां प्रमाद इत्यन्ये । सकृदाख्यातनिर्ग्राह्येत्यनेनैकत्वमनेकानुगतत्वं च बोधितं । सकृदेकवारं क्वचिद्व्य
क्तौ साक्षात्कृतिद्वारा वोपदिष्टा व्यक्त्यंतरे गृहीतुं शक्येति तदर्थः । गोत्वं चेत्यादि प्राग्वदेव । अत एव प्रादुर्भाववि
नाशाभ्यां सत्वस्य युगपद्गुणैः । असर्वलिंगां च बह्वर्थां तां जातिं कवयो विदुरिति लक्षणांतरं भाष्य उक्तं । सत्वस्य द्र
व्यस्य प्रादुर्भावविनाशाभ्यां यातो प्राप्नोति सा जातिरिति लक्षणं यावद्द्रव्यभाविनीति तदर्थः । अनेन गोत्वब्राह्मण
त्वादीनामुभयोरपि संग्रहः । गुणैर्युगपद्योगः संबध्यते यया निर्गुणस्य द्रव्यस्यानोपलंभेऽस्तत्पा जातिरहितस्यापीत्य मेव दे
र्थ इति कैयटः । इदं स्वरूपकथनमेव अत्र लक्षणे सर्वलिंगानामित्येतन्मद्युकार्येणानुलक्षणांतरमनुपयोगा
द्बह्वर्थां सर्वव्यक्तिव्यापिनीमित्यर्थः । एतदेकवाक्यतया पूर्वलक्षणेऽपि मद्युक्त्या रीत्यैव चोचिता । अत एव कः पुन
रेतयोर्जातिलक्षणयोर्विशेषः । यथा पूर्वलक्षणेन यथा कुमारी भार्य इति भवितव्यं यथोत्तरं तथा कुमारभार्य
इति भाष्ये लक्षणभिन्नैकवचनमेव प्रयुक्तं । अत एवाडास्से शेषे आकृतिग्रहणा जातिरित्येवोक्तं भाष्ये इ
त्याहुः बलाकेति । अयं च बिशकंठिकापदवाच्यजातिविशेषवाची स्त्रीत्व एव कल्प्यान्योवेस्पन्यत । अस्त्रीवि
षया [illegible] दित्यस्य प्रवृत्तिनिमित्तेको लिंगांतररहितभिन्ना इत्यर्थः । एतेन बलाकायतीति यौगिकस्य सर्वलिंगत्वा
द्बलाकाबकपंक्तिः स्याद्बलाका बिसकंठिका बलाका कामुकी प्रोक्ता बलाकश्च बकोमत इति कोशपुल्लिंग
स्यापि [illegible] भिधानाच्चनेदं युक्तमित्यपास्तं अत एव पाककर्णेति सूत्रं च चरितार्थं तद्धि स्त्रीविषयार्थमन्यथा तेषां

ल०श०शे०पू० ११९ तस्यादीनामर्थविशेषेतुरवस्यां दर्शयितुमाह । प्रातिपदिकार्थेति । इदमपिसूत्रं त्रियायोगएवप्रवर्त्तते ततोस्ति क्रिया
याः सर्वत्रसत्वात् आख्यातार्थकर्त्रादीनांभेदान्वयेनतद्वारकः क्रियायोगोबोध्यः । प्रथमांतार्थस्यापि क्रियाजनक
त्वादस्याः कारकविभक्तित्वेनभाष्येव्यवहारः । ननु कुम्भादिशब्देषु लिंगस्यापिप्रातिपदिकार्थत्वाल्लिंगग्रहणमन
र्थकमतआह । नियतेति । यस्मिन्प्रातिपदिकेउच्चरितेयस्यार्थस्यनियमेनोपस्थितिः सतदर्थइत्यर्थः । अन्वयानुपपत्ति
पूर्विकालक्षणापदेएवप्रत्ययोत्पत्तिः सर्वत्रशक्यार्थएवशक्यतावच्छेदकारोपएवचलक्षणेतिनलक्ष्यासंग्रहोदोषः
223 तदादिशब्दानांतत्तत्प्रत्ययसमभिव्याहारेसकललिंगबोधकतयानकिमपिलिंगंततोनियतोपस्थितकमितिनतद्बो
ध्यलिंगस्यात्रप्रातिपदिकार्थशब्देनग्रहणमितिलिंगग्रहणमितिभावः । लिंगमात्रेति । लिंगस्येवाधिक्ये इतिक्र
मेणार्थः । यद्यपिविशेष्यविशेषणभावोप्यधिकोभासते तथापितस्यवाक्यार्थत्वेनबहिरंगतयानत्वार्थमात्रनिमि
त्तकप्रथमप्रवृत्तसंस्कारबोधकत्वमितिबोध्यं । अभेदेनसंसर्गेणेति । इतरसंबंधानवच्छिन्नविशेषणविशेष्यभावसं
सर्गेणेत्यर्थः । अभेदस्तुनसंसर्गइत्यन्यत्रप्रपंचितं । इहोक्तार्थत्वादिति । उक्तार्थानामप्रयोगात् प्रातिपदिकप्रतिपादित
संख्याविशिष्टेसंख्यांतराभावाच्चतदप्राप्तिः । अनन्वितार्थकविभक्त्यपेक्षयानुवादकविभक्तेरेवन्याय्यत्वान्नघादिभ्यः घा४
सर्वविभक्त्यापत्तिरितिभावः । लिंगविशिष्टपरिभाषयेंद्राणीत्यादौप्रथमासिद्धिः । परिमाणशब्दस्त्रपरिच्छेदकपरइति
उन्मानादिष्वपिप्रतिमासिद्धिरितिबोध्यं । परेतु । अत्रसूत्रेप्रातिपदिकार्थशब्देनप्रवृत्तिनिमित्तंतदाश्रयश्च । सचमुख्य
इकारोपितत्तदाश्रयोपि अतएवगोपीत्यादौस्वादिप्रवृत्तौलाक्षणिकत्वेपिनदोषः । अतएवलिंगग्रहणंसामर्थकम् राम०
११९

त्यर्थः। इतिकैयटः। अतिरमणीयाक्षित्यर्थ इतितदाशयः कमलानिकमलानीतिवत्। कद्रूरिति। नागमातुः संज्ञा अहंदोर्घि
मिति छंदसिकद्रुकमंडल्वोश्छंदसीत्यनेनचसिद्धेरितिभावः॥ अजाद्य इति। शार्ङ्गरवादीतिलुप्तपंचम्यंतं अन्त इतिच ष
ष्ठी अनुपसर्जनादितिविभक्तिपरिणामेनास्यविशेषणं एवं डिद्धे तत्रापिसुवचं तद् अत्रपंचम्यंतत्वमपिसुवचं। अजैकार ज्यो ३
इत्यपिपाठः क्वचिच्छार्ङ्गरवाजातिलक्षणेङीपिप्राप्तेवचनं। अणपादिरुधयोर्गोणोपुत्रशब्दोत्रपठ्यते तस्यपाठसामर्थ्या
ज्जातित्वाभावेपिङीन्। नृनरयोरिति। यद्यपिनारीतिनरशब्देनसिद्धं। नरीतितुपुंयोगेङीषादुर्वारं जातिग्रहणानुवृत्त्या
त्रास्याप्रवृत्तेरितिनरग्रहणंव्यर्थं तथापिनरत्वजातिमात्रप्रतिपादयिषायां नरीतिमाभूदित्यर्थं तद्ग्रहणं। अत्राद्याकार
स्येनवृद्धिर्लक्ष्यानुसारि व्याख्यानात्। वस्तुतइदंगणसूत्रमनार्षंनुर्नरस्यचधर्म्यानारीति अतोऽन्निसूत्रेणनरस्य
चेतिवक्तव्यमितिवार्तिकेनचाद्युदात्तनार्याः सिद्धेः। रूढ्यायोगपनयातद्धर्मेनरत्वजातिविशिष्टैवबुध्यते अतएववसे मी ७
स्तव्यत्कर्त्तरि णिच्चेतिवचनंवास्तुभिभवोवास्तव्य इतिदिगादित्वात्संसाध्यप्रत्याख्यातंभाष्ये नित्यानांशब्दानां यथाकथं
चिदन्वाख्यानंकार्यमितिकैयटः। रूढ्यासर्व दोषपरिहार इतितदाशयः। यङश्चाप्। यकारोयङाप्इत्यत्र
द्य ४ सामान्यग्रहणार्थः। चकारस्यचानुबंधत्वसंपादनेनैरासामान्यग्रहणाविघातकत्वेनचारितार्थ्ये घ्यां वष्ट्या आवघेत्यादौ
द्वा ४ परत्वाच्चित्स्वरः पित्स्वरंबाधतेइतिबोध्यं। बाधेत इति॥ एवंच गौकक्ष्य शब्दस्यगर्गादियञंतस्यादीचांमतेनेवचा
पः सिद्धेः सक्रोड्यादिषुनपाठ्यः। संप्रसारणंतुनेष्टमितिस्यष्टंभाष्ये। यूनस्तिः। अ नेष्यइतिङीपोपवादः। उत्तराष्ट्रइ
तिः। इहककरणंतदनित्यत्वज्ञापनार्थमिति केचित्॥ ॥इति स्त्री प्रत्ययाः॥ ॥ स्वौजसमौडीति। विहि

म्रणि। द्वितीयेतिनियमेनकर्मत्वाज्ञानसमानकालिकार्थांतरस्यैवव्यावृत्तिर्नतुतज्ज्ञानसमानकालिकार्यातस्यात एवगां
ल०श०शे०२ दोग्धि पयइत्यादावप्यनन्वयात् द्विबोधेपि द्वितीया एवंचकर्मणिसत्येव द्वितीया न तु तदसत्वे इति नियमाकारस्तथानेना
१२० पिप्रातिपदिकार्थसत्वे एव प्रथमा न तु तदसत्वे इत्येव नियमः स्यात् एवंचानर्थकनिपातेभ्यः प्रथमानेवस्यात्। एवंच
तत्समभिव्याहारेसपूर्वायाः प्रथमायाः दिशास्त्रप्रवृत्तिर्नस्यात्। तत्सत्वेकर्मादियोग्यार्थप्रातिपदिकाच्चेत्तद्धितस्वार्थेइ
मी०ए०५ त्यर्थान्निदोषः। इत्येवमात्रग्रहणं कं द्वितीयेत्यादर्मयुक्ताकारनियमत्वेमानं मात्रग्रहणाच्चसूत्रकारस्यप्रत्ययनियमप
क्ष एवाभिमत इतिगम्यते तत्करणे लाघवेन तु कर्मणो द्वितीयैवेत्यर्थनियम उक्तो भाष्यादौ स्पष्टंचेदंसर्वंभाष्ये इति भाष्य
220 प्रदीपोद्योतेनिरूपितमित्याहुः। संबोधनेच। तत्रवर्त्तमानादित्यर्थः संबोधनमभिमुखीकरणं तत्फलंप्रवृत्तिनिवृत्ती
संबोध्यतावच्छेदकरूपेणसंबोध्यस्यसिद्धिं विनातत्वासंभवादनुवाद्य एवैषाविभक्तिः। अत एवविधेयभूतक्रियायामेवै
घु०१ तदर्थान्वय उद्देश्यतया। अत एव राजाभवयुध्यस्वराजन्युध्यस्वेत्यनयोर्भवस्यैवप्रयोगः। रामपाहि इत्यादौ चाभि
घु०६ मुखीभवद्रामोद्देश्यकप्रवृत्तेर्नाविषयोरक्षणमितिबोधः व्रजानिदेवदत्तेत्यादावपिजानीहीत्यादिः शेषबोध्यस्त
त्रव्रजनस्यकर्मत्वाद्देवदत्तस्योद्देश्यत्वादुभयोः समानवाक्यस्थत्वं एकतिङ्वाक्यमित्यस्यचश्रूयमाणैकतिङ्स्त्वर्थ इति
220 नदोषः। उद्देश्यविधेयभावोवाक्यार्थः। अभिमुखीभवनानुकूलव्यापारश्चसंबोधविभक्त्यंतशब्दप्रयोगरूपः व्र
जानीतिप्राप्तकालेलोट् अत एवगच्छेत्याद्यध्याहारेपि ङम्भूरेवेत्यादौ प्रथमा अनध्याहारे तु द्वितीयैवेति दिक्॥ इतिप्रथ
मा। कारके। कारकत्वंक्रियाजनकत्वं। भाष्यकारोतिक्रियांनिर्वर्त्तयतीतिव्युत्पत्तिप्रदर्शनात् ब्राह्मणस्यपुत्रंपंथानंपृच्छ
तीत्यादौब्राह्मणस्यनकारकत्वंपुत्रेणान्यथासिध्यातत्वाभावात् अत एवैषांक्रियायामेवान्वयः क्रियाजनकमिति राम० १२०

न्यथा स्वमोर्नपुंसकादित्यादिशास्त्रप्रामाण्येन लिंगस्यापि प्रातिपदिकार्थतया द्वैयर्थ्यं स्यादेवमेव। अतएव स्त्रियामिति
सूत्रे स्त्रीत्वे द्योत्ये इत्यर्थ इति भाष्ये सिद्धांतितं तस्माच्छस इत्यत्र पुंसी त्यस्य पुंशब्दस्य प्रकृतित्वे इत्येवार्थः। अभिहिते प्रथ
मेति वार्त्तिकस्य नत्र प्रातिपदिकार्थगतकारकशक्तावन्येनाभिहितायां स्वार्थे प्रातिपदिकात् प्रथमेत्यर्थ इति न तद्विरोधः
एतेन तन्नये कारकस्य प्रत्ययार्थत्वं तव तु तन्नेति विरोध इत्यपास्तं। तटादिशब्दानामपि लिंगं वाच्यमेव द्योतकास्तु विसर्गाद
यः एवं तत्र लिंगं वृद्धिस्थीकृत्यैव तस्य विसर्गादेः साधुत्वान्वाख्यानं नियमांशानि वेशेन तु न मानमिदमेवाभिप्रेत्य वृत्तौ प्राति
पदिकार्थः। सत्तेत्युक्तं सत्तेति प्रवृत्तिनिमित्तोपलक्षणं। आश्रयस्तु तदाक्षिप्तत्वान्न पृथगुक्तः। एवं च प्रातिपदिकार्थ इत्य
स्यालिंगालिंगप्रवृत्तिनिमित्तकाश्चाव्ययप्रमादय उदाहरणं लिंगविशिष्टपरिभाषया स्त्रीशब्दोप्यस्यैवोदाहरणात्। अन्ये
सर्वलिंगाधिक्ये इत्यस्य द्रोणत्वादिप्रवृत्तिनिमित्तकानां द्रोणादिशब्दानां परिमाणत्वेन परिमाणमपि लिंगवद्विशेष्यान्वय
र्थः। एवं च तस्य लिंगप्रातिपदिकार्थत्वाभावात्परिमाणग्रहणं। द्रोणः परिमाणमित्येव तु द्रोणो ब्राह्मणाधिति तत्प्रयोगः द्रोण
शब्दस्यानेकार्थत्वाद्वा। मूलोक्तं तु न युक्तं द्रोणो व्रीहिमानित्यस्यापत्तेः किंच तिङ् समानाधिकरणप्रथमेति वा किं केवा
च्यतयाभेदान्वये द्रोणो व्रीहिरित्यसिद्धेः। न च यदा मेये द्रोणादीनां वृत्तिस्तदा तस्यानेकत्वेन परिमाणमात्रपरत्वे तद्बोधेन
च व्यभिचारान्मेयस्य नियतोपस्थितिकत्वाभावेनाप्रातिपदिकार्थत्वादसिद्धेः कर्मव्युत्पत्त्याप्रमेयार्थकं परिमाणग्रहणमि
ति कैयटोक्तं युक्तमिति वाच्यं। सिंहो माणवक इत्यस्यासिद्ध्यापत्तेस्तद्वदस्यापि सिद्धेश्च नियमांशनिवेशमानाभावाच्च।
एको द्वावित्यादिसिद्धये तु वचनग्रहणं। अन्ये पेतत्सूत्रोपस्थितानभिहित इत्यस्यात्र फलाभावादुक्तैकवाक्यतापन्नसंख्या
वाक्यान्वयित्वेन तदप्राप्तेः रामादिपदोत्तरं व्याधिकोपप्रथमाद्धोकयोरिति राघवकैवाक्यतयेति वाध्यं। मात्रग्रहणं तु यथाक

ल॰श॰शे॰र॰ १२१

तीत्यर्थः। तदाह कर्मणइति तमप्ग्रहणं किमिति। अवयवद्वारा समुदायस्य प्रश्नः कर्तुरुद्देश्यं कर्मेत्येवास्त्विति भावः
पयसौदनमिति। यदाकृतभोजनोऽपि प्रियो लोभेनौदनभोजने प्रवर्तते तदेदं प्रत्युदाहरणं तत्क्रियायाः पयउद्देश्यत्वादी
प्सिततमशब्दस्य तु क्रियाशब्दत्वात्पयसस्तदाफलाश्रयत्वेनाविवक्षणान्न दोष इति भावः। तमपः फलं त्वग्नेर्माणवकं
कारयतीति। तदभावे हि वारणार्थानामितिसूत्रस्यापवादः स्यात्। एवं च माणवकस्य कर्मत्वं न स्यात्। न चाग्नेस्त
द्विरितार्थं तस्यापि तदुपश्लेषसंयोगरूपफलाश्रयत्वाद्वारयतेस्तत्संयोगाद्यनुकूलव्यापाराभावानुकूलव्यापारोऽर्थः
एषएव प्रवृत्तिविघातः ईप्सितशब्द उभयत्रापि क्रियाशब्द एव। न च संयोगो न तत्कर्तृव्यापारजन्य इति तत्र कर्मत्वा
प्राप्तिरिति वाच्यं। कर्तृव्यापारवाचकधातूपात्तफलाश्रयत्वमित्यर्थस्यैव तेन लाभात्। तमब्ग्रहणे त्वीप्सितमात्रे साव
काशस्य परत्वादीप्सिततमेनेन बाध ईप्सिततमत्वं च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्र
यत्वेनोद्देश्यत्वं तच्च गाम्यादौ फलव्यापारयोः प्रकृतधा र्थत्वं तु प्रत्यासत्तिलभ्यं तेन यदाप्युद्देश्यं माषभक्षणं यमाष
क्षेत्रएवाश्वं बध्नं तदा माषेष्वश्वं बध्नातीत्यादौ माषाणां न कर्मत्वं बंधनप्रयोज्यभक्षणफलाश्रयत्वेऽपि भक्षणस्य बं
धात्वर्थत्वाभावात् प्रयोज्यत्वनिवेशात् दोग्धीत्यादौ विभागानुकूलव्यापारानुकूलव्यापारार्थकदुहियोगे पयसः कर्मत्व
सिद्धिरिति स्पष्टं भाष्ये। कर्मेत्यनुवृत्ताविति। अधिशीङ्स्थासामिति सूत्रात्। आधारेति। कर्तृक र्मद्वारा क्रियाश्रयो हि
सस्तदाह। गेहमित्यादि। अनुक्ते कर्मणीति का। कर्मपदेनैतच्छास्त्रबोधितकर्मसंज्ञकं कर्मत्वशक्तिमद्गृह्यते। सर्वकर्मवि
हितद्वितीयादीनां कर्मत्वशक्तिमानर्थः। क्रियाकारकभावः संबंधस्तत्रार्थः राज्ञः पुरुषः इत्यत्र राजपुरुषयोः संबं राम॰ १२१

121

ज्ञातेकासाक्रियेत्याकांक्षोदयेनक्रियायाजनकाकांक्षयाचतत्रैवान्वयस्यौचित्यात् । सर्वेषांचकारकाणांस्वसावां
तरक्रियाद्वाराप्रधानक्रियानिष्पादकत्वंबोध्यम् संनिहितसंप्रदानस्यापिदातृबुद्धिस्थत्वावश्यकत्वेनस्वज्ञानपूर्वका
लत्वेनैवजनकत्वम् एवंस्तोकंपचतीत्यादौफलस्यापि । घटंकरोतिस्मरतीत्यादौबोद्धुर्घटादेःपूर्वकालत्वेनस्मृत्यादिनि
ष्पादकत्वंबोध्यं ॥ कर्त्तुरीप्सि । ईप्सितशब्दोत्रक्रियापरोनाभिप्रेतपरोरूढः स्पष्टंचेदंवारणार्थानामित्यत्रभाष्यकैयट
योः । कर्त्तुरितिक्तस्यचवर्त्तमानेइतिकर्त्तरिषष्ठी आप्नोतेःसन्नंतान्मतिबुद्धीतिवर्त्तमानेकर्मणिक्तः मतिरिद्धेतितत्राक
रः । एवंचकर्त्राप्तुमिष्यमाणंकर्मेत्यर्थः । आप्तिश्चात्रसंबंधः सचकर्त्तृपदार्थविशेषणीभूतव्यापारद्वारकएवानुप
स्थितकल्पनेमानाभावात् । एवंचकर्त्रास्वनिष्ठव्यापारप्रयोज्यफलेनसंबंधमिष्यमाणमित्यर्थः यथातंडुलंपचती
त्यादौफलस्यापिव्यपदेशिवद्भावेनफलसंबंधित्वात्कर्मत्वं । अतएवतत्समानाधिकरणेस्तोकंपचतीत्यादौकर्मत्व
सिद्धिः क्तप्रत्ययेणात्तवर्त्तमानत्वंतुविवक्षितंतेनकटंकृतवानित्यादिसिद्धिः । कारकेकर्मसंज्ञंस्यादिति । कार
केइतिप्रथमार्थेसप्तमीतेनकारकंसत्कर्मसंज्ञमित्यर्थः संज्ञिनः क्रियाजनकत्वंतुमहासंज्ञयालभ्यं यद्वा सप्त
मीयथाश्रुतैवकारकपदंचक्रियापरं । करोतिकर्त्तृकर्मादिव्यपदेशानितिव्युत्पत्तेः जनकमित्यध्याहारस्तदाहकारक
मितिविषयत्वंसप्तम्यर्थः । कारकग्रहणंचस्वरितत्वप्रतिज्ञयैतदधिकारोक्तकर्त्रादिपदेष्वेव । तेननटश्रवणमित्यादौन
कृदुत्तरपदप्रकृतिस्वरः । ग्रामेवासइत्यादौचतत्स्वरसिद्धिरित्यन्यत्रविस्तरः । कर्त्तुः किमिति । तद्भावेपकेनाप्नुमित्या
कांक्षायांकारकाधिकाराद्व्यापारलाभइतिप्रश्नः । माषेष्विति । माषेषुप्रसक्तमश्वंमाषनाशोमाभूदिति अन्यत्रबध्ना

ल०श०शे०प०
१२२

1222

भविकर्मणो रित्यादेरुक्तनियमत्वं भाष्यसंमतं संगच्छते। अत एव दधि अजधी अवेदित्यादौ प्रातिपदिक धातुभ्यामेव सर्वबो
धः। अत एव भावकर्मणोरित्यस्य न च्छन्नात्तो रित्यर्थः। स्वुक्र्मेति सूत्रे भाष्ये दर्शितः। द्योत्यत्वादेवोभयत्रापि प्रत्ययार्थ वा२
स्य विशेषणत्वमेवेत्यन्यत्र विस्तरः। प्रथमैवेति। साहि प्रातिपदिकार्थस्यैतेनोक्तत्वेपि भवत्येवेति भावः। अत एवाभिहिते
प्रथमेति वार्त्तिकं संगच्छते तिङ्कृदित्यादि। परिगणनाद्देवक टंभीष्मं कुर्वित्यादौ विशेष्याद्युत्पन्न द्वितीययागतार्थत्वेपि
विशेषणात्साय दातु प्रक्रियादशायां कटोपि कर्म भीष्माद्योपीत्याश्रयणात् करत्व विशेष्यकट निष्ठकर्मत्वोक्तावपि भीष्म
त्वादिगुण विशिष्ट निष्ठस्य तस्य बोधार्थं ततोपि साबोधस्तु परस्परं तयोर्विशेष्यविशेषणभावेनैव। कारकाणां भा
वनान्वय व्युत्पत्तेः साक्षात्त्वाश्रय द्वारा वान्वयविषये तितदा परिगणनं भाष्ये प्रत्याख्यातं तिङ्कृतोस्त्वप्रकृत्यर्थं प्रतिय
स्य कर्मतातस्य सर्वस्यापि कर्मतामाहतु रितिकृतः कटः संदरइत्यादौ न क्वापि द्वितीयेति दिक्। शत्पइति अत्र वदंति। क
र्मादिपदे इवात्रापि न विभक्तिवाच्यतावच्छेदकरूपेण कर्मादेर्भानमत औपगवश्चित्रगुरितियुक्तमनुदाहृत्यं। तत्र च संबंध
स्यैव न रूपेण षष्ठ्याभानं तेनैव तद्भितां तादिभिः समुदाय शक्त्या एतदधिकाराभावेव घट इत्यादौ षष्ठ्या वाच्यत्वेन दृष्टाना
मेव प्रातिपदिकार्थपदेन ग्रहणं स्यात् न द्भिन्नस्यैव च षष्ठी विधायके शेषपदेन ग्रहणं स्यादित्यत्वत्संबंधस्य षष्ठीवाच्यत्वेन
दृष्टतया प्राप्तां षष्ठीं वारयितुं सः। वस्तुतस्तु "कटं भीष्ममिति परिगणन फलमुक्त्वा तत्प्रत्याख्यानायाशेषत्वान्नात्र शेषलक्षण
षष्ठी अन्यानभिहितकर्मादीनामभावाच्च नान्यापि इत्याशंक्य न केवला प्रकृतिरिति समयः कृतो न चान्योप्य(?)चमाना एतमभिसं
बंधमुत्सहते वक्तुमिति कृत्वा द्वितीयेत्युक्तं भाष्ये तेनौपगवादावपि षष्ठी वारितेव तितयोरप्यप्रत्युदाहरणत्वमेव। तदुक्तमनेकामि
त्यत्र भाष्ये। चित्रगुरित्यत्र षष्ठ्यर्थस्य नियमेन भानाभावात् प्रातीत्या रांक्याभिहितः सोर्थान्तरभूतः प्रातिपदिकार्थः संपन्न राम०
१२२

न्यायो धिपरीतिसूत्रे भाष्ये दृश्यते तत्र ह्यध्यागच्छती त्यतोनधिकार्थयोरधिपर्योः प्रयोगस्योक्ता र्थानामिति १

धस्य षष्ठी वाचिका का छंस्मिरत इति क्रियाकारकयोः संबंधस्य द्वितीयावाचिके ति समर्थसूत्रस्थभाष्यात्। एवं च हरिं भजतीत्यादौ हरिकर्मकं भजनमिति बोधः। अभिहितेत्विति। अनभिहिताधिकारादिति भावः। पंचकप्रातिपदिकार्थपक्षे कर्मणि द्वितीयेत्यादेर्द्योतकयोरित्यादेश्च नियमत्वमेतदभावे पिस्वादिसूत्रेणानिर्दिष्टार्थाः प्रत्ययाः स्वार्थे इति कर्मादौ सं ख्यायां च स्वादीनां सिद्धेः। तत्र यदा कर्मणीत्यादेर्द्योतकयोरित्यादेश्चैकवाक्यतायामेकस्मिन्कर्मणीत्यन्वयेन सूत्रजबोधे क र्मा घर्थस्य प्राधान्यं त दानार्थीने न। सूत्रजबोधविषयप्रधानविषयेणोक्तार्थानामितिन्यायेन सिद्धेः। यद्यपि हि वि द्वंसवत्कृभितिन्यायेन वृक्षान्नरोण्यति लुनीत इत्यादौ द्योतकवाचकयोर्द्योतकयोश्च समुच्चयो दृश्यते तथापि प्रकृते लक्ष्या नुसाराद्युक्तार्थानामितिन्यायानुसरणस्यैव चकुंशकत्वात्। एवं च कर्मादीनां द्योत्यत्वमेव। यदा तु कर्मगत एकत्व इत्यन्वये न संख्यायास्तत्वं तदा सूत्रमारब्धव्यं। भाष्ये। एषु विभक्त्यर्थे त्व व [illegible] व हारो द्योत्यतयैव तन्वेतावता तच्छक्यत्वमेवाप्राधान्यं भवितव्यं नियमत्वानुपपत्तेरितिस्पष्टं। न तु ष्विति सूत्रे भाष्यादिषु द्यो तकविषये युक्तार्थानामितिन्यायेनाभावमाशंक्य यूयोरावित्यादावुक्तार्थानां प्रयोगदर्शनेन समाधानं कृतं। तत्र हि द्विश ब्द एपशब्दयोर्वाचिकयोः। प्रत्यययोर्द्योतिकयोः प्रकृतिप्रत्यययोर्वाचकद्योतकयोर्वा वित्यत्र तयोर्वाचकानुवादकयोश्च

धं२ समुच्चयः। अतएव छिद्रश इत्यादौ समासेन सुजंस्याकत्वान्न सुजिति भाष्ये उक्तं तत्र हि समासः सुच्चे तुभयमपि द्योत कं सुजर्थश्च जन्मेति न तैवन दृश्यते। तथा तु कृतद्विर्वचनयोर्द्योतिकयोस्तद्धिते नोक्तत्वाद्वीप्सायां न द्विर्वचनं माषश इत्यादावितिस वेत्यत्र इति सूत्रभाष्ये उक्तं एवं च धातोरपि क्रियाकालकारकसंख्यास्वपंचकमर्थः। अतएव तद्विषये पि द्योतकयोरित्यादे

कर्मत्वमुक्तं न तु पुत्रशास्त्यपतत्प्रवृत्तिरित्यक्षरार्थः। स्पष्टमात्मनेपदमिति तत्र तस्य कर्मत्वविशिष्टबोधकस्त्वंतादित्यर्थ इति तदाश
स०श०शे०१० यः। वस्तुतः। कर्मत्वविशिष्टबोधार्थं सत्तद्बोधकादित्यर्थः इह भवंत इत्यादिना समाध्यंतरमुक्तं वा वेयफलं विशेष्यं त्वेनो व्यापारइ
१२३ तिसमानार्थत्वाभावात्तत्रार्थवृत्तिर्नेतीत्याहुः। प्राचामनुसारेणोक्तस्य प्रायेणेत्यस्य फलमाह। केचिदिति। परे तु। अत्र तु मुनः सा
धुत्वाएव्यतइत्यध्याहार आवश्यकः। अन्यथाक्रियार्थक्रियोपपदत्वाभावाच्चतुर्थ्यादियोगभावाच्च सद्दुर्लभः स्यात्। अ
ध्याहारे त्विष्टार्थेषु तुमिति सुलभः। विषयत्वेनापि संवद्धुमिच्छेत्स्मिष्यत इति यत्तत्सांप्रतमव्याप्यमित्यर्थः। एवं चाध्याहृतेति न्या० है
ऊभिधानान्न द्वितीयातादृशेच्छया अव्याप्यत्वं च तद्विषयस्याप्यत्वेन। एवमग्नं नारद इत्यबोधिस इत्यादेनारद इतीति स्त्री
कृत्स्नीयज्ञानाकारानुकरणं नारद इत्येतच्छब्दाभिलप्यमानाकारबोध इत्यर्थ इति प्रथमांतस्याप्रातिपदिकत्वान्न तत्र द्वि
तीया। अतएवाधिहरीत्यादौ समासः। तद्वचनसामर्थ्यं न ह्यस्य परिगणनत्वकल्पनैव युक्ता। अतएवा अग्ना अपइत्यादौ
सप्तमी। किंच निपातनाभिधाने प्रातिपदिकाद्भूततत्तच्छक्तिमत्वेनेवभानमिति तत्र विभक्तिः सुलभा शरदश कित्वभा
वादस्येवार्थस्य द्योतको धिर्नेपातः। अतएव परिगणनप्रत्याख्यानेपि न दोष इत्याहुः। तथायुक्तं। तत्वं च समभिव्याहृतधा
त्वर्थप्रधानव्यापारप्रयोज्यतद्भूलत्वे फलाश्रयत्व रूपं पराधीनतया विषं भुज्जानेपि भुंजे क्रियाफलाश्रयत्वेनोद्देश्यत्वा
त्सूर्वसत्रेणैव सिद्धः। तदुक्तं भाष्ये। आतश्च विषमीप्सितं यत्तद्भक्षयतीति तस्माच्चोरान्पश्यतीत्युदाहरणं विषयेंद्रियसं
बंधाद्दृश्यमाना अपि न दर्शनोद्देश्या अपि त्वनिष्टदर्शना एवेति स्पष्टं भाष्यकैयटयोः। एवं च तत्रपूर्वेणप्राप्तावचनं। अ रामः
नीप्सितमनुद्देश्यं तच्च द्वेष्यमुदासीनं च तृणमिति" यथा स्पृश्यमानस्य गंगादेः स्पर्शादिजन्यसंयोगादिफलाधारत्वं तथैव
तृणादेरपीतिभावः। अनीप्सितपदाभावे ईप्सितस्य प्रकर्षहीनस्याप्येनेन संज्ञाप्राप्तौ वारणार्थीनामित्यनवकाशं स्यात्। त १२३
चायुक्तमिति किं॥ विशेषणेन द्वंद्वं संके इत्यादौ करणत्वमात्रविवक्षायां विषयस्य माभूत्। प्रयागात्काशीं गच्छतीत्यत्र प्रयाग

इतिप्रथमेनुक्तं। अनेनाशेषरूपंषष्ठप्राप्तिवीजमुक्तमंतर्भूतइत्यनेनचित्रग्वादौसंबंधस्यैवप्रवृत्तिनिमित्तत्वेनप्रातिपदिका
र्थपदेनग्रहणायोग्यतोक्तेतिबोध्यं। परेतु। शत्पइत्यादौ कारकान्वययोग्यतावच्छेदकसाध्यत्वेननक्रपदार्थेनिम
तएवनतत्रेतरकारकाणामन्वयः। इदंचकर्तृकर्मणोरित्यत्रनिरूपयिष्यते। एवंप्राप्तानंदइत्यादौयत्कर्मकप्राप्तिकर्तानंदइति
विग्रहतोबोधेसमासस्तस्यानंदकर्तृकप्राप्तिकर्मेतिबोधेविशेष्यविशेषणभावव्यत्यासेनेकार्थीभावः कल्प्यः स्यात्। इ
तिविग्रहयोः समानार्थत्वभंगाश्च किंचतथासतिबहुव्रीहुपजीव्यस्यैकधर्मिबोधकत्वरूपसामानाधिकरण्यस्यहानिः
किंचेवंप्राप्ताभार्ययंसप्राप्तभार्यइत्यादौयुवत्वानापत्तिः एवंत्रिपदयोरेकविशेष्यकप्रतीतिजनकत्वरूपवक्ष्यमाणसामा
नाधिकरण्याभावात्तस्मात्कालाः परिमाणिनेत्यादिसूत्रभाष्योक्तस्यवृत्तिविग्रहयोः समानार्थत्वस्यनिर्वाहायैवत्तिवि
ग्रहयोः प्राप्तिकर्त्रानंदकर्मैस्येवबोधः। विशेष्यतन्निरूपकत्ववाधेनतुविशेषणभूतप्राप्तितात्पर्यवसानंस्वगिध्वत्वइतिव
त्शाब्दबोधस्तुविशिष्टेतदारोपेणोपपाद्यः। एवंचात्रशब्दात्कर्मादि: क्रियाजनकत्वेनविभक्तिवाच्यतावच्छेदकोद्भूतशक्ति
मत्वेनचनभानमतोनविभक्तिप्रसक्तिरतएवगतिकारकोपपदानांयाससंप्रदानादयः शब्दानकारकरूपतांप्रतिपादयंतीति
त्याकारकशरोपीति कदंताहिक्रियायोग्यताविशिष्टद्रव्यवाचिनोनतुद्भूताकारकशक्तिं प्रतिपादयंतीतिकैयटेनोक्तं। अ
तएवतस्यकर्मत्वस्यनक्रियान्वयनियमः। अन्यथाकारकशक्तेः क्रियाविशेषणत्वनियमेनकर्मादिप्राधान्यानापत्तिः॥
एवंकर्मादिपदेखिपकादिपदेरपिनविभक्तिप्रयोजकरूपेणकर्मादीनांभानं तिङ्कृत्तद्धितसमासैरभिधानइत्यस्यापम
र्थः। एतेरभिधानेतत्तद्रूपावेशेनभानमितिविभक्त्यप्रसक्तिरवेवानभिहितइतितात्पर्यग्राहकं। ध्वनितंचेदंसुपआत्म
नइतिसूत्रेभाष्ये। तत्रहिइच्छः प्रत्ययश्चतेपुत्रइत्यर्थेक्यच्माशंकस्यशब्दोनोक्तत्वान्नेतिसमाहितंइष्यमाणसामानाधिकर
ण्यात्पुत्रांपेकर्मत्वावगतावपिपुत्रइतिप्रथमांतेनकर्मतानाभिहितेति: क्यच्इतितद्भावः स्वंकर्मत्वंतत्वाचकत्वेनप्रत्ययगतं

दितिस्त्रेग
तिकारकोप
पदादितिकि
सर्थपरमंका
रकंपरमकार
कमितिप्रती
कमुपादाय७

ल०श०शे०प० १२४

सितत्तमित्येवसिद्धं प्रधानकर्मत्वंच गवादीनामिति तत्रैव लादि सिद्धिः प्रधानकर्मत्वंच कर्तृप्रत्ययसमभिव्याहारे कर्तृ
निष्ठप्रधानव्यापारविशेषणफलाश्रयत्वं। एवं तद्विषयेईदृशप्रधान [illegible] स्यैवग्रहात्प्रकृते च पयोनिष्ठविभागानुकूलो
योगोनिष्ठोव्यापारस्तदनुकूलव्यापारस्य शब्दतः प्राधान्यात्। गर्गाः शतं दंड्यन्तामित्यत्र गर्गाणामेवतत्वमुद्देश्यरूपम
र्थप्राधान्यंतु शतस्येत्यनुद्देश्यत्वेनाप्रधानगर्गानुरोधाच्छतान्तरावृत्तिरितिनदोषस्तत्रस्थभाष्यविरोधः। एवमेवशका
रमसिचोदित [illegible] इत्याद्युपपत्तिः। अतएवप्रधानकर्मण्याख्येयेलादीनाहुर्द्विकर्मणां अप्रधानेदुहा
दीनामेवंतेकर्तृश्चकर्मणाइत्युक्त्वा उत्तरार्द्धे पात्रानिरिक्ताद्विकर्मकाः केइतिप्रश्नेनीवह्योर्हरतेश्चापिगत्यर्थानां तथैव
चद्विकर्मकेषुग्रहणं द्रष्टव्यमितिनिश्चयइत्युक्ते तत्रन्यादिग्रहणं तवकृषिवन्नमव्यापारद्व्यार्थकधातूपलक्षणमेवंच
दंडस्तंभ्यर्थेन याचिपयदापयोनिष्ठविभागानुकूलव्यापारादिरेवधात्वर्थस्तदापादानत्वाद्यविवक्षायामन्येनासिद्धं कर्म
त्वार्थमिदमावश्यकं तदाचाप्रधानेदुहादीनामित्युक्तेरप्रधानेगवादावेवलादयः। अप्रधानकर्मत्वंचोक्तप्रधानक
र्मभिन्नकर्मत्वं तच्चोक्ताथेगवादीनामस्त्येवफलानाश्रयत्वात्। गांदोग्धीति अंतः स्थितद्रवद्रव्यनिष्ठविभागानुकू
पा०६ लव्यापारोदुहेरर्थः। तत्रगोरपादानत्वाद्यविवक्षायामनेनकर्मत्वं। तद्विवक्षायांपंचमी। गोःपयसान्वयेषष्ठी द्विकर्मके
षुगवादीनांकर्मत्वाविवक्षया क्रियान्वयेषष्ठीनानभिधानात्पयस्तस्यान्वययोग्य [illegible] नामसमभिव्याहारतत्रैवान्वय
वलिनिरूपित स्यात्सर्गतोव्युत्पन्नत्वेष्ट। अतएवतंडुलानामोदनंपचतीत्य त्रद्व्यर्थत्वेवपचिर्विकारयोगेषष्ठीत्येवकर्तृरितिसूत्रे
स्वत्वनिवृत्ति भाष्येउक्तमितिदिक्। बलिंयाचतइति। यदास्वत्वंनिवृत्तिस्वस्वत्वोत्पत्त्युभयानुकूलोव्यापारोयाचेरर्थः स्वत्वेववल
पूर्वकिञ्चित्स्व निरूपकतयान्वयस्तदानेनकर्मत्वं। पूर्वविषयस्यकस्याप्यभावात्। नचात्रापादानत्वप्रसक्तिः विभागस्यधात्वर्थत्वा
त्वोत्पत्त्यनुकू भावात्। न [illegible] याचितायादद्दातितदापाय राम० १२४
लव्यापारोऽर्थः ३

224

पञ्चमाभूतु तत्सत्वेन प्रकृतधात्वर्थफलाश्रयत्वरूपत्वाभावान्न दोषः । अपादानादिविशेषैरिति तद्रूपेणाभासमानमित्य
र्थः । अकथितग्रहणात्राकीर्तितपरेनाप्रधानपर इति भावः । एवं च सर्वविधिविषयप्रसक्तिपूर्वकविवक्षायां सर्वेषामपूर्व
विधेरप्रसक्तौ वैतत्प्रवृत्तिरिति बोध्यं । अपादानत्वादिविवक्षायां पंचम्यादेवकेनरूपेण तर्हि विवक्षेति चेत्कर्मत्वेनेति ग्र
हणाकारकत्वव्याप्यसंज्ञानां स्वबोध्यधर्मकर्मत्वादिशक्तिमत्त्वबोधकत्वान्तु बोधोपि तच्चैव । तत्तच्छक्त्यभावे सर्वत्र षष्ठी
प्राप्ता सर्वासां तदपवादत्वेन तदपवादत्वमात्रेण संबंधार्थकत्वं न युक्तं । अत एव कर्मणीति द्वितीये तस्य पनवैरूप्यं । अत ए
व तत्सूत्रशेषभाष्येऽनेनैव सिद्धे आद्यसूत्र इत्येवं यच्छमाशंक्योक्तमात्रस्याप्यनेन संज्ञायां वारणार्थिना मिति सूत्रस्या
तम ७ नवकाशत्वे माणवकादपि पंचमी स्यादिती प्यतमित्याद्यारब्धमिसुक्तरिते । एतेन दुहादीनां व्यापारद्वयार्थत्वे कर्तुरि
तिकर्मत्वे तत्वेनाविवक्षायामप्यनेन कर्मत्व मितिपरास्तम् ॥ वदतो बंधितात् । अत एव कर्तुरित्यनेन सिद्धिमाश्रित्यास्य
वैयर्थ्यमाप्येनाशंकितं । कारकमिति क्रियाजनकमित्यर्थः । नन्वेवं नटस्य शृणतीत्यादावतिप्रसंगः सर्वेषां तत्र तदप्रा
प्तेः गीतद्वारा च तस्य क्रियाजनकत्वं न च तस्य कर्मयुक्त्वाभावस्तद्दृश्यस्यापि परिगणनलभ्यत्वात् । नटस्यापादानविव
क्षा तु न कदापि आख्यातोपयोग इति सूत्रेऽनुपयोगे आख्यातुरपादानत्वाविवक्षायां बोधनादतः परिगणनमाह
दुहाच्यचिति । कर्मयुगिति कर्मयुक्तं धात्वर्थव्यापाराप्राक्तनदत्तं नरं वा तत्संबद्धत्वं न त्वत्र विशायस्तिरिक्ते धात्वर्थव्यापारा
त्प्रागेव तत्संबद्धत्वे तादृक्षयेतुतदनंतरं तत्संबद्धत्वं बोध्यं तत्र सातिसंभवप्राक्तनत्वं ग्राह्यं ॥ एतेन स्थाल्यादेरपि तद्या ८४
पा पारादनंतरं पयः संबद्धत्वेन कर्मत्वं तेषां दुर्वारमित्यपास्तं । तेन गां पयो दोग्धि स्थाल्यामित्यादौ स्थाल्यादेरधिकरणत्वाविव
क्षायामपि नानेन कर्मत्वं । एवं चापादाना दीनां दिशि वे नापादानसंप्रदानाधिकरणान्यदा । करणं तु नक्ष्यते रसादेः
करणस्य पयआदिकर्मयुक्तो भावाद्यपि गां दोग्धीत्यादौ गोः पयस्पर्शजतिगवापयस्यजयतीत्याद्यर्थप्रतीत्या कर्तुरी

व्यापारविशेषः कृषेः बलात्कुहरणपूर्विकं देशांतरप्रापणं हरतेः। एषु कर्तुरिति कर्मत्वं बोध्यं एवं च भाष्यानुक्तानामत्र ग्रहणं प्राचा
न०श०शे०पू० मनुरोधेनेति तत्त्वं। भाष्योक्ताहि दुहियाचिरुधिप्रच्छिभिक्षिचिञ् ब्रुविशासयः अर्थनिबंधनेयमिति इदमपि कैयटानुरोधेन। व
१२ ५ स्तुतस्तु येषामेतदर्थानां द्विकर्मकत्वमिष्टं तेषां व्यापारद्वयार्थत्वेन कर्तुरित्येव सिद्धमन्यथा आख्यातोपयोग इति सूत्रभाष्योक्तप
न४ रिपरिगणनत्वभंगापत्तिः किंच भाष्ये। सिद्धिग्रहणवैयर्थ्यापत्तेः उभयार्थक्याचि ग्रहणेनैव सिद्धेरित्यन्ये। अकर्मकधातुभि
रिति तेषां स्वकरणकव्यापनेनव्याप्तिरूपफलाश्रयत्वेन कर्तुरिति कर्मत्वं मासमास्त इत्यादेर्मासमासनेन व्याप्नोतीत्यादि क्रमेण
र्थ इति भावः। यत्त्विदमेव कर्मसंज्ञा विधायकमिति तन्न। भाष्ये तादृशवचनानुपलंभनात्। अकथितं चेति सूत्रेः कर्मकप्रकृति
करणं तानां कथं द्विकर्मकत्वमिति शंकायां कालभावाध्वगंतव्याः कर्मसंज्ञा ह्यकर्मणामिह। इति भाष्ये उक्तं तत्त्वन विधायकं
। हि शरद्घटितत्वात्। किंच कालाध्वनोरिति सूत्रे कालाध्वनोः कर्मवदिति वक्तव्यमिति वार्तिकप्रत्याख्याने प्राकृतमेवैतत्कर्मय
थाकटं करोतीत्युक्ते अस्य वचनत्वे उक्तं चाप्राकृतत्वे निवदेत्। तस्मादुक्तरीत्या कालादीनां तद्योगे कर्मतया द्विकर्मकत्वमि
त्येव तात्पर्यं अत एव समांसमां विजायत इति सूत्रे समायांसमायां विजायत इति विग्रहकथनपरं भाष्यं संगच्छते। अन्यथानेन
द्वितीयाया एव तत्र साधुत्वेन तदसंगतिः स्पष्टैव। अत एवोक्तभाष्यार्थानुवादि का हरेः कारिका। कालभावाध्वदेशानाम
न्तर्भूतक्रियांतरैः सर्वैरकर्मकैर्योगे कर्मत्वमुपजायत इति सकर्मकविषये प्यनेन प्रकारेण कालादिकर्मणा सकर्मकत्वं तुल्य
न्यायात् तेन मासमोदनं पचतीति भवति तत्र कालादिकर्म प्रधानं द्रव्यकर्म तु प्रधानं कालस्याधारत्वेन द्रव्यद्वारेव क्रियासंबं
धात्किंचु कठिनयाऽस्य महापरिमाणस्य [illegible] वहुसंरम्भं चाविरेणापाको न्यस्याचिरेणेति द्रव्यधर्मं पर्यालोच्य क्रिया
स्य कालयोग इति वहिरंगोपि साधनसंबंधे जाते क्रियायाः परिच्छेदकत्वात् कालाकांक्षेति स वहिरंगः अकर्मकव्यवहारस्तु धा
त्वर्थानां द्रव्यकर्माभावनिमित्तक एव अत्र वीजं वक्ष्यते तदुक्तं अतस्तैः कर्मभिर्युक्तो धातुर्द्वैरकर्मकः लभ्यकर्मणाभावे च राम० १२५

नयुज्यत इति भाष्योक्तेः। असंकीर्त्तितपर्यायाकथितग्रहणे गोदोग्धीतिचयाचिप्रछिभिक्षियोगे कर्मसंज्ञैवेत्ते
षामवस्थेतिच सिद्धांतकौमुद्युक्तेश्च व्यापारव्यधिकरणफलाश्रयत्वे हेतुकर्तुरितिकर्मत्वबोधः। वसुधयाचतामित्यसंबंधात्कर्मयुक्तं
अविनीतमितियाचेः स्वीकारानुकूलव्यापारोऽर्थः स्वीकारस्त्विदमवश्यं करिष्यामीति शब्दप्रयोगजनको ज्ञानविशे
षः विनयेन च तद्विषयज्ञानवत्त्वसंबंधः। तंडुलानिति। तंडुलान्विक्लेद्यनोदनं निर्वर्तयतीत्यर्थस्य कर्तुरितिसूत्र
स्य भाष्यकैयटसमतत्वेन कर्तुरीप्सितकर्मत्वासिद्धेरस्येतदुदाहरणत्वं चिंत्यं। [illegible] प्रसन्नकदानानुकूलव्यापारानु
कूलशासनरूपव्यापारार्थदंडयातिद्युयोगेपितन्नैवसिद्धं। अव्यापारव्यधिकरणत्वेनप्रयोगे बहूनां धातूनां द्विकर्मक
त्वबोधं व्रजमिति। निर्गमप्रतिबंधपूर्वकयत्किंचिदधिकरणकचिरस्थित्यनुकूलव्यापारो रुधेरर्थः। व्रजे गोस्तिष्ठ
तितत्रतां निर्गमप्रतिबंधपूर्वकं चिरस्थापयतीतिसंप्रत्ययात्। अधिकरणत्वाविवक्षायामनेन कर्मत्वं। व्यापारव्यधि
त्वेतुकर्तुरितिकर्मत्वं पंथानमिति। जिज्ञासाविषयार्थज्ञानानुकूलः केनपथा गंतव्यमितिमिलापादिरूपो व्यापारः प
च्छेरर्थः। ज्ञानविषयत्वेन पथः कर्मत्वं। माणवकेन च तज्ज्ञानाश्रयत्वसंबंधः। अपादानत्वं तु नात्र प्रश्नादेवापायो भव
तिएवं सोयधाचत्वेपापेनयुज्यते इति भाष्योक्तेः संप्रदानत्वमपि न कर्मसंबंधवत्त्वेनेच्छाविषयत्वाभावात्। व्यापार
व्यधिकरणत्वे तु कर्तुरितिकर्मत्वं। वृक्षमिति। विभागपूर्वकोदानं चित्रफलान्यादत्ते [illegible] अपादानत्वाविवक्षायामने
नकर्मत्वं। धर्मं ब्रूतेइत्यादि। ज्ञानानुकूलः शब्दप्रयोगरूपो व्यापारो ब्रूञर्थः। प्रवृत्तिपर्यवसायी स शास्तेः स च धर्मं कु
र्वित्यादि विधिघटितोपदेशरूपः। विषयता च फलतावच्छेदकः संबंधः। वचनादिकर्मणा धर्मेण माणवकस्याभिप्रे
यमाणत्वान्नास्य संप्रदानत्वं तदविवक्षायां चानेन कर्मत्वं। अत्र कर्तृव्यापारानंतरं तज्ज्ञानाश्रयत्वरूपमाणवकस्य ध
र्मेण संबंधः। नयतेः संयोगानुकूलव्यापारानुकूलव्यापारोऽर्थः [illegible] दिरर्थो वहेरर्थः। गत्यनुकूल

न०प्र०शे०प्र० नार्थशब्दकर्माकर्मकाणामणौकर्तासणाविति सूत्रं नियमस्यसजातीयापेक्षत्वात्सकर्मणांचेदेषामेवेतिनियमपरं एवंच्चेि
१२६ दकर्मकग्रहणंसामर्थ्याद्देशकालादिभिन्नकर्माभाववतोकर्मकग्रहणेनग्रहणंचेतिच्च सामान्यापेक्षज्ञापकंशास्त्रेकर्म
कपदेनदेशादीनामेवग्रहणमितितेनमासमास्यतइत्यादौणावेलोभवति।नचैवं।तदविवक्षाहिद्धातदन्वयोग्यधात्वर्थस्या
गात्सत्वेचतस्मिन्नर्थेतत्रसंबंधित्वेनान्वयविवक्षणाइतिभावः इदंकैयटानुरोधेन।परंतु।अविवक्षितकर्मकाणामप
कर्मकपदेनग्रहणंकाष्ठादीनामविवक्षितकर्मकेभ्यः कृतएर्धिकटमित्यादौभाष्यकृताकैयटेनचांगीकारात्।लुनातेर्निर्वृत्त
चि ६ प्रेषणात्णिचिलावयतिकेदारंदेवदत्तइत्यादौकेदारस्यकर्मद्वितीयांतस्यणौगाविति सूत्रे कैयटेनप्रयोगाच्च नचात्रार्थांत २६
मं ६ रेऽस्याऽकर्मकत्वंनत्वविवक्षयेतिवाच्यंतत्वप्रत्यभिज्ञयार्थांतरत्वाभावान्नदुदाहरणांतुस्पंदतइत्याद्यर्थकंनदीवहतीत्याद्या
कंरस्यं अधीगर्थेतिसूत्रेकर्मणः शेषत्वविवक्षयाऽकर्मकत्वेमातुः स्मयतेइत्यत्रभावेलस्यभाष्योदाहृतत्वाच्चयत्तु
कृतसूत्रेभाष्ये कालकर्मणामुपसंख्यानंकर्तव्यंनकर्तव्यंनचकेचिल्कालभावाध्वभिरकर्मकाःसंत्येवंविज्ञास्यामः।केचिदेक
226 र्मकाइतीत्युक्तं केचिदितस्यकालादेःकर्मसंज्ञाप्रयोजकव्याप्याद्रहितेर्थइत्यर्थः।तस्यायंभावः।उक्तरीत्याकर्मकपद
सामर्थ्याद्देशशास्त्रेऽकर्मकपदस्यावस्थांतरेकर्मरहितत्वमर्थइति ताद्दशत्वंचसर्वधातूनांव्याप्यकर्माभावात् तदविवक्षणा
द्व्यभयविधमपिकृतएवं सादिभाष्याग्रहंविनिगमनाविरहाच्च।अतएवाकर्मकाधिकारेस्पृदृशपादिभ्यआत्मनेपद
विधानंसंगच्छतेअकर्मकशब्देचधातुरेवान्यपदार्थः।अर्थभेदेनचशब्दभेदः कर्मत्वेनकालाद्यतिरिक्तकर्मानन्वय
यिकत्वंचतत्वमितिबोध्यं।नचकेचिदितिभाष्येणधातमात्रस्यकालकर्मकाणांतत्त्वमितिदर्शितं यद्यायत्कर्मभ
वतिनचभवतितेनाकर्मकाणांनचेतत्कर्मकचिदपिनभवतीतिभाष्योक्तपक्षांतरेणतत्सामर्थ्याद्व्यभिचारिद्व्यक राम० १२६

निमित्तत्वाय कल्प्यत इति। गतिबुद्धि। शब्दः कर्म कारकं येषामित्यर्थः व्याख्यानात् तेन ज्ञापयति क्रन्दयत्योर्न। अण्यन्तेति णि
च् अनुत्पन्ने इत्यर्थः। अत्र णिच्प्रकृतेर्हेतुमत्ति जेव सर्वाणि तत्रापि स एव व्याख्यानात्। अत एव भक्षेर्निषेधः अरितार्थः सहि निस
र्गं तत्रसुरादिरिति बोध्यम्। अन्याधीनत्वलक्षणार्थप्राधान्यशब्दप्राधान्ययोः प्रयोजकव्यापारसत्वेन तदनुरोधिकर्म
त्वस्यान्तरंगादपि कर्तृत्वात् बलवत्वेन कर्तृत्वेन सिद्धे णिजर्थेनाप्यमानस्य चेऽत्यर्थादीनामेवेति नियमार्थमिदं तेन याच
पत्यादियोगेनेति हेतुमति चेति सूत्रे भाष्यकृतः प्रधानकार्यं सर्वत्र बलवदिति आकडारसूत्रे कैयटे स्पष्टं तेन गत्यादियो
गेऽप्राप्तस्य कर्मत्वशक्तिमत्त्वात् पाचयत्यादियोगे कर्तृकत्वशक्तिमत्त्वमेवेति बोध्यम्। गमयति देवदत्तेन यज्ञदत्तकर्मके स ७
गमनानुकूलदेवदत्तकर्तृकव्यापारानुकूलो विष्णुमित्रकर्तृको व्यापार इति बोधः। अत्र देवदत्तेन कर्मत्वं नियम्यते इति
त्वक ८ निर्वर्तकरणं तप्रकृतिभूतस्येत्यर्थः प्रापणार्थ वहेर्गत्यर्थत्वाभावेऽपि ग्रामं ग्रामसइत्यादौ तत्प्राप्ते गतिं वि नाऽसंभवाद्द्वन्द्व
संगत्यापि गत्यर्थत्वमित्यभिमानेन वार्तिकारंभः स्वग्रामसइत्यादौ न तदात्मनेपः तत्र कर्तरि क्तः आदिकर्मणि बोध्यः। अत एव
ग्रामं प्रापयति देवदत्तेनेवेत्यत्रेति ध्वनितं नगतिसूत्रेऽन्त्रवर्तिसूत्रे च भाष्ये नयतेस्तु व्याप्रापण इत्यादिर्विगत्युपसर्जनं प्रापणं वा
च्यमिति तस्य गत्यर्थत्वमेवेति बोध्यं। आदिखाद्योरिति। प्रत्यवसानार्थत्वात् प्राप्तिः। प्रत्यवसानं भक्षणम्। भक्षयति बलीवर्दा
स ५ न्निति हिंसायां भक्षणं भक्षेर्न निरपेक्षीयं स्यात् भक्षणपरादिं क्षितो भवतीति तत्त्वाभिनोऽत्राहिंसा द्रष्टव्या। जल्पयतीति। पुत्रो धर्मं
माससंज्ञादिस्तस्यचनसामर्थ्यसापेक्षाद्विशेषणमसंभवादतआह ।समर्थाश्रितइति ।सामर्थ्यंचात्रनव्यपेक्षा
आख्यानात्समासादिवृत्तिषुतस्याअभावाच्च किंत्वेकार्थीभावः सचविशेष्यविशेषणभावावगाह्युपस्थितिज
नकत्वंसंसृष्टार्थंसमर्थमितिभाष्योक्तेः ।अतएवराजपुरुषैकदेशराज्ञिऋद्धस्येत्यादिविशेषणान्वयोनदेव
दत्तस्यगुरुकुलमित्यादौतुगमकत्वाद्भवत्येववृत्तिः ।एवंराजपुरुषइत्यादौविशेषणपदसंख्यानवगमोप्येका
र्थीभावकृतः संख्याविशेषप्रकारेणतत्तदर्थभानेपृथगुपस्थितेस्तंत्रत्वाघ्याघयइत्यादितोबहुत्वेनैवत्रिचतु राम॰ १४३

उत्कर्षत्वं ४ अपेक्षितत्वमनुभावनत्वभेद एव २

तिकारके इति सूत्रे भाष्ये स्पष्टं । तत्र हि निर्द्धारणे कारके षष्ठीति ब्रूयादित्युक्तं । भिदं चांत्या दित्यादौ तु सौत्रो निर्देश
इति तदाशयः । द्वंद्वः सामासिकस्य चेत्यत्र समाससमूहमध्ये इत्यर्थः समूहे षष्ठीत्येकं । पंचमी वि । यतश्च निर्द्धा
रणमित्यनुवर्त्तते विभागोत्र भेदस्तत्र निर्द्धारणे सर्वत्र यथा कथंचिद् द्वंद्वस्य सत्वेन विभक्तग्रहणसामर्थ्यादत्र भेद
एव न तु केनाप्युपात्तरूपेण भेदस्तेनैव प्रवृत्तिरित्याह । भेद एवेति । अत्र पंचम्यर्थो निर्द्धारणविषयत्वरूप एव ।
पाटलिपुत्रकावधिकनिर्द्धारणविषया माथुरा आढ्यतरा इति बोधः । एवं च तत्र योपादानत्वेन निर्द्धारणप्रतीति
रिति पुरुषोत्तमः इत्यादेः संबंधसामान्ये षष्ठी उत्तमनिरूपितेति समाससिद्धिरिति तत्र सूत्रे कैयटः । साधु ने । नि
पुणकर्मणि शुभ इत्यत इगुपधलक्षणः कः । अर्चेतश्च भेवाद्भिका ह्युरोश्च हलइत्य प्रत्ययः अर्चा चोरा
दिका तु रायासमर्थेति युत्स्यात् । अस्यापवादोयं । अप्रत्यादिभिरिति लक्षणे स्य भिति स्तोपात्ताः प्रत्यादयः । नस
त्रेचलु । लुप् शब्देन लुप्संज्ञया लुप्तप्रत्ययार्थो लक्ष्यत इति बोध्यम् । अधिकरणे किं अद्य पुष्यः । असतितदनुव
र्त्तौ अंतरंगत्वात् प्रातिपदिकार्थे स्यात् । मूलेनेति । नक्षत्रेण युक्तः काल इत्यणो लुबविशेष इति लुप् । नक्षत्रे किं
पंचालेषु तिष्ठति । जनपदे लुबिति लुप् । सप्तमी पंचम्यौ । कालाध्वनो रित्यतस्तदनुवर्त्तते तत्र पंचम्या विपरिणाम्य
ते । मध्यस्यावधिद्वयसापेक्षतया द्विवचनांतेन समासः बोध्यस्तु शक्तित्वेन शक्तिद्वयस्यानुवृत्तित्वेनेति बोध्यं । ननु
कर्त्तृकर्मरूपस्य कारकस्यैकत्वाद्भेदनिबंधनमध्यव्यपदेशासंभवात् आह शक्तिद्वयमध्ये यावदिति । कर्त्तृत्वादिशा
क्तिरेव कारकं सा च क्रियायाम्भेदेन भिन्नेति भावः यद्यप्येवध्यवधिमतोः साजात्ये गम्यमाने कालाध्वनो कार

निर्धार्यमा णाभावात् ६

त्रितये समुदाय धर्यमाः जात्यादि

243

बोधविषयइतिभावः।सत्त्विति।तरणक्रियाकर्तृत्वाहरिणांतत्कर्तृत्व मत्र।असत्त्विति।तरणाकर्तृत्वानहरिणांतत्क
र्तृत्वमत्रषष्ठीत्व।अनादरइतिविषयसप्तमी।यस्यचभावेनेत्या द्यनुवर्त्तते।अनादरेगम्यमानेसतियस्यक्रियया
क्रियांतरंलक्ष्यतेततःसप्तमीषष्ठ्यौचेत्यर्थः।फलितमाह।अनादराधिकइति।लक्ष्यलक्षणभावःषष्ठ्यर्थः।अ
नादरविशिष्टंप्रव्रजनंधात्वर्थस्तत्रषष्ठीतात्पर्यग्राहकानादरस्य प्रत्यासत्त्यापुत्रादिविषयकएवेतिभावः।स्वामी
श्वरा।शब्दपरत्वाद्विरूपाणामपीतिनैकशेषः।पर्यायांतरसंग्रहायपत्यास्वाम्यर्थेतिनोक्तं।दीयतइतिव्युत्पत्त्यादा
यमानाशरूपंदायमादत्तेइतिसोपसर्गाद्दिप्यादंतादतएवनिपातनात्कः।गवादिकंच।दीयमानेन्वेतिनित्यसाकां
क्षत्वाद्वृत्तिः।दायादशब्दःस्वामिपर्यायइत्यन्ये।षष्ठ्यामेवेति।शेषषष्ठीत्यनेनेतिभावः।तात्पर्यइति।आसेवापरस्य
तत्ररूढेरितिभावः।तात्पर्यंचतदेकव्यापारता।आयुक्तयोगेधिकरणत्वविवक्षायांसप्तमीप्राप्तौसंबंधविवक्षा
यामत्रकुशलयोगेचषष्ठीत्यर्थः।यतश्च।जातिगुणक्रियासंज्ञाभिरितिविशिष्टस्याध्याहारः।तद्विशिष्टस्यैक
देशस्ययतःस्वघटितसमुदाया त्वेतरसमुदायघटकव्यावृत्तधर्मवत्त्वबोधनं।ततएवमाभूदस्यापवादत्व
वत्प्रथमापवादत्वस्यापिसंभवात्त्वघटितसमुदायावधिकत्वेतरसमुदायघटकव्यावृत्तधर्मकरणरूपपृथक्करण
रूपनिर्द्धारणविषयत्वरूपोऽवयवावयविभावरूपश्चसंबंधोविभक्त्यर्थः।नृसमुदायावधिकद्विजेतरनरव्यावृ
त्तश्रेष्ठत्वकरणकपृथक्करणकरूपनिर्द्धारणविषयोनृसमुदायावयवोद्विजःश्रेष्ठइतिबोधः।संसर्गघटकक
रणांचश्रेष्ठत्वादिरूपमेवप्रत्यासत्तेः।अतएवननिर्द्धारणेइतिसूत्रबोधितंनिर्द्धारणस्यविभक्त्यर्थत्वंसंगच्छतेउद्भू
तावयवभेदविवक्षयानृणांमितिवहुवचनंतिरोहितावयवभेदविवक्षयानिर्द्धारणविषयेएकवचनंत्वसाधुइ

धर्मकरणकं पृथक्करणं द्वाचकात्ष ष्ठीत्यर्थः।य तइति किं।य स्जात्यादिवि शिष्टस्य से तरमावत्त दे

तर४
पा३
राम॰
१५२

फलंसप्तम्यर्थः। चर्मणीति चर्मणः फलत्वंच हननस्य तज्ज्ञानेच्छाधीनत्वात्। कर्मसंबंधस्य स्वरूपसम्बन्धेव निमि
त्तं द्वीपिचर्मणो रंडकोशस्मृगयोश्च समवाय इतरयोः संयोगः मुक्ताफलापकरणं रघुवीरे त्यादौ क्रियार्थो
पपदस्येति चतुर्थी घ्नंतीति शेषः मुक्ताफलान्याहर्तुमित्यर्थः। यस्यच भावः क्रिया ततः ज्ञापकक्रियाश्रय
वाचकाद्गोपदद्दुह्यमानपदयोरपि सप्तमीक्षिप्त क्रियाश्रयः कर्त्ता कर्मचतत्र ब्राह्मणेषु धीयानेषु गत इति
कर्त्रर्युदाहरणं कर्मण्याह। गोष्विति। तत्र काचित्क्रिया स्वाधारकालेनान्यां क्रियां परिछिनत्ति यथाप्रकृते काचि
त्स्वाधारकालाव्यवहितपूर्वकालेन। यथा गोषु धोक्ष्यमाणास्वित्यादौ काचित्स्वाधारकालानंतरकालेन य
था गोषु दुग्धास्वित्यादौ ज्ञापकत्वं सप्तम्यर्थस्तस्य च भावलक्षणमित्युक्तेः क्रियायामेवान्वयः लक्ष्यलक्षणभा
वः शब्दबोध्यएवेतच्छत्रप्रवृत्तेर्निमित्तं नतु तस्य भूयोदर्शनादित्युपमानांतरगणग्रहणापेक्षतेति बोध्यं। अन्य
थादित्ये आदित्ये तमानष्टमित्यादावेवस्यात् नतु प्रकृते कदाचिद्गोषु दुह्यमानास्वसौगतः। इदं च मानांतरेण ज्ञा
तत्वरूपस्यार्थस्य कालविशेषादिज्ञापनार्थं यत्र शब्दप्रयोगस्तत्रैव प्रवर्त्तते भाष्यस्वरसात्। राहूपरागे स्नायादित्य
त्र राहूपरागपदेन तदाश्रय काल इत्युच्यत इति। अधिकरणसप्तम्यैव विवाहे नांदीमुखं कुर्यादित्यत्र विवाहपदेन तत्स्था
काल उच्यते। गवां दोहे आगत इत्यत्राप्यधिकरणसप्तम्यैवेत्यन्यत्र विस्तरः। अर्हाणां। कर्तृत्वाहर्हाणां तद्विपरीतस्य अ
र्हाणामकर्तृत्वेनर्हाणां च कर्तृत्वे इत्यर्थः। वाक्यचतुष्टयमेतत्। कर्त्रस्य म पेकायकर्तृत्वसम पेकाहत्वं लक्ष्य लक्षण
भावा विवक्षार्थमिदं। सत्स्विति। संतो हि तरणक्रियाकर्तृत्वाहाः तरणक्रियाकर्तृत्वं तरणक्रियानर्हत्वादिकमपि
सत्संबंधिश्च सकर्त्तृक मासन मितिबोधः। स्वक्रियाधिकरणकालवृत्तित्वसंबंधः। असत्स्विति। तरणक्रियाकर्तृत्वानर्हाणां तदकर्तृत्वसमत्र। यद्यपि स्थितिक्रिया
कर्तृत्वार्हत्वेन दर्शितं तथाप्यसतां १

रूभयो ४

दुह्यमानप
देन ७

गां २

त्वेसप्तमील
सप्तम्यांत
पिक्रियावा
काद्धातोर
प्यमासाम
धिकरणप
च्छ
चा २

पश्यपकष्टंश्रितोरामंभित्रः। अत्रकष्टश्रितयोः परस्परसंबंधाभावेनैकोपस्थिति जनकत्वेनासमर्थ्यं इ

त्याख्यानात्। पचंतंदेवदत्तंपश्यत्यादिप्रयोगदर्शनात् स्थानिनोपिलटः प्रक्रियार्थे विहितस्याप्रथमासामानाधिकरण्यमनुमीयतइति। अत्रानुमानेसौत्रानुवादस्यचानुकूलस्तर्कः। अत्रप्रक्रियार्थे विहितस्येत्यनेनान्यस्यापि प्रक्रियार्थं कल्पितस्य लोकेबोधकत्वंसूचितमित्यन्यत्रविस्तरः। समर्थः किं सहसुपा। सुबामंत्रितइत्यतः सुबितिवर्ततेसुबंतंसहितंसुबंत समाससंज्ञकमित्यर्थः। समस्यतेइसुक्ति स्त्वबुधानांभिन्नयोः शब्दयोरनेनसंश्लेषः क्रियतइतिप्रतिपत्तिस्तदनुसारेणसंपूर्वकास्यतेश्चसंश्लेषोर्थः। प्राक्कडारादित्यत्रप्राक्ग्रहणमावर्तते। तेनप्राक्समाससंज्ञकाभवंतितत्संज्ञाः संतोव्ययीभावादिसंज्ञकाइत्यर्थो न्तयोः समावेशइतिभाष्ये स्पष्टमन्यथाकडारत्वात्पर्यायः स्यादितिदिक्। अत्रसुबित्येकत्वंविवक्षितं तेनमहिष्याअजायाश्चक्षीरमित्यत्रसुबंतस्यसमुदायेननक्षीरशब्दस्यनसमासइतिकैयटादयः। परेतु। अनुवाद्यत्वादेकत्वाविवक्षैवकिंचतद्विवक्षायामेकेनैवकेनचित्सुबंतेनकिंचिदेकंसुबंतंसमस्यतनत्वन्यैरन्यानितस्मात्सुबित्यादौजातिविवक्षाएवंचयथालांगग्रहणेनस्वांगसमुदायस्यनग्रहणंस्वांगत्वस्यप्रत्येकसमाप्तत्वात्। एवंसुबंतत्वादेरपिप्रत्येकसमाप्तत्वेनसुबंतादिग्रहणेननसुबंतादिसमुदायस्यग्रहणमितिनोक्तदोषः स्पष्टंचेदंमतुप्सूत्रेसमर्थसूत्रेचभाष्येतत्रत्यकैयटादीनांतुप्रमादः। अतएवविभक्तिश्चेतिसूत्रेप्रतिप्रत्ययंविभक्तिसंज्ञेतिपक्षेप्रथमयोरित्यादौविभक्तिसमुदायस्यविभक्तिग्रहणेनाग्रहणात्प्रथमयोः प्रत्यययोरेवग्रहणंप्राप्नोतीतिउक्तंकैयटेनेत्यन्यत्रविस्तरइत्याहुः। अनुव्यचलदिति अनेनाभ्यचलदित्यनेनवेत्याचलदित्यनेनयुगपत्समासः। अनुइतिसुबंतेनव्यचलदितिसमुदाय

लटोप्रथमासमानाधिकरणं भवितुमर्हति कुतः अप्रथमासमानाधिक[illegible]णशास्त्रादेशस्थानिलात् यन्नैवंतन्नैवंयथालिटः।२

244

रामः
२५५

राद्व्यक्तीनां भानं ननु चित्वचतुष्ट्वादिना तथा रत्नैराजत्वादिनैकानेकव्यक्तिभानं तात्पर्यवशान्नत्वेकत्वादि
त्वादिना। एवं तावकीन इत्यादौ संबोध्यत्वेनैवैकानेकव्यक्तिभानं। नत्वेकत्व बहुत्वादिना विग्रहवाक्यस्यै
कवचनत्वारोपेण शास्त्रप्रवृत्तिमात्रेण न तु तद्बोधः वृत्तिस्वभावविरोधादिति मंजूषायां विस्तरः। गमकत्वाद
व शिवस्य भगवतो भक्त इत्यर्थे शिवभागवत इति। अथः मूले तिसूत्रभाष्यप्रयोगः परं तु तत्र वृत्तिरेव न तु शि
वस्य भगवत इति वाक्यं साधु। तत्र भगवद्भक्तस्य दृष्टेण। शिवपदेन भगवद्भक्तस्य समासस्य युगपदेवेति बोध्यं।
च६ तथोपस्थितिश्च समुदायशक्तिसाध्याः। एवं लक्ष्यशक्तित्यागे मानाभावात् प्रत्येकशक्तिसहकृतया समुदाय
शक्त्या तथोपस्थितिरयमेव चैकार्थीभावः। जहत्स्वार्था वृत्तिः पदानामानर्थक्यमिति निष्कृष्टं महावाक्यं सुपया
मित्यादावव्याप्तिनापत्तेः भूतगत्याश्रयमनुसत्यां गतावयुक्तं। तदुक्तं हरिः। जहत्स्वार्था तु तत्रैव यत्र रूढि
र्विरोधिनीति। अवयवार्थविरुद्धोयत्र समुदायार्थस्तत्रैवसेति तदर्थः। यथा गोरथस्य कृष्णसर्प पौ दो। परिभा
षेयं। सा च पदविधिरिति सूत्रस्थस्मात्समासेऽगृह्यते संग इत्यादौ समासग्रहणाच्च गतिर्गताविति सूत्रे पदस्येत्य
धिकारात्समर्थपरिभाषास्थितिरिति कैयटः। ग्रस्यापि पदत्वेन सुवंतत्वेन वाप्यत्रसान्नाहोद्देश्यता तत्रैव प्रवर्तते।
तेनान्यासादितरेत्यादौ नास्याः प्रवृत्तिः। एकार्थीभावश्चालौकिकविग्रहवाक्यकल्पतयचाशास्त्रादौ द्वितीयासा
मानाधिकरण्येद्वयोर्लकारेषि तत्कल्पनात् तथा अन्यपदार्थे समर्थस्यार्थ इत्यनुवादस्वलाद्रस्पतत्त्वकल्पनेति।
तथा च शास्त्रविधायकभाष्यं नस्यात्प्रथमासमानाधिकरणेना परिनियोगादादर्शानुपपत्तिस्तस्यक्वापि प्रयोगाभा
वादित्याशंक्यादेशे सामानाधिकरण्यं इत्यवमानाद्रुतत्वं प्रकृतेरपि तद्भवतीति। तत्र कैयटः। सिद्धानां शब्दानां

तिशास्त्रांतरोक्तमहासंकरणेनास्यतदर्थकतयासमासशास्त्रेप्रथमानिर्दिष्टमप्रधानत्वसमानाधिकरणोपस
ल॰श॰शे॰पृ॰ २४५ र्जनवदितिवाच्यार्थमिष्यनोप्रधानत्वस्यसंबंधिकत्वाद्यंप्रतिपदप्रधानंतंप्रतितदुपसर्जनंसंज्ञमित्यवगतेर
दोषादितिभाष्येणेवसमाधानेअक्रुतैनराजभिरूपितमप्रधान्यंकुमार्या इतिनतदपेक्षोस्यपूर्वनिपातः।नन्वेवं
पूर्वकायाद्यसिद्धिःकायनिरूपिताप्राधान्यस्यपूर्वपदार्थेभावादितिवाच्यं।समासशास्त्रस्यप्रथमानिर्दिष्टश
ब्दगताप्राधान्यस्याश्रयणेनादोषात्समासशास्त्रेयंप्रतिपदप्रधानंतंप्रतितदुपसर्जनमित्यर्थात्।भवतिश्रि
१४५ तान्प्रतिद्वितीयांततथा।सहयुक्तद्वितीयांतार्थस्यशब्दगुणा द्यन्वयित्वभावरूपाप्राधान्येपितत्समभिव्याहृत
प्रथमाद्यंतार्थेतदधीनत्वरूपाप्राधान्यप्रतीतेः।अतएवसमकक्षयोरप्येकस्य परेणसहागंतव्यमितु
क्तेः।स्वेदस्यते।प्रकृतेपिद्वितीयांतंश्रिताद्यधीनंतंविनासमासाघटकत्वात्श्रितादिकंतुतंविनापिसमासांतर
घटकमितिद्वितीयांतस्यश्रिताद्यधीनता।एवमन्यत्राप्यूह्यम्।यस्यशब्दस्यसमासविधौयत्प्रथमानिर्दिष्टंतं
प्रतितदुपसर्जनमितिवक्तव्यमितिवार्त्तिकप्रत्याख्यानायतद्भाष्यप्रवृत्तेः।भाष्येपियंशब्दंप्रतियत्प्रथमानिर्दिष्टं
मप्रधानंतंशब्दंप्रतितत्प्रथमानिर्दिष्टंवाच्यंयदुपसर्जनमित्यर्थस्यैवोच्चितत्वात्।अतएवयंयदितिभिन्नलिं
गनिर्देशः।बहुब्रीहौत्वेकविभक्तौतेवोपसर्जनत्वमिति।अनुपदमेवस्फुटीभविष्यति।अन्वर्थविरोधान्नानेने
तिभाष्येसिद्धांतइतिवोध्यं।यत्तु।अर्थगताप्राधान्येनान्वर्थत्वेपिपूर्वकायादौनदोषोन्वर्थसंज्ञाहियत्रसोर्थः
संभवतितत्रप्रवृत्तिनिमित्तापेक्षाःप्रवर्त्ततेऽन्यत्रतुविधानसामर्थ्यात्तन्निरपेक्षाःयथास्वादीनांकर्मप्रवचनी राम॰

स्यस मर्थत्वात्। सुपेति। इदं लक्षणमधिकारश्च। अंत्ये फलं तु द्वेवः करोति मातुः स्मरतीत्यादौ विशेषणसमा
सषष्ठीसमासयोरभावः। सुपो धा। अंगनिमित्तस्य सुप इत्यर्थः अमवारणाय अंगस्य सुप इति नोक्तं। एवं निपातइ
ति। भूतशब्दस्यैवेत्यर्थः। अन्यथा विनिगमनाविरहेण प्रथमानिर्दिष्टत्वाविशेषादनियमः स्यादिति भावः। अ
तएव निर्देशादौ दृशौ विषये ऽनयवहारक सामर्थ्यमस्य प्रवृत्तिः विस्पष्टपटुरित्यादावपि विस्पष्टादीनिगुण
वचनेष्विति गमकं बोध्यं। तत्र हि विस्पष्टमित्यादि पठित्वा दिविशेषणमिति कैयटे स्पष्टं। इवेनेति। हरीतकीं भुंक्ष्व
राजन्मातेव हितकारिणीमित्यादौ साध्वेवेति। समानाधिकरणे प्रथमा अभिहिते प्रथमेति वा किं कस्यारस्येनप्र
थमायास्तत्र तत्र कारविभक्तित्वात् किपरभाष्येणैव क्रियायोगएव प्रथमायाः प्रवृत्त्या मातेति प्रथमाया मातृसदृ
शामित्यर्थे ऽसाधुत्वादित्यलमत्र विस्तरः। एतद्योगविभागसिद्धसमासस्य विशेषसंज्ञानसत्येव तत्र दधिकारेष्व
पाठात्। जीमूतस्येवेति। अन्ययथार्थत्वादिप्रयुक्तो व्ययीभावस्तु न तत्र तस्यैवेति निर्देशात्। अव्ययी। अनव्ययम
व्ययं भवतीति प्रवृत्तेरर्थः उपसंख्यानमिति कर्त्तरि ण्यः। महासंज्ञाकरणं प्राचामनुरोधात्। योगो विभज्यत इति
भाष्येत्विदं न दृश्यते। अपदिशमित्यादि मांतानां स्वरादिपाठादव्ययत्वं। अपदिशनेत्यादि तु चिंत्यमेवेत्यन्ये ननु
५२ समासगतेंतर्वर्तिन्विभक्त्या अप्रयुज्यमानत्वे आश्रीयमाणे कष्टश्रितादौ श्रितस्य पूर्वं निपातापत्तिर्निर्दिष्टपदं च व्य
र्थमत आह। समासशास्त्र इति। समासविधायके शास्त्र इत्यर्थः। न च राज्ञः कुमारीं श्रितो राजकुमारीश्रितः इत्य
त्र द्वितीया श्रितेति सूत्रे प्रथमानिर्दिष्टत्वेन कुमारीशब्दस्य पूर्वनिपातापत्तिरिति वाच्यम्। अप्रधानमुपसर्जनमि

ल॰श॰शे॰पू॰ २४६

246

त्वेऽस्वत्वंपरिनिष्ठितविभक्त्यासमासेचेदमेवज्ञापक अयंपन्नास्त तुरत्वेतुल्यार्थेतिसूत्रेभाष्ये ।प्र
त्यमांतेनसमासइतिपक्षोप्यनेकमितिसूत्रेभाष्यइतिकेचित् । परंतु अनेकमितिसूत्रेभाष्येसमासार्थवि
ग्रहेप्रत्यासत्त्यासमासापेक्षयानियतविभक्तिकस्यानेनोपसर्जनत्वंयुक्तंराज्ञः कुमारीराजकुमारीत्यत्रपरिनिष्ठि
तविभक्त्यापिसमासस्यसत्वान्नतदपेक्षयाकुमार्यानियतविभक्तिकत्वमितिनतस्याउपसर्जनत्वमित्युक्तं चित्रगु
रित्यत्रचगोपदस्यानेनोपसर्जनत्वसंज्ञांकृत्वानेकग्रहणंप्रत्याख्यातं बहूनांसमासस्तुतद्धितार्थेत्यनेनोत्तरपदेद्वि
गुविधानाज्ज्ञापकात्सिद्धइतिचोक्तं । एवंचोत्तरपदेनपरिमाणिनेत्यपिप्रत्याख्यातं । अतिप्रसंगत्वनभिधाना
न्नतदुक्तमनेकवचनमुपसर्जनार्थंनवेकविभक्तित्वादिति । वार्तिककृतान्वर्थत्वानुक्तेस्तद्रीत्याप्रयोजनवार्ति
कंनवेतितत्खंडनंभाष्यरीत्यात्वद्रीत्यातदप्राप्तिरेवात्रेतिबोध्यं । अन्यथाचित्रगुरित्यस्याविग्रहेद्वयोरपिनि
यतविभक्तितयाकिमपेक्षंगोशब्दस्यनियतविभक्तित्वंस्यात् । एकस्यानियतविभक्तित्वेहितदपेक्ष ममस्यत
त्वंवाच्यंसमासापेक्षंनियतविभक्तित्वमेवयुक्तमाश्रयितमन्यथासभार्यइत्यत्रोपसर्जनह्रस्वानापत्तिः सहशब्द
स्याव्ययतयाविभक्तिमात्राभावेनलुकाउत्पत्तेरेवान्वाख्यानेनचानियतविभक्तित्वाभावात्तदपेक्षनियतविभ
क्तित्वस्यभार्यायांतत्राभावेनोपसर्जन त्वानापत्तिः ममतुसमासस्यानियतविभक्तित्वात्तदपेक्षंतत्वमस्त्वेवेति
नदोषइत्याहुः । गोस्त्रियोः । अत्रस्त्रीशब्दः स्वर्यतेतेनस्त्र्यधिकारोक्तचातुर्थिकप्रत्ययलाभः उपसर्ज नस्येति
गोस्त्रियोर्विशेषणांप्रत्ययग्रहणविभाषयाचस्त्रीशब्देनतदंतग्रहणात्ताभ्यांचप्रातिपदिकविशेषणात्तदंतविधिरि राम॰ २४६

यत्वमितिप्रथमानिर्देशसामर्थ्यात्पूर्वादीनांप्रवर्ततेइति। तन्न। निर्विभक्तिकस्योच्चारणासंभवेनतत्सामर्थ्या
योगात्प्राथम्यादन्वितार्थकत्वाद्ध्रुवत्वाच्चप्रथमैवोच्चारितेमस्यवक्तुंशक्यत्वादित्यलं। उपसर्जनंपू। समा
सइत्यधिकृत्ययोगपतावत्त्वेनसप्तम्याविपरिणम्यतेतदाह। समासेइति। नचराज्ञः कुमार्याइतिपरिनिष्ठि
तविभक्त्यासमासेकुमार्याअपिपूर्वनिपातापत्तिरितिवाच्यम्। षष्ठ्यंतयोः समासेर्थाभेदात्प्रधानस्यापू
र्वनिपातइतिभाष्यप्रणासमाधानात्। अर्थाभेदात् अर्थस्यप्रधानस्याभेदात्समस्यमानराजपदार्थेनिरू
पितसंबंधाभावात् अस्यषष्ठ्यंतस्यप्रथमानिर्दिष्टत्वाभावान्नपूर्वनिपातइतितदर्थः। अयंभावः षष्ठीत
त्पुरुषेयेनसुबंतेनसमासस्तदर्थनिरूपितसंबंधाद्यर्थकमेवषष्ठ्याद्यंतंगृह्यतेतदेवचतत्रप्रथमानिर्दिष्ट
मितितदुक्तंकैयटेनराज्ञः पुरुषस्येत्यत्रराजापुरुषापेक्षयाप्रधानंभवतिनासौभिद्यतेराजापेक्षयानव्य
तिरिच्यतेइत्यप्रधानस्यैवपूर्वनिपातइति। उक्तरीत्याप्रधानंषष्ठ्यंतमेवतत्रप्रथमानिर्दिष्टंप्रधानमि
तितद्भावः। यत्तूपसर्जनसंज्ञान्वर्थत्वादप्रधानस्यैवेत्युपसर्जनंपूर्वमित्यत्रकैयटस्तन्नेत्युक्तमेवेत्यलं।
प्रथमानिर्दिष्टमित्यतोनुवृत्तंसमासइतितदर्थंविग्रहपरमित्याह। विग्रहेइति। नियतेति। एकग्रहणादवधार
णगर्भसमाससंज्ञाभिरितिभावः। निष्कौशांबिरित्युदाहरणं। परिनिष्ठितविभक्त्यापिसमासेननिष्क्रांतंनिष्क्रां
तेनेत्यादिक्रमेणतस्यैनियतविभक्तिकतयाकौशांबीपदस्यतदपेक्षयानियतविभक्तिकत्वादनेनोपसर्जन

कुमार्ययि...
क्रपितसंबं...
त.५

ल०श०शे०पू० नापीदं सिध्यतीतितद्रूपमासे: । दिश शब्दस्य शरदादिषु पाठेपि लिंगविशिष्टपरिभाषयात्रनटच् । समासांतप्रक
२५७ रणे लिंगविशिष्टपरिभाषाभावस्य आर्षकैभाष्यउक्तत्वात् । एवंतदिशाशब्दाकारांतप्रकृतिक एवेतिमतेटच:
प्राप्तेरेवाभाव: । अमरस्तारस्यादिश शब्देनाविग्रहेतुनहृस्वप्रयोजनं । उमादाविति । आदिनैकविंशतिभारद्वा
जंसप्तगंगमित्यादिसंग्रह: । विभक्तीत्यादेरिति । विभक्तिशब्देनतदर्थोलक्ष्यतेवचनशब्द: कर्मसाधन: प्रत्येकं
व ५ संबध्यते । विभक्त्यर्थस्याश्रुतत्वात् व्ययस्यैवविशेषणमितदाह । विभक्त्यर्थादिष्विति । अत्रसुवंतेनसमासमर्थेने
तिविशेषणमतएवतदुत्तरं विभक्त्यंतभाविशेकार्थीभाव । द्वितीयाश्रितेतिपादोसमर्थेनेत्यर्थ: । अतएवकष्टंश्रित
247 स्यतिपरिनिष्ठितविभक्त्यासमासेपुनरपदीयविभक्त्यंतांतभावेगानस: । अतएवकष्टश्रितस्यधनमित्यादोषष्ठीद्वि
तीयांतसमर्थमित्यर्थोत्रदर्थंतिभावेएकार्थीभावाद्युक्तार्थत्वान्नद्वितीयेत्याहु: । हरिङीति । फलाविशेषेप्यंतरंगा
नपीतिन्यायप्रवृत्तिमभ्युपेत्येदं उभ्यो: समानार्थत्वंध्वनयताचउत्तरमेवात्राधिशब्दप्रयोग: । वचनेति । प्रत्यास
त्यायद्विभक्त्यर्थवाचकाव्ययेनसुवंतस्यसमासस्तद्विभक्त्येवयत्सुवंतंतस्यग्रहणादितिभाव: । तिङ्कृत्तद्धितस
मासैरितिभाष्यसंमत परिगणनाच्चतेनाभिहितेसप्तमीत्यपिबोध्यं । अतएवगृहस्योपरि इत्यादौनसमास:
उप रिस्याधिकरणशक्तिप्रधानत्वेपियेनसुवंतेनसमासस्तद्घटकविभक्त्यर्थवाचकत्वात् । अधिहरिभक्ति
रित्यत्रहर्यधिकरणिकाभक्तिरितिबोध: । नचप्रतेहरेस: सप्तमीत्यादितिसूत्रसंमतसप्तम्यर्थमात्रवृत्तिप्रति
रूपाव्ययेचरितार्थस्यास्याधे: शौंडादिपाठितत्वेनपरत्वात् ... त्विगानुसारेण । वस्तुतोमध्यार्थकसमयाशर राम०
सप्तमीशौंडैरित्यनेनवाध:स्यादितिवाच्यं । आधेयप्रधानस्यैवाधेस्तत्रपाठात् । विधानसामर्थ्यादिति । एतत्स्वर १ = २५७

त्याह उपसर्जनं य इत्यादि ।गोकुलं राजकुमारीपुत्र इत्यादौ तु न दोषः ।महासंज्ञाकरणेन येन शब्देन समासवि
धीयते प्रथमानिर्दिष्टं तस्य तं प्रत्येव उक्तरीत्याऽप्रधानत्वेनोपसर्जनत्वात् प्रत्यासत्यातदंततत्समासप्रातिपदिको
पस्यैव ह्रस्व इत्यदोष इति भाष्ये स्पष्टं तत्र हेवं भाष्यमप्रधा नमुपसर्जनमिति संबंधि शब्दावेतौ तत्र संबंधादेत
दंतव्यं यं प्रतिपदप्रधानं तस्य चेत्सोंतो भवतीति ।यत्प्रथमानिर्दिष्टं तस्य तद्वृत्तिसमासस्य सोप्रधानशब्दोंतो
भवतीति तदर्थः ।यद्यपि कुक्कुटमयूर्याविति द्वंद्वे बहुव्रीहाविव एकविभक्तौ त्वुपसर्जनत्वं द्वंद्वः प्रथमांतानामेवे
ति चार्थे द्वंद्व इत्यत्र वचनस्यैतत् एकविभ क्तीत्युपसर्जनसंज्ञाप्रसक्ता नार्थकस्येवेति मते पि उद्भूतावयवभेदसाहित्यप्र
तिमत्पदार्थस्य तत्त्वमस्ति सर्वत्र द्वंद्वेसा हित्यमेव विशेष्यमिति चार्थसूत्रे भाष्ये स्पष्टं तथापि भाष्ये द्वंद्वेनेति
वचनारंभान्न दोषः अत एव कुमारी भिक्षुब्राह्मणः कुमारीत्यत्र ह्रस्वो न ।प्रथमानिर्दिष्टमित्यादेः शास्त्रीय
स्ये वाप्रोपसर्जनस्य ग्रहणात् ।अत एव गोवक्षाय एषिणादौ वक्षयणी शब्दस्य गुणशब्दत्वादप्रधानत्वे पि तदं
तस्य ह्रस्वो न ।एत च्चोक्तौ गणपाइति सूत्रे भाष्ये स्पष्टं ।अतिराजकुमारि इत्यादौ स्त्रीप्रत्ययतदादिनियमनिषेधा
त् राजकुमारीत्यस्य स्त्रीप्रत्ययांतत्वं न च तस्यात्यर्थं प्रत्युपसर्जनत्वेन कथं स्त्रीप्रत्ययांतत्वमुपसर्जनस्यैवेत्यत
तु२ आत् प्रत्यासत्त्यानाद्दशाद्युपसर्जनत्वस्यैव निषेधविधिमित्तत्वात् ।अस्य चातिक्रांतार्थं प्रत्युपसर्जनत्वे पि राजकुमारी
स्येतदर्थं प्रत्युपसर्जनत्वमेवेति दिक् ।नाव्ययीभाव ।अपंचम्या इत्य मत एव विशेषणेन लुगभावस्य तु नाप्युछेदात्
अपदिशमिति ।यद्यपि नपुंसकह्रस्वेनापीदं सिद्ध्यति ।तथापि चित्रगुरित्याद्यर्थं भावश्यकेन गोस्त्रियोरित्यनेन

एवं
स्त्रीप्रत्यये
दादिनियम
दितिवाच्यं
यस्य स्त्रीप्र
यांतत्वमा
यंतदर्थं
व२ स्त्रीप्रत्ययस्य
नुपसर्जन त्व

तत्तदर्थकेन १

घटकतया गृहीताव्ययेनैवायं समासः । अत एव यथासादृश्य इति सूत्रे सादृश्यसंपत्तीति प्राप्नोतीति भाष्ये उक्तं य
ल॰ श॰ शे॰ ९ १४८ थाशब्देन तु भवत्येवोत्तरसूत्रारंभादिति भावः । ननु नित्यसमासत्वाद्वाक्यं दुर्लभमत आह । प्रतिशब्दस्येति द्वंद्वा
चामनुरोधेन । वस्तुतः प्रतिस्थानमित्यादौ षत्वाभावसंपादनेन साचरितार्था नत्वसादृश्यमर्थे प्रतिप्रसर्प्यमिति स
रूपसूत्रादिस्थभाष्यप्रयोगाद्यदा द्विर्वचनं तदा प्रतिशब्दस्य वीप्सार्थत्वाभावात्समासाप्राप्त्या वाक्यं साध्विति त
क्रमेति ६ त्वं रत्नो द्विर्वचनं तु न समासेन वीप्साया द्योतितत्वादिति हयवरट्सूत्रे कैयटः । प्रतिना तस्या उक्तत्वादिति तत्त्वं । श
क्तिमनतीति । परावरयोगे चेति तत्क्त्वा परावरत्वं च बोध्यं । हरेः सादृश्यमिति । हरिणा सह इत्यलौकिकं वा समासेने वा दे
ति । अत्र सूत्राले खो वैचित्र्यार्थः यथासूत्रे सूत्र रत्नस्य पूर्वत्रापकर्षेण वैचित्र्यायत इत । अनुज्येष्ठं कार्य
कृतमनुज्येष्ठं प्रणाम इत्यादौ करणत्वेनान्वयात्परिनिष्ठितविभक्त्या समासमभिप्रेत्याह । ज्येष्ठस्यानुपूर्व्येणेति ।
आनुपूर्व्यं क्रमः पूर्वक्रमेणेत्यनुपूर्वमिति सूत्रगृहीताव्ययेनाप्यनु नासमास एतस्मात्सूत्रप्रयोगात् । युग
पच्छब्देन तु न समासः सूत्रगृहीतत्वात् । उभयत्रापि स्वार्थे व्यञ्जत इत्यनयन्नाह । चक्रेण युगपदिति । युग
भूते इति । व्याख्यानात्सादृश्य इति स्वार्थे व्यञ्जि इति भावः । संपत्तिसमृद्ध्योः पर्यायत्वमाशंक्याह । ऋद्धेरिति । धन
धान्यादेरित्यर्थः । अनुरूपो योग्य आत्मनः समस्समानोत्तरपदस्य भावः प्रवृत्तिनिमित्तं दात्रत्वादि संपत्तिरि
त्यर्थः । सदात्रमित्यस्य क्षत्रियाणां योग्यं दात्रमित्यर्थः । तृणमपीति । साकल्यबोधकाव्यये न समासः समासस्य
नित्यत्वादस्वपदविग्रहो दर्शितः तृण इति सहेत्यलौकिकं । अपरिस्पन्देति । परावरयोगे चेति तत्क्त्वा तद्योग रामः १४८

148

योगे द्वितीयाविधानस्य दूरार्थकाराच्च स्योगे पंचमीविधानस्य चारितार्थ्यादिदमप्युक्तं । समयानिकषारात्
शब्दा अधिकरणशक्तिप्रधाना इति समीपादिमात्रवाचित्वाभावान्नैतैः समासः समीपे इति हि तेषामर्थः । अ
व्ययत्वं पक्षेन विभक्त्यर्थसमीपादिमात्रवृत्त्यव्ययस्यैव तेन समासात् । उपशब्दस्तु तन्मात्रवाची । कुंभस्य सामीप्य
नायंतपाइ वंत इति बोधादिति बोध्यं । सुमद्रमिति । वचनग्रहणात् समृद्ध्यादिवाचकत्वेऽव्ययीभावः । समृद्धा इत्यादौ तु सुश
तिभाष्ये ५ ब्दो द्योतकः समृद्धा भद्रा इति बोधादिति नायं निपातानां वाचकत्वं चेत्तत्रैव भाष्ये स्पष्टं । उपदेशादावुपस्य समीपवर्त्ति
पदार्थबोधकत्वेन समीपमात्रबोधकत्वाभावान्नाव्ययीभावः । विगतेति । अरूढस्याभाव इति यावत् । अर्थाभावश द्वं ७
ब्देन समस्यमानपदार्थाभावस्यैव ग्रहणाद् दुर्नन्तेन सिद्धे सिद्धे नयन्नाह । मक्षिकाणामभाव इत्यादिना । अर्था त्रा न्त्र
भावशब्देन उत्तरपदार्थाभावस्यैव ग्रहणं व्याख्यानात् । नञ्तु नायं समासः । अर्थाभावशब्देन नञ उपादानेन स
ङ्गृहीतार्थ्येनैतत्समासाप्राप्तेः । नञ्च न स्यादेव उपपादयिष्यते न चाभावेऽव्ययसिद्ध्यर्थं ग्रहणं व्यर्थं । प्रतियोगिम्
त्वद्धि विद्यमानार्थसमानाधिकरणभाववाचकेनैव समासोऽयं यथा स्यादित्यर्थं तत्सत्त्वान्नेनाभावार्थे निराशश
श्रृंगादिशब्दानामयं न । प्रागभावार्थेन च तेन न समस्तत्वाच्च ग्रहणं चरितार्थं तदुदाहरणं निर्हिमं निःशीत
मिति वस्तुत्यमेव युक्तं । अतसंदर्पत्वाभावात् । अतिहिममित्युक्ते तदतिशयस्यैव प्रतीतेः । अत्ययशब्देतेः सूत्र
ग्रहीतायत्वाच्चेति दिक् । संप्रतिनयुज्यत इति वृत्तौ युजि क्रियां तर्भाविणोकार्थाभावः । अतिनिद्रमासीरित्यादौ
त्वाव्यवहारविषयेति निद्राशब्दस्य तन्नामेति बोध्यं । शब्दप्रादुर्भावेऽस्य शब्दविषयप्रकाशार्थेनाव्ययेन स
मास इत्यर्थः । भाष्यप्रयोगेति । मन्त्रः परस्मिन्निति हेतोः प्रयोगः एतद्भाष्यप्रयोगादेतल्लभ्येत तदर्थबोधकपद

149

योनतिङन्तविबोधकस्य ग्रहणे नादोषात्। यथाशक्तीत्याद्युदाहरणे तदर्थक एव सः। यद्यपि यथाश ब्द उपमा
नत्वं द्योतयतीति सकलाभियुक्तोक्तेर्विशेषवानित्यादि प्रागुक्तबोधोत्तरमुपमानं देवदत्तादिमित्युपमेयो यज्ञ
दत्त इति बोधः। उपहीतविशेषधर्मरावच्चसाधारणधर्मः लक्षणम् लक्षणंनान्येबोधस्थल इवोभयोः शा
ब्दत्वं सुवचम्। अतएवोपमानोपमेययोः सामानाधिविभक्तिकत्वसिद्धिः। एवं च पूर्वपदार्थप्राधान्याभावेनना
त्राव्ययीभावप्रसक्तिस्तथापि प्रसिद्धत्वात्प्रकारवचनस्यैवात्र ग्रहणे तत्सामर्थ्याद्धि मु नीलादाविव तदभावे
वि समासः स्यादतो सादृश्य इति सूत्रे कृतं तत्र कृते तु तद्भिन्नसादृश्यत्वस्यैवात्र सूत्रे ग्रहणं। न च यथावल
मित्याद्युदाहरणे प्रकारवाचि थालं तस्यैव ग्रहणमस्तु सादृश्यसंपत्तौ त्वनेन च समासोस्त्विदं सूत्रं च मास्तु
पूर्वसूत्रे यथाग्रहणं च मास्त्विति वाच्यं। एतत्सूत्रारंभसामर्थ्येन तत्र तदप्रयोगात्। तत्राप्यर्थे साधोरन्यत्रार्थे
साधुत्वापत्तेश्चेदमेव सूत्रं समस्तुल्यस्य तदर्थकस्य यथाशब्दस्य सत्वेमानं तथा च भाष्ये असादृश्य इत्युच्यते तत्रे
दं नासिध्यति यथाशक्ति [illegible] यथावलं प्रकारे स्यात्तत्सादृश्ये एव कृत्ते रित्याशंक्य वीप्सादिवाचि
नो त्र सूत्रे यथावलमित्युदाहरणे च ग्रहणमित्यर्थको त्वनंतरमप्ययः प्रकारवचने थाल् तस्य ग्रहणं
कस्मान्न भवति पूर्वेण प्राप्नोति सादृश्यसंपत्तीति पूर्वपदार्थिणोक्तो प्रतिषेधवचनसामर्थ्यान्न भविष्यतीति
तरितं। नानेन भाष्येण प्रकृतसूत्रे प्रकारवचन थालं तस्य ग्रहणं शंक्यत इति वक्तुमुक्तं। असादृश्य इत्यस्य सू
त्रे श्रवणात्। यद्यपि तद्विस्मरणेनायं पूर्वपक्ष इत्यपि वक्तुं शक्यं तथापि सू वेण प्राप्नोतीत्यादेर

अवौध्वः। नलश्चेति। त्वेणेनसहभुंक्तेइतिबोधोत्तरं यस्त्वेणानिभन्द्रायेत्सकथमन्यलरिलजेदितिप्रतीतेः सकलं
भोज्यमतीत्यत्रैवतात्पर्यादितिभावः। अग्निं ग्रंथपर्यंतमिति। वहुव्रीहोहितीयांतंग्रंथोन्यपदार्थः। अधीतइ
त्यस्यतुनसमासेतर्भावोभानाभावात्। अंतलं साहि संचसहार्थः। अत्राग्निग्रंथसहितमितिबोधः। अग्नि
टासहेत्यलौकिकं। नचतदधीतइत्यत्रप्रसंगः वैकल्पिकत्वात्। यथासा। अत्रसादृश्य इतिछेदस्तत्रैववर्त्त मा
नइत्यर्थः। तथाहरइति। तथाशब्दस्यसादृश्यार्थकत्वेपिनसमासः सदृशइत्युक्तेनियमेनप्रतियोग्याकां
क्षादर्शनात्सादृश्यप्रतियोगिवाचकेनैवतद्बोधकात्स्यसमासात्। द्योतयतीति। सामान्यस्यभेदको
योविशेषस्तद्रूपेप्रकारेथालिति। यद्विशेषवान्हरिस्तद्विशेषवान्हद भिन्नोहरइतिबोधः। यत्तच्छब्दा
भ्यांतयोरेकत्वावगमेऽप्युपमानत्वप्रतीतिरितिभावः। सूत्रेपिसादृश्यशब्देनोपमानत्वमेव। थालसूत्रे
सादृश्यस्याप्रकारशब्देनग्रहणंतु यत्सादृश्यवान्हरितत्सादृश्यवान्हरइत्येवबोधः स्यान्नतुहरिसदृशोह
रइति। भाष्यानुसारिणस्तु। यथासादृश्येइत्यस्य यथाशब्दः श्रुतेनसमस्यते सादृश्येद्योत्येनेत्यर्थः। यथाश
क्तियथावेलमित्याद्युदाहरणं। अतएवभाष्येऽसादृश्येइतिकिमर्थं यथादेवदत्तस्तथायज्ञदत्तइत्यु
क्तेनतुसूत्रमेवकिमर्थमित्युक्तं यथार्थत्वेतुनसिद्धिः सूत्रगृहीतामयेनतेनासमासात्। अत्रचेदम
पिज्ञापकम्। नचप्रकारवचनेथाला निष्पन्नस्ययथाशब्दस्यसर्वथासादृश्यद्योतकत्वेनसूत्रे
दाहरणसंभवइतिसूत्रेयथार्थ मितिहिवाच्यं। अत्रसूत्रेऽसुमसन्नस्यवीप्सायोऽप्यताप दा

दीनां वृत्तिविषये सत्वस्यथा न तादृशीनानाव्ययेनैव समासः स्यात् । वृक्षं प्रतीति । लक्षणे प्रतिः कर्मप्रवचनीयत्वं तु प्रतेर्गि
तिगता वितिनिघाताभावाय स्याद्धुः । अक्षादयः । समस्यंत इति शेषः । परात्र यस्य एवेति । पंचिका नाम द्यूतं पंचभिः कपर्दैर्भवति
तत्र यदि सर्वे उत्ताना अवांचो वा पतंति तदा पातयिता जयत्यन्यथा जीयते । विपरीतवर्त्तने कर्त्तृत्वे नाक्षादेस्तृतीया ।
वृत्तौ परेत्तदर्थः । अक्षेणेदं परीत्य लौकिकं । नित्यसमासत्वादस्वपदविग्रहः । वैपरीत्यं च जयापेक्षयेति भावः । अक्षे
णेति । अक्षाभ्यां विपरीतं वृत्तमित्याद्यर्थे न समासोऽनभिधानात् । अक्षत्वेनैकत्वबोध एवास्य साधुत्वं न तु तेन रूपे
णानेकत्वबोधे । एकत्वादिनाबोधस्तु वृत्तौ नास्त्येवेति भाष्ये स्पष्टं । विभाषा । सुप्सुपेत्येकार्थीभावे समासस्य व्यपेक्षायां
वा   व्यस्य च सिद्धेरिदं व्यर्थं एकार्थीभाव एव समाससंज्ञादिविकल्पस्तु नेष्यते । एवं समासनिषेधसूत्राणि नित्यसंज्ञ
डे सत्र नित्यग्रहणं व्यर्थं निषेधविषये एकार्थीभावाभावेन समासाप्राप्तेः । नित्याधिकारविषये व्यपेक्षाभावेन वा
क्याप्राप्तेश्च अत एवापि लक्षणे च न चद्दुष्कां अंदान्प्रति क्वेकार्थीभावो नित्यः कृपादिकः कृत्वास्त्येव लस्यर्थे बोधनार्थं सर्वमाव
श्यकं ध्वनितं चेदं समर्थानामिति सूत्रे भाष्ये तत्प्रत्याख्यानं । एवं च विशेषणीभूते कार्थीभावस्य विकल्पादिबोधकानीमा
नि । अत एव पारेमध्ये इति सूत्रे भाष्ये एकया वृत्तिविभाषापरया वृत्तिविषये ऽनित्यो पवाद इत्युक्तं तत्र वृत्तिरेकार्थीभावः । ए
तत्सामर्थ्यादिति । अथैतत्करणस्य क्तदसंबंधेन तद्विषये एकार्थीभावस्य नित्यत्वमिति भावः । नन्वेवं सुप्सुपेत्यस्यापि नित्य
तापत्तिरेवं च भाष्ये सुप्सुपेत्युदाहरणभूते विस्पष्टपटुरित्यत्र विस्पष्टं पटुरिति विग्रहप्रदर्शनासंगतिरत आह । सुप्सुपेति त्विति ॥
एतत्समासानुवादेनैवाव्ययीभावादिसंज्ञाविधानेन सिद्धे पुनस्तैः समाससंज्ञाविधानं तदनित्यत्वज्ञापकं । उपपदमतिङ् । कर्तृ
करणे कृता । आख्यातमाख्यातेन सातत्ये बुद्धेष्या प्रसिध्या अनेकमन्यपदार्थे इत्यादौ अव्ययादिपदघटितसमासक्त

संगतिः तस्मादुदाहरणे यथालं तस्य ग्रहणं तत्र सादृश्यार्थकेन समासं कृत्वान्यत्राप्ययं प्रयोगे बाधकाभाव इत्य
भिमानेनार्थं घटितं साधुत्वमित्यजानतोऽनुत्पन्नसत्वेमानं चापश्यतः शंकेयमिति युक्तं प्रतिषेधवचनेत्यस्य प्रतिषे
धयुक्तेति तद्वचनसामर्थ्यादित्यर्थः। एवं चानुत्पन्नतत्सत्वेऽपि घटितं साधुत्वमित्यत्र चेतदेवमानमिति भावः। य
त्तु प्रतिषेध इति प्रतीकमुपादाय यथार्थे यदव्ययमिति पूर्वेण सिद्धे समासे सादृश्य प्रतिषेधार्थत्वादस्यारंभ
स्येति केचिद्व्याचक्षते तन्न। सूत्रगृहीताव्ययेन तेन सूत्रेण समासान्नियमत्वापेदायै तदर्थज्ञापकत्वस्यैवोचित
त्वात्। तत्र सूत्रे यथार्थशब्देन सादृश्यग्रहणं च। अत एव तत्र सूत्रे सादृश्यग्रहणं चरितार्थं। अत एव भगवता
सादृश्यसंपत्तीति प्राप्नोतीति युक्तं। न च सादृश्यग्रहणं गुणभूतसादृश्यग्रहणार्थं। तद्व्यानुरोधेन प्रधानन्यायप्रा
प्रवृत्तोभयत्राप्येतेन सिद्धेः। यथा योग्यता या यथा यथा वृत्ते रूपस्य योग्यमनुरूपमित्यादौ तद्वदर्थकेनापि समासस्त
द्वत्सूत्रे यथार्थग्रहणं तदर्थकान्यायपग्रहणार्थं। एवं च यथाशक्तीत्येतदुदाहरणमेवेति भाष्ये स्पष्टं।
वीप्सादावपि यथाशब्देन समासो भवत्येव यदनुत्पन्नवीप्सावाचित्वे दं ग्रहणमिति भाष्यात्। एवं च स्पष्टमेवोपक्र
मोपसंहाराभ्यामस्य सूत्रस्य विधित्वं भाष्याल्लभ्यते। अत्र सूत्रे यथाशब्देन यथार्थस्य न ग्रहणं नानाभावात् सूत्र
त्रेतु वचनग्रहणं व्यथा। विभक्तिशब्देनेति प्राहुः। यावदवधारणे। संख्यादिनेयत्तापरिच्छेदोऽवधारणं तद्द्योतकं यावदि
त्यव्ययं समस्यत इत्यर्थः। अवधारणे किं। यावद्दत्तं तावद्भुक्तं कियद्भुक्तमिति नावधारयामीत्यर्थः। सुप्प्रतिना।
मात्राशब्दोऽल्पपर्यायः सुनः सुप्प्रतिना [illegible] मत्यमहरिसा दोदोना

त०प्रा०शे० कृ०
१५१ सर्थः। दैर्घ्यसदृशदैर्घ्यविशिष्टत्वमनोरथैस्तथावोधेवगंगायाज्ञापकत्वस्यगंगासमीपइतिवोधेगंगायाज्ञापकत्वस
चनियमेनलॅमनसावोधादन्य लभ्यत्वेननोत्र तदनोधेत्वमितितात्पर्यंति नसंबंधेनान्वयेतुवनमनुगंगामन्वि
तिद्वितीयेवेतिवोध्यं।निवेष्यगंगामनुतामहानदीन्वम् मितिरामायणप्रयोगाद्वाराणसींस्वरूपेणज्ञातत्वेप्यायामवै
शिष्टेनज्ञाप्यत्वंवोध्यं।तिष्ठद्गुप्र।चेनैषांव्यंतरेप्रवेशोना तिष्ठद्गुजपन्संध्यांपश्चिमामायतीगवा।दितिभट्टि
151 श्लोकेआतिष्ठद्गुआयतीगवादितिभिन्नेपदे।इह।उक्तोदाहरणद्वये।शत्रादेशइति।प्रथमासामानाधिकरण्या
त्तदप्राप्तिः।यद्यपिपन्वन्पुरुषइतिबत्सिध्यतितथापुपायांतरमिदं।समासातश्चेति।इदमंत्येचेनान्यपदार्थेव्ययीभा
वइतिवोध्यं।पक्षेषष्ठीति।अयंभावः।महाविभाषैका र्थीभावस्यविकल्पवोधिकाव्वत्तिश्चैकार्थीभावेनित्येतियेननाप्राप्ति
न्यायेनाव्ययीभावस्तत्पुरुषंवाधेतयथैकदेशिसमासः।षष्ठीतत्पुरुषमितितन्नाभायपुनर्विग्रहणमिति।संख्यासादिविसू.त्री
स्वभावात्समानाधिकरणविषया।वंशइति।एकस्वभावःसंतानप्रवंधोवंशः।द्वौमुनी।पाणिनिकात्यायनौ।त्रिमुनि।भा
लि० ष्यकृतश्च।स्वपदार्थप्राधान्येएवायंसमासः।नन्वेवंत्रिमुनिव्याकरणमितिसमानाधिकरण्यानुपपत्तिरतआह।विद्येति।
अन्येतुवहुव्रीहौत्रिमुनिव्याकरणमव्ययीभावेव्याकरणस्येतिस्वरभेदश्चैवरवेत्याहुः।परेतु।विद्यावंशोनामगुरुशिष्य
परंपरायदीष्यतेतदातिष्ठद्गुप्रभृतिषुपाठात्साध्यमित्याहुः।मतंतुव्यस्यनुसारेण।किंचनहिद्विपुत्रो द्विपुत्रव्य
पदेशंलभते।इतिन्यायेनद्विमुनीतिव्यवहारासंगतिर्वोध्या।जन्मनोदाहरत्ति।एकविंशतीति।एकविंशतिभिरद्वाजा
वंशइतिविग्रहः।द्वत्तौतृतीयासप्तम्योरितिसू.त्रस्थभाष्यप्रयोगात्तत्सामाण्येनोपका दिप्वनयोःपाठात्यजओ राम. १५१

पोद्देश्यप्रसिध्या तेनुसमासंज्ञाविधानस्यावश्यकत्वेनाधीधिकारानुरोधात्सर्वत्र तस्य विधेयसमर्पकत्वं प्रथमानिर्दिष्ट
मितिसूत्रे समासे इत्यस्य समासत्वव्याप्यसंज्ञाविधायके लक्षणपाव्ययादीनामुपसर्जनत्वं साधयितुमशक्यमिति तदर्थं स
मासविधानं चरितार्थमिति भावः। विग्रहप्रदर्शनपरोक्तभाष्यादपि तस्यानित्यत्वं बोध्यं। लक्षणेनाभि। अभिप्रती आ
भिमुख्यस्याग्नेर्ज्ञापकत्वसंबंधेनान्वयस्य च द्योतकौ। अग्निज्ञाप्यं शलभकर्तृकपतनमिति बोधः उदाहरणे त
था बोधे चाग्न्यभिमुखत्वं शलभपतनस्य लोकप्रसिध्या मनसा गृह्यते इत्याभिमुख्यद्योतकताभिशब्दस्याग्निज्ञाप्यं
शलभकर्तृकं प्रत्यासत्याग्न्यभिमुखं प तनमिति बोध इत्यन्ये। कर्मप्रवचनीयद्योत्यसंबंधेनान्वयाद्वाक्ये द्वि
तीया तदाह। अग्निमभीति। लक्षणेनेति किं। स्रुघ्नं प्रतिगतः स्रुघ्नादागतस्तमेव प्रतिनिवृत्त इत्यर्थः। आभि
मुख्ये किं। वत्सं प्रति विद्योतते इत्यादा वाभिमुख्यद्योतनाभावे समासो मा भूदिति। अस्य समासस्य वैकल्पिकत्वेन प
दो कर्मप्रवचनीयत्वं चरितार्थं। अभिप्रतीइति किं। अग्नेः संमुखं शलभाः पतंतीत्यर्थे सांमुख्यार्थकसंशब्देन लक्षण
त्वसंबंधेनान्वये समासो मा भूदिति। अनुर्यत्। लक्षणेनेति वर्तते समयेत्यधिकरणशक्तिप्रधानं। यदिति। सामान्येन न
तकोनु ४ पुंसकं द्वितीयांतं। यं पदार्थं समयेत्यर्थो द्योत्यस्तेन लक्षणभूतेन तद्वाचकेन समस्यत इत्यर्थस्तदाह। यमिति। वनादेर्ल
क्षणत्वं समीपद्वारा स्वसामीप्येनाहि वनेनाशानिर्देशो ज्ञाप्यते। लक्षणत्वं तु वस्तु सन्निमित्तं नरुते न संबंधेनान्व
यस्तदाह। वनस्य समीपमिति। यस्य दैर्घ्यमिति। यद्दैर्घ्यसदृशदैर्घ्यमित्यर्थः। अत्रापि लक्षणत्वं वस्तु सदेव
निमित्तं। तद्भुन यन्नाह। गंगायाः आन्विति। तद्यो त्यसंबंधेनान्वयाभावान्न द्वितीया। उपलक्षितेति। दि ग्रीष्मेड

ल०श०शे० २ तिसूत्रस्थं समासे कृते समासांता इत्येतत्परं भाष्यमेकदेश्युक्तिः अधिकं ह्यव्ययविरोधादि अन्यत्र प्रपंचितं । अंतशब्दश्चरमा
१५२ वय वाची स च समुदायावयवः । अत एवोपशरदमित्यत्र नाव्ययीभावादित्यम् । अव्ययानामिति टिलोपाभावश्च सिद्धः
पूर्वभागस्याव्ययीभावत्वाभावेनानव्ययत्वात् । यत्तु कैयटेन ङ्योश्छ्रियोरिति सूत्रे समासपदस्य समासार्थविग्रहवाक्य
सोत्तरपदलक्षणयोत्तरपदावयवत्वमुक्तं तथा सरूपसूत्रेऽकृतो उत्तरपदावयवत्वमित्यपि भाष्यकारसंमतमिति तत्
न । फलाभावात् । द्विधुरीत्यादौ स्त्रीत्वस्य लोकतः सिद्धेः लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति भाष्येणोक्तेः गप्रक
152 रणस्यानियमार्थत्वाभावबोधनात् । अत एव परवल्लिंगमिति सूत्रस्थे पि द्विनावमद्वैरावमित्यादौ नपुंसकत्वसि
द्धिः । पंचराजमित्यादावपि तत्स्वव्यव्यापत्तावकारांतोत्तरपदे त्यत्रोत्तरपदग्रहणस्य व्यर्थत्वापत्तिश्च । अंतग्रहणादिसूत्र
स्थभाष्यविरुद्धं चोत्तरपदावयवत्वमेवं हि तत्र भाष्यं समासस्यांतोदात्तत्वमुत्तरपदस्यैवेति किंत्वे । आद्ये इदं प्रथम
काइत्यादौ कपोंतोदात्तत्वापत्तिमुक्त्वा लेन्व चइत्यत्रांतोदात्तत्वासिद्धिरित्युक्त्वो भयोरपि प्रकरणेनलक्ष्यानुसारात्क्वचि
दुत्तरपदांतस्य क्वचित्समासांतस्योदात्तत्वमिति । सरूपसूत्रस्थं भाष्यं तदनाश्रयणे पि योज्यपितुं शक्यं तथा हि कृत
द्वंद्वानां विभक्तौ परत एकशेष इति पदे त्र ऋक् च ऋचौ च ऋसारूप्यादेकशेषो न प्राप्नोतीति भाष्यं समासांतानां समा न २
सावयवत्वे पि तत्पूर्वभागस्य विभक्तिपरत्वाभावस्तद्विशिष्टस्य तु सरूपत्वमिति तद्भावः । न च तस्यानर्थकत्वेन तद
नुक्त्या भाष्यस्य न्यूनता द्वंद्वावयवानामर्थवतामेवैकशेष इत्यर्थे मानाभावात् । विशिष्टरूपोपादानाभावेन तत्प
रिभाषाया इहाप्रवृत्तेः । भाष्यांतरं तु तादृशं नोपलभ्यत एवेति दिक् । स च समासांतो बहुजस्य गोमज्जसित्यवस्थाया राम: १५२

अत्रेति लुगभावो बोध्यः। नदीभिश्च। अत्र बहुवचननिर्देशान्न संज्ञाया ग्रहणं नापि स्वरूपस्याशङ्कसंज्ञात्वाभ्यां। किंतु न
दीत्यर्थग्रहणं तेन तद्वाचके सर्वत्र प्रवृत्तिः। एतच्च संख्यासंज्ञासूत्रे भाष्ये स्पष्टं। समाहारे चेति। तत्रैवेत्यर्थः। एवं च तदवि
न्यप४ वक्षायां पूर्वकाले केति समासे एकनदीतरः सिद्धो न्यपासमानाधिकरणतत्पुरुषं बाधित्वाव्ययीभावेन पुंसकह्रस्वा
पत्तिः। अच्प्रत्यन्ववेति योगविभागात्सिद्धो। अभियुक्तो गोदावर्याश्च नद्याश्च संख्याया उत्तरे यदीत्स चतुर्न। योगविभा
गस्येष्टसिद्ध्यर्थत्वात् दाक्षकता तदनुक्तेश्चेति भावः। अन्यपदा। संख्येति निवृत्तं नदीग्रहणमनुवर्तते। संज्ञान
वगमादिति। संज्ञेति कर्मणि घञ्। तेन संज्ञिनो देशविशेषस्यानवगमादित्यर्थः। नित्यसमासइति। तत्स्वपदाइत्यर्थः।
तस्माद्दृष्टं च समास समानार्थकवाक्याभावेन समास एकपदविग्रहस्त्वेवम हाविभाषाविषये त्वस्वपदा
क्षभावेऽन्यथा प्रवृत्तिरित्यपि ज्ञापि तेऽन्तर्गंगमित्युदाहृतं। अव्ययीभावेनमुक्ते बहुव्रीहिर्नेतिचोक्तं भाष्ये। अस
नित्यत्वे तेन मुक्ताइत्यसंगतिः स्पष्टैव एवमन्यत्रापि बोध्यं। समासांताः। अत्र समासपदं तत्संबध्यलौकिकविग्रहवा
क्यपरमेवमव्ययीभावादिपदान्यपि तत्पराणि। अत एव बहुकुमारीकइत्यादौ ह्रस्वो न गोस्त्रियोरित्यत्र भाष्ये स्पष्ट
ग मेतत्। अत्रैतइतिसूत्रे भाष्ये च। एवं च लौकिकविग्रहवाक्यसमाससंज्ञासमकालमेव समासांता इति सिद्धांतः।
न च द्वंद्वसमासांते तत्वान्नियोगशिष्टत्वाद्युदात्तत्वे तद्वैकवाक्यतापन्नो द्वंद्वसमान्निपातेन च कृते पूर्वपदस्योदात्तस्वरित
योगित्वाभावेन पूर्वपदप्रकृतिस्वराप्रवृत्तौ ङच स्त्रीत्वमर्थमिति वाच्यं। तत्राप्यन्तर्भूतेन समासांतविधावाद्युदात्त
त्वेतस्यासंबंधज्ञापनात्। तेन समस्तादुपधेयसमुदायस्याद्युदात्तत्वे पूर्वपदप्रकृतिस्वरसिद्धिः। द्विगुव्याम्

ल॰श॰शे॰ ष्वव्ययीभावाप्रसिद्धिरत आह। सामर्थ्यादिति। परस्यौकारेति। परशब्दस्यौकारान्तादेश इत्यर्थः। एङः इति पूर्वत्वं। परस्यो
१५३ कारेति पाठे परस्यावि शब्दस्यादेरुकार इत्यर्थः। आङ्गुणः। अर्थिन्याद्यचीति। धर्मपत्यादिति भावः। अत्र गणसू
त्रे परग्रहणं प्रद्वित्वमिति परोक्ते लिङ्ग इति सूत्रस्य भाष्यकैयटस्वरसः। तत्र हि समासान्तो निपातनात् साधितः।
153 सुजार्थमिति। वेतिवक्तव्ये तत्सुजार्थमपीत्यर्थः। अन्यतरस्याङ्ग्रहणस्य तु स्वरितत्वेनास्त्येव। अत एव नदीपौ
र्णमासीति सूत्रे नदीशब्देन विशेषाणामग्रहणे शरदादिषु विपाट्शब्दपाठस्य ज्ञापकत्वमुक्तं संख्यासंज्ञासूत्रे भा
लिपि ६ ष्येनदीत्वादेवैकल्पिकत्वे नित्यत्वाय पाठस्यावश्यकत्वात् ज्ञापकत्वासंगतिः स्पष्टैव। तत्र जयंतपाठस्तु प्रपंचा
र्थस्तत्र नदीसंज्ञकस्य न ग्रहणं यो र्णमास्यादिग्रहणेन्न चाशब्दसंज्ञेति निषेधात्स्वरूपस्यापि ग्रहणं न स्यादिति
सारेण ७ वाच्यं। लक्ष्यानुसामर्थ्येन च तस्यात्र त्यागात्। अत एव तत्सूत्रं भाष्ये प्रत्याख्यातमित्ति प्रामाणिकाः॥ ॥
इत्यव्ययीभावः॥ ॥ चकारबलेनेति। संख्यापूर्वो द्विगुरिति योगं विभज्य पूर्वेण संख्यापूर्वस्य तद्धिता
र्थे त्रिपत्रोक्तस्य तत्पुरुषसंज्ञाविधानसामर्थ्यादेव पर्यायेसिद्धे चकारः समावेशार्थ इति भावः। श्रितादीनां सुवंतत्वा
संभवात् श्रितादिप्रकृतिकैरित्यर्थलाभः येन विधिरिति सूत्रस्य भाष्यप्रामाण्येन संबुद्धिस्त्रीलिंगप्रथमांतभि
न्नेपि प्रवृत्तेरावश्यकत्वादिति भावः। समर्थविशेषणत्वाच्छ्रितादीनां प्राप्तोपि तदंतविधिः समासप्रत्ययविधावि
ति निषेधान्न भवति। तदंतविधौ हि श्रिताद्यंतसमर्थप्रकृतिकैरित्यर्थे कष्टं परमश्रित इत्यादावपि समासापत्तिः। रामः
कष्टश्रित इति। नलोकेति षष्ठीनिषेधः। पतितशब्दे तनिपतिदरिद्रातिभ्यः सनो वेट्त्वेन यस्य विभाषेति १५२

मलौकिकेवाक्येसुपः परस्तादेव।पूर्वत्वेतुवाच्यार्थविरोधः।नहिसुब्रह्मितंसमासार्थः किंतुतदि शिष्टमेव।नचवि समासे
शिष्टस्यसुबंतत्वाभावे नसुबंतात्तद्धितइतिसिद्धांतविरोधः तेषामर्थाभावे न नपदमितितन्म्ल तम्ल तन्यायस्यात्रवि
षयाभावात्।अतएवसुपोगादितिसूत्रेऽसंतस्वार्थिकानांसुबुत्पत्तेःपूर्वमेवोत्पत्तिर्भाष्येउक्ता।किंच।समासांतप्रकर
णेङ्याप्प्रातिपदिकादित्यस्याप्यसंबंधः।तत्सामवस्थायांवाक्यस्याप्रातिपदि कत्वात्।तत्रकुवुसत्तिकालेएवतत्सद्वेभि
न्नसमाससंज्ञाविरोधाभावात्।समासांतस्यचतद्वाक्यावयवत्वेनतद्ग्रहणेनग्रहणात्।बहुकुमारीकइत्यादावुपस
र्जनस्त्रीप्रत्ययांतप्रातिपदिकाभावान्नह्रस्वःकप्ह्रस्वादंतरंगतरः तादर्थ्यात्ताच्छब्द्यं येषांप दानांसमासोनतावं
तेषामन्यपदवृत्तिकपंतावत्प्रतीयतइतिभाष्येणस्पष्टं तथाभिधानात्तत्राद्यसत्तावदित्यस्यकपः प्रथममित्यर्थः।अ
न्यत्।समाससंज्ञायत्नं।कपासहह्रस्वभवनायकपंप्रपतीत्यर्थःपूर्वस्य प्रव्रीहितदर्थकवाक्याभावेनकश्श
स्त्रवेपर्य्यभियाहितत्भवत्कालप्रतीयते अन्यथातदनपेक्षत्वेनकथंप्रतीतोक्तिरसंतासंगतास्यात्।अत
एवप्रत्ययस्यादितिसूत्रभाष्योदाहृतेबहुचर्मिकेत्यादावापःपरत्वाभावादित्वासिद्धिरितिदिक्।अथाव्ययीभावे ऽ
साधारणसमासांतानाह।अव्ययीभावे।अव्ययीभावेउत्तरपदत्तयावर्त्तमानं यच्छरदादिप्रकृतिकसुबंतंतदं
वय ताट्टच्स्याच्चसमासार्थविग्रहवाक्यांतावयवइत्यर्थः।राजाहइत्यतष्टजनुवर्त्तते।अन्नंतादव्ययीभावादित्या
दितुफलितार्थपरतयाकथंचिन्नेयं।अनश्च।अनणपेक्षपंतात्तेषांक्य इतिविकल्पप्राप्ते नित्यार्थःशरद्इनिकेचित्।
प्रसादामिति।लक्षणेनाभी तिसमासाः येलक्ष्याधजतःप्रयोगः।न

त॰ भा॰ शो॰ ७॰ व गुणवचनशब्द इति बोध्यं। तृतीयान्तार्थकृतो यो गुणस्तद्वचनेनेत्यर्थात् कृते तस्य गुणपदेनैवान्व-
१५४ येन संज्ञानुपादानाच्च गुणेनेतीयता सिद्धे वचनग्रहणं द्रव्यगुणयुक्तवर्तेस्यर्थ इति भाष्याच्च गुणपदेन
सदृश इत्या धर्ममात्रं। तेन खंडशब्दस्य क्रियावचनत्वेपि न दोषः। धान्येनेति। अर्थशब्दो धनपरो हेतुतृतीयेति बोध्यं।
दौ षष्ठ्या अ पूर्वसदृ॰। यद्यपि सदृशेन षष्ठीसमासः तुल्यार्थैरित्यनेन तद्योगे षष्ठ्या अपि विधानात्। एतस्मान्न प्रति-
लुकि पूर्वपद पदविधानत्वमिति वक्ष्यते। अतः प्रतिपदविधाना षष्ठी न समस्यत इति निषेधो न। पूर्वपदप्रकृतिस्वरोपि स-
प्रकृतिस्वरा दृशप्रतिरूपयोरिति सिद्धिः। तत्र हि दास्याः सदृश इति संज्ञा नास्त्येवेति न तदर्थमावश्यकं। तथापि भोजनहेतुक
र्थं सदृशग्र सादृश्यवानित्यर्थे भोजनसदृश इत्यत्र समासार्थमिदमावश्यकं। हेतोः शेष त्वविवक्षाया षष्ठीसमासे तु पूर्व-
हणमावश्य पदप्रकृतिस्वरासिद्धिः सादृश्यग्रहणेन सदृशप्रतिरूपयोरित्य सोपमानबोधकपूर्वपदक एव वृत्तेरिति सदृ
कं। मनसा सदृशप्रतिरूपयोरित्यत्र भाष्ये यदि तु भोजनेन कृतः सदृश इत्यर्थे पूर्वसूत्रेण समासे तत्पुरुषे तुल्यार्थेत्यनेन
दे स्वरोपि सिद्ध इत्युच्यते तदा सदृशग्रहणं व्यर्थमेवेति प्रकृतसूत्रे कैयटेन ध्वनितं सदृशो तिस्वरविधायकसूत्र
शेषस्थं भाष्यं त्वेकदेशयुक्तिरिति तदाशयः। मिश्रं चेति। पणवंधेनैकार्थ्ये संधिस्तत्र गम्यमाने मिश्र इत्युत्तरपदम-
नुपसर्गं तृतीयांतात्परं मंतोदात्तमित्यर्थः। अवरस्येति। यद्यप्यपर्यूनार्थो पि तथापि वयस्याविषयावरार्थ-
मिदं। भाष्ये ऊनार्थेत्यर्थग्रहणस्य तृतीयेति सूत्रे प्रत्याख्यानात् समर्थसूत्रे तृतीयातत्कृते सुपन्यस्तोपाद्य- राम:
त१ नविकं इत्युदाहरणाच्चात्रोनार्थग्रहणं नेति वादिनां मते सर्वथाऽस्यावश्यकत्वात्रेति दिक्। कर्तृकरणे १५४

754

एनिषेधप्राप्तावपि। अत एव निर्देशादिड्भावः। अप्रयोगपत्वादिति। स्वयमित्यात्मनेत्यर्थकं कर्तृशक्तिप्रधानमित्यर्थः।
स्वार्यंकृतिरिति। असमासे कार्त्तिरिति स्यादिति भावः। एकस्य यमपि समासफलं। स्वद्व। अस्पतत्वकृति के द्वाएया
द्वितीयेत्यनेन सामानाधिकरण्ये। आत्मइति। तेन केवलरूढत्वं तस्य सूच्यति। एतेन प्रकरणादिसहकृतवाक्ये
नार्थं दाप्रतीतिसंभवान्न हि निर्देशप्युक्तमित्यपास्तं। योगरूढे तत्संभवेपि केवलरूढे तदभावान्न हि निर्देशस्य
चविवक्षिता निर्देशत्यर्थः। सामीप्यद्वे। कालाइति। कालवाचिन इत्यर्थः। बहुवचनात्। तांतं तांतसाधारण्येन तर
सूत्रेण सिद्धे योगविभागो व्यर्थ इत्यत आह। अनत्यंते ति। परिछेत्तुमिति। अत्यंतयोगे शक ध्वमेतितुमुन्। अत्यंत
संयोगानत्यंतसंयोगसाधारणे न पूर्वेणसिद्धे इदं किमर्थमित्यत आह। अक्तांताप्यमिति। क्तेनेति। अत्र नानु
वर्त्तत इति भावः। तृतीया। तृदंसूत्रं कृतद्वारकमेव सामर्थ्यं प्रवर्त्तते न साक्षात्परस्परान्वये। उत्तरसूत्रेणनि
पुणअक्षन्द्वाणभ्यां समासविधानात्। तद्योगे हि तैस्तृतीया तत्कृते तद्युक्ते अत्यन्तं चैत। दोषेगुणे त्यस तत्कृतत्वे
तत्सापेक्षत्वेपि सौत्रत्वात्समासः। खंडशब्दश्च खंडगुणवत्वेन बोधक इति शंकुलाखंड इमत्र कृतद्वारकमेव सा
मर्थ्यं शंकुला कृतखंडगुणवानित्यर्थः। वचनग्रहणं तु गुणोपसर्जन द्रव्यवचनेनैव समासार्थं तेन
कुंभेन कृतं रूपमित्यादौ न। ध्ढ तेन पाटवमित्यादौ च न स्पष्टं चेदं भाष्ये। यद्यपि जातिसंज्ञातद्धितकृदंत
समस्तसर्वनामसंख्याशब्दभिन्नशब्दानामेव गुणवचनसंज्ञा तथापि प्रकृते व्याख्यानाच्छुद्धयौगिकस्य

ल॰श॰शे॰सू॰ १५५ पीष्ठत्वात्प्रकृतिविकृतिभाव एवेति व्यर्थं चतुर्थीसमासेपि चतुर्थी तदर्थ इति पूर्वपदप्रकृतिस्वरेण तत्सप्रकृतिविकृति तादर्थ्ये २
भाव एव प्रवृत्तेः अन्यथा ओरदित्तमित्यत्रापनेनैव स्वरसिद्धौ तेन चेति व्यर्थं स्यात्। न च हितार्थे। तेन चेत्यत्रापि तदर्थ
इत्यनुवृत्तेः तत एवास्योक्तार्थज्ञापकतापरं भाष्यं संगच्छते इत्यपास्तम्। अर्थशब्द स्यानित्यपुंस्त्वेन परवल्लिङ्ग
गमित्यस्य बाधायाह। विप्रायेति। गता चेति। एतदेवात्र विधेयं नित्यत्वं तु चतुर्थ्या तादर्थ्यस्योक्तत्वादर्थशब्देन
विग्रहाप्रसक्तेर्न्यायसिद्धं गुरोरिदं गुर्वर्थमित्यादाविव पदे लिंगमपि लोकतः सिद्धं तदेदं स्पष्टार्थं। भयभीति॥
निर्गतिजुगुप्स्वोरप्युपलक्षणमिदं। भोगोपरतवन्येत्यादिषु सुप्सुपेति समासः मयूरव्यंसकादित्वाद्वा। अल्पं पं
चमंतमिति। कानिचिदेव पंचम्यंतानि समस्यंत इत्यर्थः। मंगलसंबंधाभावेप्यल्पश इत्यस्मादेव निपातनाच्छस्।
स्तोकांतिक। स्तोकार्थेल्पशब्द एव न लेशादयो व्याख्यानात् स्तोकाल्पाभ्यां कृच्छ्रान्वकरणे च स्तोकेति पंचमी। दू
रांतिकार्थे भ्यो द्वितीया चेत्यनेन तेभ्य इति बोध्यं। प्रतिपदोक्तपरिभाषया तद्विहितपंचम्यंते नैवायं समास इत्या
हुः। राजपुरुष इति। अंतर्वर्ति विभक्त्या पदत्वान्नलोपः। गुणान्तरेण। इदं च पूरणगुणेत्यस्यापवाद इति सर्वे
गुणेति सूत्रे भाष्ये ततः सर्वपदानुवृत्तेः सर्वशब्द एवेदं गुणबोधकाद्विहितो यस्तरप् तदंते न सर्वशब्दस्य समा
स इति वाच्योर्थः। गुणाद्विहि तत तरवंतं च गुणवाच्येवेत्याशयेनाह। तरवंतं यद्गुणेत्यादि। ननु यतो निर्धा
र्यते यश्च निर्धार्यते यश्च निर्धारणं हेतुस्तत्त्रितयसंनिधान एवायं निषेधो युक्तो निर्धारणषष्ठी च यु तत्रैव २
क्ता स्पष्टं चेदं तरद्विधायके कैयटे तो नात्रास्य प्राप्तिः सर्वेषां श्वेततर इत्यादौ त मवाप्तिरित्यरुचेराह॥ रामः १५५

255

चेति। रूढत्वे समाहारद्वंद्वात्सप्तम्येकवचनमिति भावः। तृतीयेति। तृतीयांतमित्यर्थः। कर्तृकरणे इति। यत्र गतिकार
कसमभिव्याहृतं कृदंतं तत्र तद्विशिष्टस्यैव ग्रहणं। अपिशब्दात्तदसमभिव्याहृते केवलस्यापीत्यर्थः। इदमन्यत्र विस्तरः।
कृतेति किमिति। सुपेत्यधिकारेण तिङंतेनाप्रसंगात् कर्त्राद्यादितृतीयार्थक्रियाबोधककृदंतेनैव भविष्यतीति
प्रश्नः। अन्येतु कृदंतेनैव समासो यथा स्यान्न सुबंतेनेत्यर्थं तदुक्तोदाहरणेतु सामाजंतादिभिरेव बहुल
ग्रहणेन वारयितुं शक्यमित्याहुः। अर्थवादः आरोपितोर्थः। काकपेयेति। वाक्यार्थे कूपः पूर्णंभस्त्वेन कोमल
त्वेनच स्तुतिः त्वाभस्त्वेन दुर्बलत्वेन निंदा वा। इहांतर्भूतेति। तां विना दध्नः संस्कार्यत्वेन प्रतीता न्न संस्का
रकत्वानुपपत्तेरिति भावः। तदुक्तं भाष्ये युक्तार्थसंप्रत्ययाच्च सामर्थ्यमिति दध्ना युक्तो योर्थ उपसेकादिस्तत्संप्र
त्ययादित्यर्थः। सर्वलोकव्यवहारप्रसिध्या च तदर्थांतर्भावनिश्चय इति च। अन्नशब्देनात्रोदनः। भिस्सा स्त्री भ
क्तमंधोन्नमिति कोशेन तत्र तत्प्रसिद्धेर्योगाद्वा रूढिर्बलीयसीति बोध्यं। मिश्रणेति। तां विना मिश्रीकरणत्वायोगा
उच्यते १ दिभावः। तच्छब्देन चतुर्थ्यंतार्थ इत्याशयेनाह। चतुर्थ्यंतार्थायेति। तादर्थ्ये चतुर्थी वलिरक्षितग्रहणाद्क्षेत्ति।
तद्योगे हि तादर्थ्ये चतुर्थी हितयोगे तस्मादेव ज्ञापकाच्चतुर्थी हितसुखाभ्यामन्योपकाराजन्नेन तद्योगे ताद
र्थ्ये चतुर्थ्यप्रसंभवात्। एतत्सर्वं भाष्ये स्पष्टं। षष्ठीसमासादिति। रंधनाय स्थालीत्यादावभिधानस्याभावात्ताद
स्थाल्याः २ र्थ्यत्वेनैव तस्याभानेन संबंधत्वेन बोधे वाक्यमेव संबंधत्वेन बोधे च कृते न समासोपीति व्यवस्था। रंधना
र्था स्थालीति मध्यमपदलोपि [illegible] तेन षष्ठी समासेन रंधनस्थाल्याश्च

नेति षष्ठ्यभावान्न तत्र षष्ठीसमासः। चतुर्थीसमासवारणाय प्रकृतिभावस्येवेसकं। अस्याप्यसाधुत्वप्रकारकत्वे २

पौ २

ल॰श॰शे॰भू॰ १५६ तत्रशेषलक्षणामित्यस्पष्टमात्रलक्षणमित्यर्थः प्रतिपदविधानेत्यस्यकारकविशेषोपादानेत्यर्थः। तेन तुल्यार्थै
दित्यादेर्नेति त्वमित्यलं। पूरणाद्यर्थैरिति। आदिनागुणसुहितौ। अत्रपूरणार्थत्वेन पूरणत्वार्थे तीपाद
नित्यनंतस्यापिग्रहणंव्याख्यानात्। गुणार्थशब्देन केवलगुणवाचीसन्गुणोपसर्जनद्रव्यवाचीगुणबोधकप्रकृ
तिकभावप्रत्ययांतश्चगृह्यतेव्याख्यानात्तदाह। काकस्येति। आकडारसूत्रेतुगुणवचनानांतुनेहग्रहणंवच ह ४
नपदानुपादानात्। तदेवमिति। अन्यथाब्राह्मणस्येदंता इत्यर्थे शुक्लपदेनासामर्थ्यात्समासप्राप्तिरेवनेतिभावः।
२९६ इदानीतुशुक्लशब्दएवविशेष्यसमर्पकइतितात्पर्यं। परेतु। एवमपिसामर्थ्यं दुरुपपादं। अर्थ्यं तंसमर्थप्रकृतिके
नसुबं तेन समस्यतइत्यर्थात्। अत्रहिसुबंतेनशुक्लइतिपदेनवाक्यैकदेशान्यायेनशुक्लादंताइत्यर्थोबो
धः। एवंचसुबुत्पत्तिः शुक्लशब्दात्स्वार्थेएवेतिनसमर्थप्रकृतिकतासुबंतस्य। अतएवब्राह्मणस्यग्रामंगतइत्यर्थ
केब्राह्मणस्यगतइतिवाक्येप्रकरणादिनाग्राममित्यर्थस्योक्तत्वेनगतइत्यनेनोक्तौसमासोननेष्यतेचतत्रस
मासइतिकर्मणिचेतिसूत्रेभाष्यकैयटयोस्तस्मात्काष्ठस्यादियएवात्रोदाहरणंगुणिपरतापिशुक्लादीनांविशे
लो॰ ष्यद्रव्योपादानेप्रकरणादिनातदवगतौवानान्यत्रा भिधानस्वाभाव्यात्। अनित्योयंगुणेनेति। पूरणार्थेने रामः १५६
तिचबोध्यं। इत्यादीति। लोपेचेत्यादपूरणमित्यादिशब्दार्थः। तेनकुंभपूरणमकंठछब्दइत्यादिसिद्धं। परेतु।
एषुकुंभसंबंधिपूरणमुच्छसंबंधीपष्ठइतिमध्यमपदलोपीसमासोतएवभाष्येऽनित्यत्वंनोक्तमन्यत्रास्या अन्यतु गो२
नभिधानमतएवसर्वस्वेतइत्यादौगुणेनेतिनिषेधात्कथंसमासइत्याशंक्यगुणान्तरेणसमासस्तत्रलोपश्चे मध्यमपद लोपिसमा सस्य २

पूरणेत्यादि। द्रव्यांतराधेयश्वेतापेक्षया सर्वेषां पदानामधिकोयं श्वेतो गुण इत्युदाहरणार्थः। एवं चतुरवयुपप
न्नः कुशो गान्धेति। प्रतिपदविधानान समस्यत इत्यस्यापवादः। ननिर्धारणे इति। द्विजादिशब्दैः प्राप्तस्यनि
षेधोयं पुरुषोत्तम इत्यत्र वितयसंनिधानाभावान्ननिर्धारणविभक्तिः किंतु संबंधसामान्ये षष्ठीति तया समासः।
अत एव हलादिष्वेव इति सूत्रे किमयं हलादिरिति षष्ठीसमास इति भाष्ये उक्तं। गुणवचनेन निषेध
स्त्वनित्य इति तरप्सूत्रे कैयटः। उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत इत्यादि गीतावाक्यादत्र कर्मधारय इति
तरप्सूत्रे कैयटे लभ्यते। राजदंतादिलात्पर निपातः। प्रतिपदेति। ज्ञोविदर्थस्येत्यादिकलोपे इत्यंत सूत्रविहि
ता प्रतिपदविधाना। पत्नुतेषु शेषपदसंबंधेन शेषत्वं वर्तः षष्ठीविधानेन तत्र षष्ठीशेष इत्यनेनैव सि
द्धौ तस्या षष्ठ्याः समासाभावः कल्प्यते तेन प्रतिपदविधानेति नाप्रबंधिति। तन्न। तत्तद्धातुयोगे उपात्तका
रकातिरिक्तकारकाणां शेषत्वविवक्षाभावज्ञापनेनापि चारितार्थ्यसंभवात्। किं च कृद्योगे प्रयोगे ज्ञोवि
दर्थस्यदिवस्त दर्थस्येत्यादि विषये समासनिषेधानापत्तिः। तत्र शेषग्रहणनिवृत्तेस्तवसंमतत्वात्कोर्थ
इत्यत्र तत्संबंधे भाष्यानुग्रहाभावात्। एवं ज्ञोविदर्थस्येति सूत्रेपि तत्संबंधेनासंतं भाष्यानुग्रहः। अधीगर्थ
त्यादौ मंडूकानुवृत्तिः। एतच्च दिव इति सूत्रे विस्तरेण प्रपादितं प्रातस्य देवितेत्यादौ तृन्योगे कर्तृकर्मणोरित्यस्य
समास २ निषेधेनाने वृषक्षां नि षेधसंभ गवात् दूफलात्। अत एव भाष्येनेदं प्रत्याख्यातं। अत एव प्रतिपद विधाना ना
कातिप्रश्ने सर्वा प्रतिपदाविधाना[illegible] कानीति चकृद्योगे ति भाष्ये उक्तं

157

ष्ठितविभक्त्यासमासः। अत्र परत्वात्समानाधिकरणसमासं बाधित्वा षष्ठीसमासः प्राप्तः कृतोपि कर्मभीत्यादयोपीतिपक्षेपि
परस्परान्वय एवेति नासामर्थ्यं क्रियान्वयनियमश्च न साक्षादेव किंतु यद्द्वारा कारकत्वं तद्द्वारकोपीत्युक्तं। अत एवैतन्नि
षेधस्यानानर्थक्यं तत्सद्धे। न च समानाधिकरणसमर्थं वदिस्सामर्थ्यं समानाधिकरणाधिकारे समानमध्यमवीरा
श्चेति पाठेन तस्य समानाधिकरणाधिकारस्थ्यसमासाविषयत्वे प्यन्यत्राप्रवृत्तौ मानाभावादिति वाच्यं। अथ्यात्मभिहितमि
त्युक्त्या धातूक्तत्वप्रत्ययेन कर्माभिधाने षष्ठ्युपपीयमानस्येत्याद्यर्थमावश्य कत्वात्स्पष्टं चेदं भाष्ये समर्थसूत्रभाष्यो
क्तेः प्रकरणांतरस्थे इत्युस्तोरिति षष्ठेपि तस्य प्रवृत्तिरित्यन्यत्र। ननु षष्ठीसमासस्यानिषेधेपि विशेषणसमासोत्रदुर्वार
इति निषेधे फलाभाव इत्यत आह। विशेषणसमासस्त्विति। विशेषणं विशेष्येण सुभयोपादानेन तत्रावच्छेदकधर्मयोः पर
स्परं व्यभिचार एव विशेषणसमासप्रवृत्तिरिति तु न युक्तं कैलासाद्रिरित्यादौ समासानापत्तेः तत एवोभयोपादानं स्पष्टार्थ
मिति केयटः। इह। तक्षकस्य सर्पस्येत्यादौ तयोः समस्तयोरत्र फले विशेषाभावादिति भावः। एवं प्रथमांते न समास इति पक्षे
विषष्ठ्यंततत्प्रयोगाभाव एवानभिधानादिति बोध्यं। एतच्च भाष्यकृत्सुदाहृतप्रयोगविषयमत एवान्यस्य पदस्यार्थे
इत्यर्थकोन्यपदार्थे इति सूत्रे प्रयोगः संगच्छते एवं च नीलोत्पलस्य गंध इत्यादिसाध्वेव। निषेधसामर्थ्यादिति तु
नोक्तं। गमनस्यञ्श्रेयस इत्यादौ कर्मधारये अज्ञावमकन्यापवत्सु भावे कर्मधारये इत्यनेन पूर्वपदप्रकृतिस्वरः। ष
ष्ठीसमासे त्वंतोदात्तत्वमिति भेदेन तस्यार्थक्यात्फलांतरमप्याह। गोर्धेनोरिति। तन्न हि षष्ठीसमासे गुणप्रवृत्तिनि
मित्तकत्वेनाप्रधानत्वात्प्रथमानिर्दिष्टत्वाच्च धेनोः पूर्वनिपातो विशेषणसमासे तु गोरिति भेद इति भावः। आहि रामः
ताभोज्यस्योत्पन्नस्येत्यादिसंग्रहः। येतु पस्तर्जनसंज्ञामन्यथाभावयं ते ते षांषष्ठीसमासे पूर्वनिपातानियम इति १५७

त्तिवचनमारब्धं सर्वंगुणेति सूत्रे भाष्ये संख्याशब्दास्तु भावशब्दा इति योजनशतं गोविंशतिरित्यादौ चनायं निषेधः
तथा च पंक्तिविंशतीति सूत्रे भाष्यं । तथा ते विंशत्यादयः समुदाये संतो भाववचना भवंतीति विंशत्यादिषु भाववच
नेष्वितिच । यस्तु तत्रैवांगुणवचनत्वव्यवहारोपि स तु तत्त्वादृश्यात् । अन्यथा गावो धनमित्युपक्रम्य धनमेको गु
णः अपत्यमेको गुण इत्यपि भाष्योक्तिः श्रैत्रधनं चैत्रापत्यमित्यादिनस्यादिति वदंति । सूत्रे सुहितेति भावे क्तः तेन
फलानां तृप्तिरित्यादावपि निषेधस्तदाह । तृप्त्यर्थ इति । तृतीयेति तत्र करणत्वेन भानं षष्ठीसमासे संबंधत्वेने
ति भावः । श्रोतविशेषमप्याह । स्वरे विशेष इति । तृतीयासमासे तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरस्यापवा
दिस्वरापवादः षष्ठीसमासे त्वंतोदात्तः तृप्यर्थानां सकर्मकत्वात्कर्मणि क्तः । द्विजस्येति । कुर्वन्नित्यपेक्षया न
ध॰ ९ कर्मणि षष्ठी न लोकेति निषेधात् । नापि घटाद्यपेक्षया ऽसामर्थ्यात्समासानापत्तेः किं तु शेषेत्याह । किंकरइ
त्यर्थ इति । राज्ञ इतिवदिति । अत एव सर्वपश्चादिति भाष्यप्रयोगः संगच्छते । प्रकृतसूत्रभाष्ये व्यक्तदष्यैस्त्वैरा
दिभिरसामर्थ्ये न समासाभावमुक्त्वा कद्ब्यमेवोदाहृतं तेनान्यार्थैः सति सामर्थ्ये समास इष्ट इति गम्यते ।
परे तु । द्विजस्य कुर्वन्नक्तत्वादौ कारकषष्ठ्या निषेधात् । कटाद्यपेक्षया शेषषष्ठ्यांस्त्वसामर्थ्यात्समासप्राप्तिरेव
नेत्याशंक्य द्विजस्य द्विषन् पुरा सूर्यस्योदेतोरित्यादौ द्विषः शतुर्वा वचनं तौ सुन्कसुनोरप्रतिषेध इति कारकषष्ठी
त्वात्तत्रोदाहृतं भाष्ये तस्मादीदृशे विषये कर्मणः शेषत्वविवक्षायाः तादर्थ्यस्य संबंधत्वविवक्षा वा स्त्राभावएवया
णिनितात्पर्यं निर्णयाये व भा[illegible]ष्या समासः । तद्दाकस्येति । परिनि

ल०श०शे०मू० एवुजित्यन्ये। परार्थेति। प्रसिद्धत्वेन तस्यैव तत्र ग्रहणादिति भावः। कैयट इति। प्रलास्यस्याकारकषष्ठ्येव तन्निषेध इ
१५८ तिभावः। गुणविशेषक इति भाष्यप्रतीकमुपादाय बहुष्विति सूत्रे कैयटेन तत्। कर्तरि च। अत्र सामर्थ्यात् कर्तरीति षष्ठ्या
एव विशेषणं। भवतः शायिकेति। पर्याये एवुच धात्वर्थनिर्देशे एवुल्। निसंज्ञौ। जीविकायां निषेधस्य सिद्धे
र्निष्प्रयोजनत्वाद्विधिरयं। दन्तानां लिखितेत्यादौ जीविकायां तृचो नभिधानात् क्रीडायां तृचो संभवा
द्विच्छिन्नत्वाच्च तस्यात्रासंबंध इत्याह। अकेनेति। अकेजीविकार्थ इत्यत्राक ग्रहणं त्वपि ग्रहणवत्स्वरूपार्थं।
158 प्रतिपदोक्तत्वेनेत द्विहितसमास एवेतत्प्रवृत्तिसिद्धिः। संज्ञायामितीति। यद्यप्यत्र धात्वर्थनिर्देश इत्येव सि
द्धसंज्ञायामिति त्वधिकरणार्थमिति कदंते वक्ष्यते। तथापि तदर्थस्याभावे पि प्रवृत्तिर्न्याय्या संज्ञायां विशेषविहि
तत्वात्। अचारिताप्यभावे पि तस्य प्रथमं बुध्यारोहेण प्रथमं प्रवृत्तौ नियामकत्वमस्तीत्यन्यत्र प्रपंचितं। संज्ञा
यामिति एवुलित्येव पाठः। उदाहरणेधिकरण इति सप्तत्वं। षष्ठीसमासप्रसंगेन तदपवादमेकदेशिसमासमा
ह। पूर्वापरेति। अवयवित्वं चावयवापेक्षं तद्वाचकाचोपस्थितत्वात् पूर्वादय एवेत्याह। पूर्वादय इति। अ
धिकरणं द्रव्यं एकत्वविशिष्ट द्रव्ये वर्त्तमानेनावयविवाचकेनेति वार्थोर्थः फलितमाह। एकत्वेति। मध्याह्न इ
ति। राजाह इत्ति टच्। अह्नो ह्न इत्यह्नादेशः। अर्द्धं न। निर्देशादेव नपुंसकत्वे लब्धे नपुंसक ग्रहणं सू
त्र निर्देशे लिंगाविवक्षाज्ञापनार्थं। न च समांशवाचित्वे नपुंसकग्रहणार्थं तत। एओङ् एचइगिति रामः
सूत्रे एचो ह्रस्वशासने ऐकारोकारयोर्विधानमाशंक्य न च द्वैनं लोके अर्द्ध एका रोर्द्धं औ १५८

तद्वारणाय निषेधो विशेषणसमासस्तु स्यादेवेति कैयटः। परे तु। प्रथमानिर्दिष्टमित्यादिसूत्रभाष्योक्तरीत्या षष्ठी
तिसूत्रे प्रत्यासत्त्यापेनसुवृत्तेन समासस्तदर्थं निरूपितसंबंधाद्यर्थवक्यात्रहणमेवं च न प्रकृते समासप्राप्ति
रिति समानाधिकरणग्रहणं व्यर्थमेव ध्वनितं चेदमत्र भाष्ये तथा च भाष्यं समानाधिकरणे किमुदाहरणम्। एक
देशमाह राज्ञः पाटलिपुत्रकस्य प्रेष्याह नैतदस्ति सामर्थ्यादत्र न भविष्यतीत्युक्ताशय। उदाहरणं वा द्येकदे
शमाह कथमसामर्थ्यं प्रेष्ये कदेशमाह समानाधिकरणमसमर्थवदित्युदाहरणं वा द्येकदेशमाह अथवा मिहितमि
ति तच्छेषात्सर्पिषः पीयमानस्येत्युदाहरणमिति उपसर्जनसंज्ञासूत्रस्थभाष्येकवाक्यतयास्यैवं व्याख्यानस्यै
वोचित्यादित्याहुः। आख्यानात्सूत्रायामिति सूत्रे उपलक्षणमित्याह। मतिबुद्धीति। राज्ञां मत इति। क्तस्य च वर्त्त
माने इति षष्ठी। अयं च कारकषष्ठीशेषषष्ठ्योरुभयोरपि समासस्य निषेधस्तयोः समासयोस्थाथादिस्वरसा
मासस्वराभ्यां मतोदात्तस्यैव प्राप्त्या फले विशेषाभावान्नद्वूलयन्नाह। भूते क्तोते नेत्यादि। न च वर्त्तमाने क्तो भू
ते क्तस्य बाधकस्तत्र कौण्डिन्यन्यायादिति वाच्यं। भूते क्ते वयं प्राप्ते वर्त्तमाने क्तस्यानारंभात्। भूतत्व वर्त्त
मानत्वयोर्युगपद्विवक्षाया असंभवात्। दधिदानेव यंप्राप्ते वर्त्तक्रि दानारंभाद्युक्तस्तेन दधिवाध इति बोध्यं।
कर्मणि च। अस्य क्तेन न संबंधः तृजायां प्रतिषेधानर्थक्यात्तदाह। कर्मणीति। याषष्ठीति। चशब्द इतीत्स
त्सार्थ इति भावः। एवं च क्तस्यानुवृत्तिरेव। इदुभ हिकेति धात्वर्थनिर्देशे ण्वुल्। कर्मणि षष्ठ्या समासः
कर्तुः प्रयोगाभावेनोभयप्राप्त्य[illegible]र्हणेति पर्यायार्हणेत्सत्ति ण्वितिभावे

ल॰ श॰ शे॰ मू॰
१५९

159

श्रीहिएदंसिद्धंजातिकालसुखादिभ्योनाछादनात्क्तोवाजातइत्यनेनोदात्तत्वेनस्वरेविशेषाभावात्।जातिका
लसुखादिभ्यःपरानिष्ठेतिवचनात्।नजातस्यपूर्वनिपातः।तथापिजातवद्द्वन्द्वेनसमासेमासजातवानित्या
दावंतोदात्तार्थमावश्यकमिदमितिकेचित्।परेतु।परिछि द्यपरिछेदकसमभिव्याहारेपरिछेद्यादेवषष्
ठीस्वीकारेणमासस्यजातइतिविग्रहस्यतत्रषष्ठीसमासस्यचखपुष्पायमाणता।अतएवभाष्येउत्तरपदार्थ
प्रधानत्वेसमासात्षष्ठीमाशंक्यसंबंधस्यप्रातिपदिकार्थत्वेनाशेषत्वात्परिहृता।अन्यथामासस्यजातइ
तिविग्रहेएतत्प्राधान्यंदर्शितंस्यात्अत्रषष्ठीप्रसक्तिरेवनषष्ठीतिसूत्रेणसिद्धेइदंसूत्रंजातमासइत्ये
तन्निवृत्त्यर्थंतर्ह्येवममापि।कालाःपरिमाणिनासमस्यंतेनतुपरिमाणिकालेनेत्यर्थात्।किंचमासोजातो
यस्येतिबहुव्रीहिणाऽतीतमाससंबंधिजननक्रियाकर्तुरिवतत्संबंधिगमनादिकर्तुरपिमासजातशब्दात्प्र
तीत्यापत्तिरित्यनयोर्बहुव्रीहेरनभिधानमेव।अत्रविग्रहेवृत्तौचोभयत्राप्युत्तरपदार्थप्रधानत्वं।नच
विग्रहेतत्त्वेजातात्षष्ठ्यनुपपत्तिर्विशेषणादेवषष्ठीविधानादितिवाच्यं।वाक्यस्यवृत्त्यर्थबोधकत्वविव
क्षयाविशेष्यविशेषणभाववैपरीत्येपिपूर्वंजातसंस्काराऽनिवृत्तेः।अन्यथासमासेजातप्राधान्येनवि
शेषणविभक्तिषष्ठ्यापादानस्यभाष्येऽसंगतत्वापत्तेः।ममतुनदोषोविग्रहेतस्यैवप्राधान्येपितत्स्थित्तिव
समासादर्पितदापादानसंभवात्।तदुत्तरषष्ठ्यैवतत्रमासविशेषणैकसंबंधप्रतीतिवत्समासेपिविशिष्टो राम:
त्तरषष्ठ्यात्तत्संभवइत्याशयः।शब्दस्वभाववशात्तन्नतद्व्यवस्थेतिबीजं।यत्तुएकार्थीभाववत्तावृत्तौविशेष्यविशेष १५९

कारो वास्तीति भाष्यप्रयोगात्समां शवान्विनोपि निल नपुंसकत्वाभावात् । अवयववाची तु पुंल्लिंग एव अर्धपू
र्वं ग्रामार्द्धमित्याद्यपि समप्रविभागएवेत्याहुः । पिप्पल्या एकविभक्तीत्युपसर्जनत्वाद्ध्रस्वत्वं स्यादत आह । एक
विभक्ताविति । नन्वेवं पंचानां खट्वानां समाहार इति विग्रहे पंचखट्वीति न सिध्येदत आह । एकदेशीति । इदं
चापथ्यं नपुंसकमिति सूत्रे पंचखट्वीति भाष्योदाहरणाज्ज्ञायते । निबेधवाधिलोति । भागार्थकानन्त्रत्यपांतो
पि स्वार्थिकत्वात्पूरणार्थ इति भाष्ये स्पष्टं पूर्वेत्यादि विहित एकदेशिसमासः परवल्लिंगमिति सूत्रे तस्य मेकदे
शिसमास पुरं तत्पुरुषग्रहणं च परवल्लिंगमिति सूत्रे भाष्ये प्रत्याख्यातं । द्वंद्वैकदेशिनोरिति वद्गामिप्राप्तादि
सु चाप्राप्तिरेव । तदेकदेशिग्रहणमपि न कार्यं किंपं एकदेशिसमासो नारभ्यते । अर्धपिप्पलीत्यादिः स
मानाधिकरणसमासः । अवयवे समुदायस्तपा रोपादर्द्धं च सा पिप्पली ति । न च भेदविवक्षायां षष्ठीस
मासवाधार्थमिष्यत एव षष्ठीसमासो ग्रामार्द्धमित्यादिवत् । अर्द्धं पिप्पलीत्यादि भवितव्यमेवेति भाष्यात् ।
द्वितीयपाद इति । नन्वत्र प्रश्लेषे द्वितीयांतस्यैवाकारः स्यात् न प्राप्तापन्नयोरिति वाच्यं । प्राधान्येन तयोर
बादेशः च कार आभिन्नक्रम इति भावः । प्राप्तापन्ने इत्युत्तरमकारप्रश्लेषः प्रग्रह्यत्वं सौत्रत्वा
न्नेति भाष्यस्वरसः । एकादेशस्य पूर्वं तत्त्वेन ग्रहणात् आप्ताद्येन समासः जीविकाशब्दस्यैकविभक्तीत्युप
सर्जनत्वात् । गोस्त्रियोरिति ह्रस्वेत दंता टाप् इति बोध्यं । बहुव्रीहिणा तु न गतार्थता स्वरे विशेषात् ।
कालाः प । मासस्य जात इति षष्ठीसमासेन सिद्धे । अतिमास इत्यनिष्ट निवृत्तये इदं । यद्यपि बहु

पूर्वाह्णेगेयंसामेति।तत्पुरुषेकृतीत्यलुक्।अयंसमासोयमन्तेनैवाभिधानस्वाभाव्यात्।तत्रेत्येतत्स
प्तम्यंतमिति।अधिकारबाधायाधिकरणशक्तिप्रधानादपिसप्तमीतिध्वनितम्।तेनपूर्वपदप्रकृतिस्वर
सिद्धिः।अव्यवस्थितत्वप्रतिपत्त्यात्रनिर्देशः।गेहेनर्दीति।नर्दशब्देस्मात्णिनिः।तत्पुरुषेकृतीत्यलुक्सर्वत्र।
समासांतरेइति।समासप्रकरणादितिभावः।तेनपात्रेसमितिरित्यादिभवत्येव।समासश्चानंतरत्वात्कर्मधा
रयएवेत्याहुः।प्रवेशोनेति।तेनपरमाःपात्रेसमिताइत्येव।समितेतिनिरनुस्वारं।पूर्वकालैक।अत्रपूर्वकाल
शब्दोर्थपरोन्येषस्वरूपपराः।पूर्वःकालोयस्यतद्वाचकःशब्दःअस्यास्त्वापरकालवाचकेनसमस्यतेइत्य
र्थः।सिद्धेपूर्वनिपातेति।एषांविशेषणत्वस्यानेपत्येपिएषमेवतत्त्वार्थमितिभावः।नियमबाधनार्थंचेति।
मुख्याद्यर्थकैकशब्द स्यत्वप्रसिद्धत्वान्नात्रग्रहणमितिभावः।नवशब्दःपुराणसाहचर्यान्नूतनार्थः।अर
नृद्धः।समानाधिकरणेनेतिकिं।एकस्याशौक्त्यं।नियमार्थमिति।विशेषणमित्येवसिद्धेनियमोयमितिभावः।
विशेषणमित्यस्यैवायंनियमः।तेनपंचगुः।पंचगवमितिसिध्यति।पूर्वसमित्यादौसंज्ञात्वाभावेपिकालवाचक
त्वात्समासः।एवंदेशवाचकेनापीतिबोध्यं।तद्धितार्थेति।वैषयिकेआधारेसप्तमीविषयत्वंचानेकप्रकारैरि
त्याह।विषयेइत्यादि।तद्धितार्थेवाच्यइतितुनोक्तंपंचनापितिरित्यादौसमासेनोक्तत्वात्तद्धितानापत्तेः।
अतएवद्विगोस्तद्धितस्यलुग्वचनंचरितार्थं।तद्धितविषयेइत्येवसिद्धेर्थग्रहणंस्पष्टार्थमित्यपि
नायमनभिधानात्।तदर्थेपरेणबहुव्रीहिणास्यबाधात्।समाहारःसमूहः।भावघञंतत्वात्।अत

णाभावव्यत्यासइतितन्न।एकार्थीभावफलेषुभाष्येऽस्यापरिगणनत्वात्‌ वृत्तिविग्रहयोःसमानार्थत्वभंगाप
त्तेश्च।किंप्रधानोयंसमासः।उत्तरपदार्थप्रधानइतिभाष्यं।वृत्तिविग्रहोभयपरंसमासपदेनतस्याप्युपलक्ष
णात्‌।अन्यथामासजातोद्व्यहजातमित्यादौजातस्यैवकार्यसंबंधदर्शनेनोत्सर्गिकत्वाच्चतत्पुरुषत्वेनोत्तर
पदार्थप्रधानत्वनिर्णयेनकिंप्रधानोयंसमासइतिप्रश्नस्यानिर्दलत्वापत्तेः तस्माद्वृत्तिविग्रहयोःसमानार्थ
त्वनिर्वाहमपश्यतउभयविषयप्रश्नउत्तरंचेत्युचितम्‌।अन्ययोत्तरपदार्थ प्र धानोयंतत्पुरुषस्तेनान्यैरुत्तर
पदार्थप्रधानैःसधर्मणाभवितव्यं।अन्यत्रचोत्तरपदेऽप्यंतर्वर्त्ति नीविभक्तिःसैवसमासेऽपिभवतीहतुवाक्येषष्ठी
समासेप्रथमाकेनेतदित्येवाशंक्येतप्रातिपदिकेनोक्त त्वेनप्रातिपदिकार्थतयाशेषत्वाभावान्नषष्ठीत्युत्तरंतु
त्यमेवेत्याहुः।मासजातइ त्यादौमासत्वेनैकमासव्यक्तिरेवबुध्यतेऽन्यथापरिच्छेदकत्वंनस्यात्‌।मासो
जातस्येत्यादावर्थेतुनसमासोनभिधानात्‌।उत्तरपदेनेति।इदंवार्त्तिकमेतत्सूत्रविषयमेवतद्धितार्थेति
सूत्रेपाठेप्येतद्विषयस्यैवभाष्यकृतोदाहरणात्‌।पूर्वत्रेति।द्व्यहजातइत्यत्रेत्यर्थः।अवयवोइति।अ
धिकरणकारकस्यकार्त्तिकर्मद्वाराक्रियान्वयात्‌छौडादिभिःसामर्थ्यं।आसत्त्यादिक्रियांतर्भावेणसामर्थ्यमि
तितुनयुक्तं।तदसतीतेः।सांकाश्यपासिद्धइति।संकाशेननिर्वृत्तंतेनैतपसासिद्धइत्यर्थः।सांकाश्यपनग
रसिद्धोजातइत्यर्थोवा।[illegible]।आख्यानादर्थग्रहणं।इवेति।तत्सइवयोगुरुकुलादौनचिरंतिष्ठति
सएवमुच्यतेएवंहिनिंदाभवति।[illegible]लाह।आवश्यकेइति।तत्फलमाह।

ल०भा०प्रो०स० अपेक्षायादुरुपपादत्वादित्यन्यत्र विस्तरः। तत्पुरुषस्येति राजाहः इत्यतस्तच्चानुवर्तते। गोंतस्मात्तत्पुरुषस्य समास
२६१ स्यांत ष्टजित्यर्थस्तत्फलितमाह। गोंतादिति। नालेति। नतु तद्धितलुग्विषय इत्यर्थः। तेन पंचभिर्गोभिः
क्रीतः पंचगुरित्यत्र नैकाष्टत्यीसत्रापि समाहारे द्विगुः एकमप्यष्टपकाङ्क्षि कपाणं दददने कंमन्यत इतित
त्रारोपितबहुत्वाश्रयसमाहारसत्वात्। एकमिन्दी तितुनानभिधानात्। द्विगुरेकवचनमिति। कर्त्तरित्युद्देस
261 मान्येन पुंसकमिदंसूत्रं समाहारद्विगावेव। अनुवादत्वे लाघवात्। अतएव पञ्चपूलीनामेकशेषेन। अनु
वादे फलं तु द्विगुवाच्यस्य समाहारस्य न कदाप्युद्भूतावयवभेदविवक्षेतिबोधनं तेन द्वंद्ववाच्ये तथाविवक्षा
याश्रपिबोधनमुद्भूतावयवभेदः समाहारस्त्वेतरेते योगपदेनोच्यते। सनपुंसकमित्यत्र तच्छब्देन समाहा
रद्विगोर्द्वंद्वस्य च परामर्शस्तदाह। सनपुंसकमिति। कुत्सितानि। वर्त्तमाने क्तोव्याख्यानात्। कुत्सनैरितिकरणे
ल्युट्। दुष्टं रूढो दुष्टकर्मकर्त्तरि क्तः ढः। लादाणिकमिति। अतएव समानाधिकरणाधिकारस्याबाधः। येनव
स्तुतरं स्ववृत्तिधर्मवत्वेन परिच्छिद्यते तदुपमानं सामान्यवचनत्वं चोपमानोपमेयसाधारणधर्म इव ११
विशिष्टोपमेयवचनत्वं। परंतु स्वसमभिव्याहृतनिष्ठमुपमानत्वमिवा
दिद्योत्यं साधारणधर्मसंबंधस्योभयत्रबोधे तात्पर्यग्राहकता चोपमानश्यामघनाभिन्नश्याम उपमेयइ
तिबोधः। अतएवोपमानोपमेययोः समानविभक्तिकत्वनियमः समासे त्वस्यार्थस्य समासशक्तिबलाद्बो रामः
धः। उपमा नानीत्यस्योपमानत्वेन बोधकानीत्यर्थः। अन्यथास संबंधिकत्वाप्ता २६१

एवं पंचानां खद्वानामिति नियमेन षष्ठ्यामेकविभक्तं यत्तत्त्वेनोपसर्जनत्वात् । ह्रस्वे दं तत्तद्धिगुत्वात् पंच
खद्वीत्यत्र ङीप् स चावयवाभिन्नो बुद्धिकल्पितभेदवानपि भाष्य हस्यतद्धितार्थत्वे पि साम्य । हि कस्य लुकि पंचग
वामित्यत्र गोरतद्धितलुकीति टच् न स्यात् पंचकुमारीत्यादौ लुक्तद्धितलुकीति स्त्रीप्रत्ययस्य लुक् स्यादिति पृथ
ग्ग्रहणं तत्सामर्थ्यादेवात्र वाच्य इति व्याख्यातं । उदात्त इति सातिशिष्टत्वा तत्पुरुषप्रयुक्तसमासांतोदात्तत्वे
नेति भावः । विकल्पे ओष्ठ इति । मह्या विभाषयेति भावः । तत्सप्तपत्ते टजभावे पंचगो धुन इस्याद्यपि स्यादिति भावः ।
स्पष्टं चेदं भाष्ये । एवं चोभयत्रापि नित्यत्वमात्र बोधकं वार्त्तिकमिति बोध्यं । अत एव तद्वार्त्तिकमुक्त्वा किं प्रयोज
नं समुदायवृत्त्यावयवानां कदाचिदप्यवृत्तिर्मा भूदित्येव प्रयोजनमुक्तं भाष्ये तत्रत्तत्पुरुषो बहुव्रीह्यवयवोत्त
 रपदे इव तत्पुरुषावयवोत्तरपदे पि । अत एवोत्तरपदे तत्परिमाणिनाद्विगोः सिद्धये इत्युक्तं । द्वंद्वस्तु बहुव्रीह्य
वयवोत्तरपद एव । द्वंद्वावयवे प्रियद्वित्वादौ प्रियशब्देनोभयोः समानाधिकरण्यं । न द्वंद्वावयवोत्तरपदे । बहु
ष्वो द्वंद्वे होतृपोतृनेष्टोद्गातार इति प्रयोगे एतदनभिधानात् । पदयोर्निष्कृष्येकार्थीभावाभावे पि समासादि
प्रवृत्तिरस्तीति निरूपितं एवं तयोर्निष्कृष्य समानाधिकरण्याभावे पि यथा कथंचित् सामानाधिकरण्यमादाये व
तत्प्रवृत्तिरत एव पञ्चाम्रशाला प्रियद्वित्वादौ पुंवत्सिद्धिः पुंवत्वे यथा कथंचित्सामानाधिकरण्यमपि न पामकसमा
से निष्कृष्येवेत्यत्र न विनिगमकं । अस्य प्रत्याख्यानपक्षे एकविंशतिभरद्वाजं चं प्रपाः प्रिया यस्य इत्यादि बहुव्रीहाव
व्ययीभावादितु नानाभि धानात् । वस्तुतो द्विगं प्रोतिनायासिद्धैः न पाणिनेकार्थीभावे द्वं यो

सैवयद्यप्युपमेयत्वं तद्वत्त्वेन परिच्छेद्यत्वमेव तत्स्थापितस्य तत्त्वं तद्विधयैवेति तन्न नित्यसापेक्षत्वमिति दिक्।
विशेषणं। अत्र विषयता विशेष्यरूपं विशेषणत्वादि गृह्यते व्याख्यानात्। उक्तौ भेदकभेद्यशब्दाभ्याम् अपि तदेवंव्या
वर्त्तकत्वरूपं तत्तु नील इति सामान्योपक्रमे उत्पलस्याप्यस्तीत्यव्यावर्त्तकं। अत्र जातिसंज्ञयोर्गुणक्रियाभ्यां समभि
व्याहारे विशेष्यत्वमेव। गुणयोः क्रिययोर्गुणक्रिययोश्चानियमएव। व्याप्यव्यापकभावापन्नजात्योरप्येवं।
यथाम्रतरुत्वयोस्तद्भावापन्नयोस्तु व्यापकस्य विशेष्यतैव। यथा शिंशपावृक्ष इति। यत्रैकोवयवशब्दः

262

परः समुदायशब्दस्तत्रावयवस्य विशेषणत्वमेव। अत एव वर्णोऽवर्णेनेति सूत्रे भाष्ये कृष्णसारंग इत्युदा
हृत्य सत्तृतीयासमासेनेदं सिद्धमित्युक्तमन्यथा कर्मधारये निपातानियमेन तृतीया समासे च तन्नियमे
न तदसंगतिः स्पष्टैव द्वयोरप्यवयवशब्दत्वे त्वनियमः। एवं च सोमयाजि इत्यस्य इत्येवोचितं इत्यस्य सोमया
जीत्याद्यसाध्वेव। कुब्जखंजः खंजकुब्ज इत्यादौ विषयतायाश्चापि शाब्दबोधे भानाद्बोधे विशेष इति दिक्।
पूर्वापर। बहुलग्रहणानुवृत्त्या क्रियाशब्दैः पाचकादिभिरेषां न समास इति समर्थसूत्रे भाष्ये एवं चापराध्या
पक इत्युदाहरणं चिंत्यं। अपरमीमांसक इत्याद्युचितमुदाहरणं। भत्सभरणीयादौ विशेषणमिति तु प्रवर्त्तितए
वेत्यपि तत्रैव भाष्ये स्पष्टं। त्त्वर्थेति। तेन श्रेण्यस्यालामेवदंडनादिरूपकरणे न समासः। त्त्वतानां तु पर
त्वात्कुगतीति नित्यसमासः। कृतादिराकृतिगणः। तेनेननञ्। क्तेनेति विभक्तिविपरिणामेन नञित्यत्रापि रामः
संबध्यते तेनोभयोः क्तांतत्वे एकप्रकृतिकत्वे एव वायं समासः। नञ्ग्रहणं च क्रियागतासमाप्तिद्योतकाव १६२

मान्यवचनैरित्यनेनैवउपमानसमासलाभेतद्वैयर्थ्यंस्पष्टमेव।एवमुत्तरसूत्रेउपमितमित्यस्युपमेयत्वे
नबोधकमित्यर्थकं।एवमेवभाष्यस्वरसलाभेनतद्वैयर्थ्यमित्याहुः।उपमितं।उपमेयत्वमुपमानपरिच्छे
द्यत्वंउपमानोपमेययोःसमभिव्याहारेउपमानस्यविशेषणत्वैवतदाह।विशेष्यस्येति।एतच्चोपमितमित्ये
तत्स्वारस्यात्।तस्योपमानेननित्यसाकांक्षत्वाच्चव्याघ्रादीनामुपमानत्वेएवउभयोःसमानलिंगत्वस्यैव
चप्रवर्त्तते।अतएवपरवल्लिंगमितिसूत्रेद्वंद्वैकदे शिनोरितिन्यासकत्वात्पुरुषव्याघ्रग्रहणंप्रत्याख्यातं।
अन्यथास्यापूर्वपदार्थप्रधानत्वस्यभाष्याब्धिरित्यादौह्युपमानपरवल्लिंगस्यासिद्ध्यर्थं तत्पुरुषग्रहणावश्य
कत्वेनतदसंगतिःस्पष्टैव।भाष्याब्धिःकातिगंभीरइत्यादौसामान्यधर्मप्रयोगेपिलिंगभेदेपिमयूरव्यंसका
दित्वात्सिद्धं।सच्चराजोत्तरमित्यादौपूर्वपदार्थप्रधानोपिद्वंद्वःपरवल्लिंगतापितत्पाठेनैवविशेषणसमासेन
तुनसिद्धिःउपमानस्याविशेषणत्वेतत्पूर्वनिपातापत्तेः।एवंचभाष्याब्धिरित्यादौरूपकमेव।यत्तु।अनुपा
एसा ५ त्तधर्मेसौम्यविवक्षायामनेनसमासइतितन्न।एतदुपादानवैयर्थ्यापत्तेरुपात्तधर्मे सत्वेतेनैवसाम्य
प्रतीतेरनुभवात्सकलकलःपुरुचंद्रोराजतेत्यादावुपात्तधर्मातिरिक्तधर्मस्यसाम्यप्रयोजकस्याभावाच्चेतिदिक्। क ४
पुरुषव्याघ्रइति।उपमानक्रूरव्याघ्राभिन्नःक्रूरपुरुषउपमेयइतिबोधः।व्याघ्रइवक्रूरइति।नन्वक्रूर
सापेक्षत्वेनासामर्थ्यादत्रसमासाप्राप्तिःप्रधानस्यसापेक्षत्वेसामर्थ्याभावात्।विशेषणमुपमानंतुनित्य
सापेक्षमितितत्सापेक्षत्वेन्नदोषः ... त्वात्सापेक्षत्वाद्यसाहितत्वं तच्चेतत्वे नञ्झा त

ता१

ल०श०शे०छ० त्वाध्यसामान्यचिंतयाचसर्ववाधः। इभपोटेति। इभीपोटेत्यादिविग्रहः। जातेः पूर्वनिपातं पोटायुवतीतिसू
१६२ त्रं। प्रशंसाच। जातिरितिवर्त्तते। ननुमतल्लिकादेः स्त्रीत्वात्प्रशस्ता इत्यनेन युक्तः प्रशस्ता गौरित्यर्थ इति पाठे तू
हा २ दृष्यादेः पुंस्त्वात्स्त्र्यंकांडस्य क्लीवत्वाद्युक्तोत आह। ननु विशेष्याणि घ्नाइति। युवत्यामेवेति। जरत्यां युवती धर्मारो
पेतु युवतीशब्दस्य विशेषणत्वेन विशेषणमिति समासेपि पूर्वनिपातनियमसिध्या जरतीग्रहणस्य वैयर्थ्यमेव
263 स्यादिति भावः। कतर। कतरप्रत्ययांतास्तुल्यवाचकाः। अजातिभिन्नवाचके न समस्यंत इत्यर्थः। तुल्यमहानि
त्यादौ परत्वादनेनैव समासः पूर्वनिपातनियमार्थमिदं। सत्कसंपरमपूज्य इत्यादौ षष्ठीसमासे बोध्यः। यद्वा
बाहुलकादेतद्विषये सन्महदित्यस्यैव प्रवृत्तिः। सामर्थ्यादिति। पूर्वनिपातस्योभयत्रापि समत्वादिति भावः। जा
तिभिन्नवाचके न समासे हि पूर्वनिपातानियमे प्राप्ते तन्नियमार्थमिदं सार्थमिति। अजालेलेत द्यर्थ स्या
दितितत्सामर्थ्याद्विशेषणसमासबाध इति तात्पर्यं। इदं प्राचामनुरोधेन। परेतु। अजालेति उक्तार्थस्य स्पष्टतया
लाभायैवात एव कुरुगार्हपतेतिसू त्रभाष्योदाहृते पराप्यकं बलः पराप्यहस्ती त्यत्र विशेषणमिति समाससिद्धिः
स११ भोज्य ओदन इत्यत्रासमासः प्रत्येवं बाहुलकाद्बोध्य इत्याहुः। समानाधिकरणेनेति। वर्णवाचिना तादृशेन
वर्णवाचि समस्यत इत्यर्थः। सारंगश्चित्रः कृष्णशब्दस्तदवयवे लाक्षणिक इति। समानाधिकरणं विशेषण
मित्येव सिद्धे इदं व्यर्थं। न च वर्णो वर्णेष्वनेनेति स्वरविधायके प्रतिपदोक्तस्यास्यैव ग्रहणार्थमिदमत रामः
एव सारंगस्यावयवः कृष्णः सारंगकृष्ण इत्यत्र तेन पूर्वपदप्रकृतिस्वरो नेति वाच्यं। कर्मधारयस्वरप्रक १६२

योपलक्षणं।तेनकृतापकृतादिसंग्रहः।पूर्वनिपातनियमार्थंचेदं।देवब्राह्मणइति।देवपूजकोब्राह्मणइत
र्थः।यद्यपिपूर्वपदस्यतत्र दर्थेलक्षणयाविशेषणसमासेनासिद्धंतथापिमुख्यार्थे शाकप्रियपार्थिव
इत्यादिनिवृत्त्यर्थमिदं।सन्महत्।महापापमित्यादौपूजाभावेपिविशेषणसमासोबोध्यः।अत्रापिम
हत्त्वेनपापस्यस्वगुणांशेपूजास्त्येवेत्यन्ये।वृंदारकशब्दोदेवतावाची।द्वितीयोगजसर्पवाचीतेषामुपमा
नत्वेनैवपूजावाचित्वादाह।व्याघ्रादेरित्यादि।सामान्येति।गोकुंजरःस्थूलइत्यादौ।कतरकतमौ।द्वयोरे
याद्द कस्यवाबहूनांमितिसूत्रयोरुपाधिप्रत्याख्यानात्कतमोभवतांपंडितइत्यादौसमासाभावायजातिपरिप्रश्नइति।
यथान्यासेपिकतरार्थंतत्र।किंराजेति।किमःक्षेपइतिसमासान्तनिषेधः।क्षेपे किं।कोराजापाटलिपुत्रे।तत्पु
रुषःतत्पुरुषाधिकारेएतत्करणेलोकसंज्ञाधिकारात्तस्याभ्रनयावाधःस्यादितिबोध्यं।समानाधिकरणप
दावयवकइत्यर्थेनव्याख्यानात्।पुंवत्कर्मधा स्त्रियाःपुंवद्भाषितपुंस्कादनूङित्यनुवर्त्तते।अपूरणीति
प्रियादिष्वितितुनानुवर्त्तते तदाह।पूरणीत्यादि।एतेनस्त्रियाःपुंवत्तसिलादिष्वितिसिद्धेइदंव्यर्थमि
त्यास्तं।महानवमीति।पुंवत्वेआन्महतइत्यात्वं।तथाकोपधायादेरिति।एतेननिषेधप्रकरणस्थस्वमेत
त्साध्यंपुंवदितिवचनकार्यमित्यपास्तं।मध्येपवादइतिन्यायेनपरंनिषेधवाधानापत्तेः।नकोपधायाः
संज्ञापूरण्योश्चवृद्धिनिमित्तस्य।स्वांगाच्चेतः।जातेश्चेतिपंचसूत्रेष्वर्थः।विधुन्मूलकरूपयुक्ति
मूलकस्यनिषेधाश्च बलीयां [illegible] कर्मधारयपांशेस्यविधेश्चारिताथ्यी

ल॰श॰शे॰पू॰ १६४ शब्देन समासे तत्पुरुषत्वाभावाय। तेन नैकधेत्यादौ पूर्वपदप्रकृतिस्वरो न। अत्रैव नलोपं वारयितुं लोपविधाय
केऽकारोच्चारणं। प्रसिद्धतरत्वान्नञ आश्रयणं न तु स्त्रीपुंसाभ्यां नञ्। पितुर्न स्वपनेच्छति। अत एव नलोपो न
ञ इति सूत्रे नञः सानुबन्धकस्य ग्रहणं व्यर्थं नसेसेवसिद्धं। न च प्रश्नपुत्रे दोषः सानुबन्धकत्वात्। अव्यये
ष्वपि नेत्येव पाठ्यमित्याशयः। पामन पुत्र इत्येतद्वारणार्थं तु सानुबन्धकः पठित इति भाष्योक्तं संगच्छत इति वदं
ति च तेषामुभयत्रापि ञकारः स्पष्टार्थः। नैकधेत्यादि नान्तरीयकमिति च पृषोदरादित्वात्साधु। नलोपो। नञो
764 शिति सिद्धे लोपवचनं नसाकच्कार्थं तेनाकब्राह्मण इत्यादि सिद्धमित्येके। नन्वेत्यादौ द्वित्वे बहुव्रीहिवद्भावेऽपि
नानेन लोपः। उत्तरपदशब्दस्य मुख्यसमासचरमावयव एव रूढेरित्याहुः। तस्मान्नुट्। नञो नुडभावाय नाक
नासत्ययोर्न लोपाभावे तद्वारणं पञ्चतस्मादिति ततो व्याख्यानाच्चाचीति सप्तमी षष्ठ्यर्थे सप्तमीनिर्देशस्तु यस्मि
न्विधिरिति परिभाषाप्रवृत्तये तदाह। अजादेरिति। नुक्तु न कृतः ङमु द्व्रसंगात्। अनस्व इति। आरोपितो
र्थ इति बोधः। नञ् तु द्योतकः। तत्र तादात्म्यारोपस्य भेदसादृश्ययोः सतोरेव सत्त्वेन संसर्गारोपस्य तदभाव एव
संसर्गक्षेपेण १२ सत्त्वे नारोपितत्वबोधे सादृश्याभावादीनामर्थतो बोध इति नाब्राह्मणपदात्क्षत्रियादिप्रतीतिरित्यन्यत्र विस्तरः।
ऽपृथग्भाव इति। तत्राप्यारोपितो घट इत्येव बोधः। भेदे न तदारोपबोध इत्यन्ताभावबोधस्तादात्म्येन तदारोपबो
धे भेदबोधोऽत्र च प्रकरणादिकं नियामकमिति बोध्यं। विकल्पत इति। पूर्वपदार्थप्राधान्येऽव्ययीभाव उत्तर रामः
पदार्थप्राधान्ये यमिति रीत्येति भावः। न्यायसिद्धेऽर्थे लिंगमप्याह। रक्षोहेति। अ संदेहादित्यस्यारोपितः संदे १६४

रणे तत्पाठेन सिद्धेरिति दिक्। बहुवचननिर्देशादाद्यर्थावगतिरित्याह। कडारादय इति। कर्मधारये किं।
कडारः पुरुषको ग्रामः। एतदेवेति। एतदपीत्यर्थः। युवाखलतीतिसूत्रे जरतीग्रहणस्यापि ज्ञापकत्वात्। चतुष्पा
द्जातिग्रहणं कर्त्तव्यमिति वार्त्तिकं किल व्यर्थमित्याह। जातिवाचिन इति। मयूरो व्यंसक इति। केचित्तु मयूर इव
व्यंसक इत्यर्थे उपमानसमासापवादोयं प्रतिपदोक्तोपमानसमासविषयकः पूर्वपदप्रकृतिस्वराभावा
येत्याहुः। उच्चावचमिति। उच्चावचादेशोत्र उच्चैर्नीचमित्यर्थे इदमित्यन्ये। निश्चितप्रचित्तयोनि श्वभ्रचाद
प्राः। एतदंतर्गणसूत्रमित्याह। आख्यातमिति। क्रियाप्रधानमित्यर्थः। अत्रैहीडादय इत्यतोन्यपदार्थ इत्यनुव
र्त्तते। गणे तस्य पूर्वपाठात्। कृत्लसाप्यलोपं तं तत्साधयितुं सूत्रे मेण पाठस्तदाह। यत्राभिधीयत इति। अश्नी
तपिबतेति। अन्यपदार्थस्य क्रीडादिरूपत्वेन स्त्रीत्वात्समासस्य प्रातिपदिकत्वान्न टाप्। खादत मोदतेति।
मोदंतामित्यस्य स्थाने मोदत इत्यादेशः। एहीडादय इति। लडुत्तमपुरुषैकवचनस्य ईडादेशः। एहीयवमित्य
त्रैयवमित्यस्य यवादेशः। उद्धरकोष्ठादि। उद्धरोत्सृज इति विग्रहः। उत्सृज त्वं स्वविवरं देहीति कोष्ठादिति तूद्धरे
त्सृजाकोष्ठापूरणाय। इह पाठ इति। एहीडादिषु तिङंतपूर्वपदोत्तरपदकसमुदाया इत्यर्थः। कर्त्तेति। क्षेरिदि
जहिजोड इत्याभीक्ष्ण्येन यत्राह स जहिजोडः। चिन्मात्रमिति। अत्रानुनासिकानित्यता निपातनात्। एवा
र्थमात्रशब्देनात्र समासः। मयूरव्यंसकादयश्चेति चकार एवकारार्थः। तेनैषां समासांतरघटकता नेति परमो म
यूरव्यंसक इत्याद्येव। ईषत्कुणेति। अकृतेत्यस्य स्थाने इदंतदाह। ईषदकृतामिति। नञ्। अकारो निषेधार्थकं न

निर्दलतापत्तिः। एतत्समकक्षतयाप्यवाग्रे नञस्तूत्तरपदार्थप्रधान इत्युक्तेरसंगतिः अव्ययीलाहि अस्तुतद्युत्त
रपदार्थइतिवक्तुमुचितं एतल्लक्षणे ह्यनेकमित्यादावेकवचनसिद्धिवदुपमानमनसिनिधायोत्तरपदार्थ
प्रधानत्वसिद्धान्ततत्पुरुषस्योत्तरपदार्थस्तप्रधानत्वाच्च। अत्र पूर्वपदार्थप्रधानत्वपवादत्वेनाव्ययीभा

वस्य बाधनान्नत्राव्ययीभावाभावो बधंपस्वीकार्यः। अन्यथाव्ययीभावासिद्धिस्तत्पदूषणानुपन्यासेन भाष्य

स्यन्यूनतापत्तिः तस्मादसंताभावार्थकनः क्रियादि प्रतियोगिकाभाव बोधकत्वेनोत्तरपदार्थेनान्
न्वयादसामर्थ्येन नाव्ययीभावोऽमक्षिकमित्यादावसंदेह इत्यादौ संदेहस्य गुणत्वेन भवत्येव तदभाववोधो
नञा। एतदेवाभिप्रेत्य भाष्ये उक्तं प्रसज्यायं क्रियागुणौ ततः प्रतिषेधतीति। असंदेह इत्यादौ चारोपितः संदेह इ
ति भेदेनारोपज्ञानात्तदसंताभावप्रतीतिः किंचार्थाभावशब्देन ओघटकताया स्पस्टत्वागृहीताव्ययतया
नेन नाव्ययीभावः स्फुटत्वागृहीताव्ययेनाव्ययमिति समासाभावस्य तत्रस्फुटत्वेडपपादितत्वात्। अत्रैवेदं
भाष्यमपि मानं। असंहितमित्यत्र संधानं संहितमिति भावे क्तः। आरोपितः परः संनिकर्ष इत्यर्थे तदभाव
संहितासंज्ञा न प्राप्नोतीत्यर्थ इति न तदसंगतिः संहितशब्दः परसंनिकर्ष इति स्फुटत्वबलात्स्त्रीलिंगो वार्त्ति संज्ञा२
कप्रामाण्यात्क्लीवोऽपि। अत एव संहितवदित्यादि प्रातिशाख्यतद्भाष्ययोः प्रयुक्तं। अत एव परः संनिकर्षः रामः
संहिता चेद्द्रुतायामसंहितमिति वार्त्तिकं परः संनिकर्षः संहिता चेद्द्रुतायां कृतौ संहिता न प्राप्नोतीति शे
षपूरणेन वार्त्त्याः पद्रुतायामेनहि परः संनिकर्षो नाद्रुतायामिति वोनासंहितमिसंज्ञोर्पितो हेतु २६५

हइत्यर्थः। संदेहस्याभावः प्रयोजनमिति यावदव्ययीभावेन द्वन्द्वे हि परवल्लिंगेनासंदेहाइत्यनुपपन्नमिति भावः।
इदं यस्य ग्रायां भाष्ये ऽसंहितमिति। संहिता संज्ञास्य त्र भाष्ये वार्त्तिकं द्रुता भिन्नायां मध्याविलंबितायां वृत्तौ
संहिताभाव इतितदर्थः। परे तु। भाष्येनञ्तत्पुरुषोन्यपदार्थप्रधानउत्तरपदस्य धर्मपरतया न विद्यते ब्राह्म
णं यस्मिन्सोऽब्राह्मणः बहुव्रीहिस्तु तस्य धर्मिपरत्वेचरितार्थः। अत एव नञोऽस्त्यर्थानामुत्तरपदलोपश्चेत्य
नेकमिति स्त्रत्रस्थवार्त्तिकं संगच्छते। एतेन तत्वे ऽपवादत्वाद् यं बहुव्रीहेर्बाधकः स्यादिति कैयटोक्तमपास्तम्। अ
स इत्यादौ सर्वादिकार्यं तु एतत्तदोः सुलोपोऽकोर नञ्समास इति ज्ञापकात्सिद्धमत्र पक्षे ऽवर्षा हेमंत इत्यादौ वि
शेष्यगतलिंगवचनापत्तिदोषमुक्तः। तन्नयद्यपि लिंगमशिष्यं लोकाश्रयत्वादिति परिहर्तुं शक्यते तथापि
क्वचन दोषः स्थितस्तत्र पूर्वपदार्थप्रधानत्वे हि भविष्यत्यत्रापि पक्षे ऽस इत्यादि सिद्धिः प्रागेव देव। न च
पूर्वपदस्याव्ययत्वेन तदर्थप्रधानस्यास्य लिंगसंख्याभ्यां कथं योग इति वाच्यं। शब्दशक्तिस्वभावाद्धाव्य
नञोऽसत्वभूतार्थाभिधायित्वे पि समासे सत्वरूपार्थाभिधायित्वेन तद्योगसंभवात्। पक्षगुणवच
नानामाश्रयतो लिंगादिवत्समासार्थः प्रतियोगितया प्रत्ययं प्रति तस्य लिंगादि समासस्य भविष्यति।
तेनात्र पक्षे ऽवर्षा हेमंत इत्यादौ हेमंताद्या अपगत लिंगसंख्याप्रसंग इति कैयटोक्तमपास्तम्। अभावेन
प्रतियोगिनो विरुद्धज्ञानापाश्रयणेन तस्याप्याश्रयत्वात्तद्घटितसमासघटकेनापि स्थितस्याञ्चत
स्येवाश्रयस्य ग्रहणे विशिष्ट ... नञाद्यर्थानुरूपत्वे ... मासेपि पक्षे तद्दोषानुवृत्तौ भाष्यस्य

ल०श०श्रो०षू० स्तु नग्रहणं व्याख्यानादितिभावः। अनितिपरं किमिति। तेप्राणधातोरित्यस्य संज्ञानियमार्थत्वेऽप्यर्थमिति प्रश्नः।
१६६ प्रयोगनियमार्थत्वाभिप्रायेणोत्तरं। भाष्यकृता तु संज्ञानियमार्थत्वमाश्रित्येदं छन्दसि परेऽपि व्यवहिताश्चेति
सूत्रद्वयं च प्रत्याख्यातं। अत एव सुकुटं कराणीत्याद्यपभवमित्यादिभाष्यप्रयोगः संगच्छते। कटं सुकराणीत्या
दित्वनभिधानेन वारणीयमत्र पक्षे। खाडि तीति। एतद्विशेषणाभावे प्रयोगनियमशास्त्रादेव प्रयोगो
266 च्छेद एव स्यादितिभावः। अनितिपर इति। चात्र बहुव्रीहिः। नितौ वितिवत्तावे परग्रहणं त्वनुकरणकृताव
नितिपरत्वविवक्षार्थं तेन श्रोषड्वौषडिति कत्वेत्यादौ व्यवहितेऽपि निषेधसिद्धेरेतद्बलादेव ते प्रागिता
दावुभयोः पूर्वप्रयोग इति दिक्। आदराना। अनादर इति बहुव्रीहिरतः पाखंडिनमसत्कृत्येत्यादि सिद्धं। तत्पुरु
षे हि यत्रादरप्रसक्तिस्तदीपानादर एव स्यात् गुरुमसत्कृत्येत्यादौ। कणेमनसी। श्रद्धारूपे इति विशेष्यं। कौणे
हत्येति परावरयोगे चेति त्वा। पुरोव्ययं। पुरोभूयप्युरोगत्येत्युदाहरणं। कृञ्योगएवेति नियमेमानाभावा
त्। प्रध्वं यपदमनुवर्त्तत इत्याशयेनाह। मांतमव्ययमिति। तेन कांडमस्तकत्वेत्यत्र न। अस्तंहितम्। ज
लमच्छंगच्छतीति। प्राग्रीश्वरादित्यधिकारान्निपातत्वेऽव्ययत्वे च विभक्तिलुक् स्यादितिभावः। सप्तमीनिर्देशेऽपि
तस्मिन्निति परिभाषा न प्रवर्त्तते क्रियायोग इत्यनुवृत्तेः। एतेनानुस्वारव्यवधानात्कथमत्रप्राप्तिरित्यपास्तं। रामः
उपाजेन्वाजे। शब्दौ एदंतौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य बलाधाने वर्त्तेते। च्व्यंते तु पूर्वविप्रतिषेधेन
नित्यैव संज्ञेति भाष्ये स्पष्टं। च्व्यर्थ इति। इदं प्रायिकं। अत एव नमस्करोतीत्यादौ च्व्यर्थाभावेऽप्यनेन गतित्वमाहुः। १६६

त्वेन व्याख्यातो भाष्येन प्राप्नोतीसंशयस्तद्व्याख्यानत्वे ह्यसामर्थ्यात्समासानापत्तिः त्वद्रीत्या संहितासंज्ञाभा
वः प्राप्नोत्येव वदेत् वार्त्तिककृतो ऽहेत्वकथने न्यूनतां चेत्याहुः। प्रसंगादाह। नञो नलोप इति। तिङन्ते
नसमासाभावादप्राप्तेर्वचनं। अपचसीत्यस्य कुत्सितं पचसीत्यर्थः। अत एव नञ्समानार्थो ऽशब्दो ऽप्ययेष्वप्रा
माणिक इति बोध्यं। नञा समासे ऽनेकार्थत्वमेव स्यादत आह। नभ्राडिति। एकशब्दस्येति भावस्तत्तो ऽप्यप्रका
रे। प्रकारे ऽनेकसंख्यात्वप्रतीतिः एवमेव नमेरुनाराच नान्तरीयकादयः साधवः। शत्रन्त इति। यातेः क्विपि नि
पातनात्तु गित्तुमेकत्वस्यत्वादि क्षितिरुत्रेवृत्तिः। नासत्या इत्यन्ता निश्चलारिष्यय्यदान्यत्नेपतो निपात्यन्त इत्यर्थः।
समासे हि नवेदो नासत्ये तिस्यात्। नासत्या इति बहुवचनं वैचित्र्यार्थं न तु बहुवचनान्तस्यैव साधुत्वार्थं ना
सत्यावश्विनौ दस्रावपि सुमरविरोधात्। अश्विनोरेव नासत्या धुत्तिनान्यत्रानसत्य इत्येवेति हरदत्तः। नमुचि
शब्दे ऽप्यौणादिकः क्विप्प्रत्ययः द्वीयत इति पाठे द्वी धृ हिंसायामिति दिवादिस्तस्याकृतिगणत्वात् द्वीयते रिति
ह्रस्वपाठे द्रीनिवासगत्योरस्तु दादिः। एषु नञ्नैव समासः पूर्वपदप्रकृतिस्वरार्थः। निषेधार्थकनशब्दान्तरा
भावाच्च। कुगतीति। कुशब्दः पापार्थो ऽव्ययमेवात्र गत्यादिसाहचर्यात् तेनायं यथा पूर्वपदप्रकृतिस्वरः समर्थेने
ति। समर्थपदं तृतीययाविपरिणम्यत इति भावः। ऊर्यादि। क्रियायोग इति उपसर्गा इत्यतस्तदनुवर्त्तते। अ
त एव संज्ञाविधावपि क्विप्डजन्तमात्रं देवतविधिः। ऊर्यादयो निपाताश्च वेति निपाताः सन्तः क्रियायोगे गतिसं
ज्ञा इत्यर्थः। कारिकाकृत्येति। मर्यादास्थितियत्नकर्म इत्यर्थः। धात्वर्थनिर्देशे ण्वुल्। दासीत्सीकवाचिन

ल०शा०प्रो०स्
१६७

वलब्धमर्थमाह। तद्वाचकंपदमिति। पदमत्रविभक्त्यन्तं। स्तंबकर्णयोरित्यादौसुपीत्यधिकारात्तत्प्रकृतिकसुबन्तेल
क्षणा। अन्यथोपपदमितिमहासंज्ञालब्धोपपदसंज्ञकसुबन्ताभावात्स्तंबेरमइत्यादौसमासानापत्तिः। समासवि
धायकेउपपदप्रकृतिकसुबन्तग्रहणेसुप्यजातावितिणिनौराजदृश्वीत्यादौसमासानापत्ति समासविधाय
[illegible] स्तत्राहिसुबन्तमेवोपपदंनतुतत्प्रकृतिकमात्रंवत्वार्थद्वयपरत्वेगौरवं। महासं
मं ५ ज्ञाविरोधश्च। सुप्यजातावित्यादिविषयेसुबन्तस्यसप्तमीपदवाच्यत्वरूपंतत्स्थत्वमादाय उपपदत्वंबोध्यं। विभा
षाग्रेप्रथमेत्यादौसुपीत्यधिकाराभावेपिमहासंज्ञाबलात्तेषांतत्प्रकृतिकसुबन्तेलक्षणाबोध्या। अतएवोपपदमि
267 तिसूत्रेऽतिङ्ग्रहणंदनयोर्योगयोःसुप्सुपेतिनिवृत्तमितिभाष्येउक्तं। उपसमीपेउच्चारितंपदमुपपदं। सामीप्यं
चसप्तम्यंतपदघटितसूत्रविधेयप्रत्ययप्रकृत्यपेक्षयैवत्वमेव नत्वानुपूर्व्यमिवयथालंकर्मीणएसूत्रेउच्छत्र
णयइतिभाष्योदाहरणात्। अतोनुपसर्गेइत्यत्रानुपसर्गग्रहणाच्च। गुरुंनमस्करोतिकन्यामलंकरोतीत्यादौ
हिमवंतंशृणोतीत्यादाविवानभिधानान्नाणः। अभिधानलक्षणाःकृत्तद्धितसमासाइत्यकर्त्तरिचेतिसूत्रे
भाष्योक्तेः। नन्वेवंतत्रग्रहणंव्यर्थंप्रकृतधात्वधिकारविषयतात्वाधिकारेणैवसिद्धेरत्याह। तस्मिन्नेति।
अनेनोपपदसंज्ञासंनियोगशिष्टत्वंप्रत्ययविधे वोधयति। अन्यथान्वाचयशिष्टत्वंसंभाव्येतप्रातिप
दिकार्थेसप्तम्यामेवास्यप्रवृत्त्याभुवोभावइत्यादौनप्रवृत्तिस्तद्व्यवस्थात्वनुनासिकत्वादिवल्लक्ष्यानुरोधेनै राम:
वेतिबोध्यं। उपपदसुबन्तमितिमहासंज्ञाबललभ्यं। अतएवराजयुध्वेत्यत्रनलोपःएधानाहरकोव्रजतीत्य १६७

स १ अन्येतु ऊर्यादौ स्वरादौ चेति विकल्पफलसिद्धिमाहुः। मं तत्वमिति। गति संज्ञासंनियोगेन लवणमुष्टं
श्रीतमुदकमार्द्रमिति पंचानामिलर्थः। उरसिमनसीति विभक्तिप्रतिरूपकौ निपातौ। मध्ये पदे। विभाषा
कृञीति। अनत्याधान इति चानुवर्त्तते। तत्र चैषामेदंत्तत्वं निपात्यते। सप्तमी तु न। मध्यं पदं कृत्वा वान्वं
नियम्येति च प्रत्यये न तस्य अनन्वितत्वात्। अनत्येति किं। हस्तिनः पदे कृत्वा शिरः शेते। नित्यं हस्ते। उदाह
रणे तत्पुरुषे कृति बहुलमित्यलुक्। उपयमने किं। हस्ते कृत्वा कार्षापणं गतः। प्राध्वं। इदं मांत मव्ययं बंधनेनानु
कूल्येवर्त्तते कृञ्येव। जीविका जीवनोपायः। सुप्सुपेति क्रियायोगाभावादगतित्वं। अत्रेति। अव्यव
स्थया समासप्राप्तौ व्यवस्थार्थमिति भावः। कर्मप्रवचनीयानामिति। सा संज्ञा तु प्रतिस्तवनमित्यादौ षत्वाभा
वाद्यर्थेति बोध्यं। भाष्ये तु कर्मप्रवचनीयानां प्रतिषेधः। वृद्धो भक्ति विद्योतते। अ वेतानां च प्रतिषेधो व गताद्यर्थे
क्तव्यः। आमं द्वौ रिं द्र हैरिमि यौ हिद्वस्तु काकि हंतु कां इसुदुर्गति यः आदयः कार्थे इत्यनेनेदं वचनद्वयमपि
प्रत्याख्यातमेतद् देवसौनागे वि स्तरे। एप्यहितं स्वतीपूजायां दुर्निंदायां मां आङीषदर्थे कुः पापार्थे। प्रादयो ग
ताद्यर्थे इत्युक्तं। एवं चैषामावश्यकत्वेन कर्मप्रवचनीये प्राप्तिरेव नेति तदाशयः। तत्रोप। अयमधिकारः। अत
एवामेव तुल्य विधानमित्यादि संगच्छते। येनामेव विधीयते तेन यस्योपपदसंज्ञा विधीयत इति तदर्थात्। कर्मण्यणित्यादौ कर्म ण्यादिः सोत्रीप्रथमार्थे सप्तमी धातोरण्भवति कर्म चोपपदसंज्ञमिति तदर्थः। अ
नस्तत्रेसप्तमीपदं तदंत परं तत्संबंधात्संज्ञात्वात्। सप्तमी पदं तु संज्ञया प्रथमार्थे सप्तमीत्वेन

लं०शे०
१६८

ङ्उपपदत्वेमहासंज्ञाकरणबलान्नकदाचिदवर्यंभः दित्येवं इतिसूत्रस्थभाष्यप्रयोगेमाकदाचिद्व्यटत्तिभूत्
दितितद्धितार्थेतिसूत्रस्थभाष्यप्रयोगेहित्रिपदव्य वधानेप्रयोगेनस्यात् देवदत्तोभोक्तुंग्रामंव्रजतीतिनप्र
योगः। किंचमाङ्गेनोपपदत्वंलुङ्धातोःक्रियार्थोपि पदस्येलर्थमुपपदसंज्ञावश्यकीतिदिक्। अतिङ्ग्रहण
मिति। नचकारकोगतइत्यत्रसुबंतोपपदस्यसमासस्यवाक्यत्वे तिङंतार्थक्रियाबोधकाघटितइत्यपेकिंतदि
तिवाच्यं। तस्यक्रुध्यदान्वितयातिङंतार्थत्वाभावेनतेनतद्वारणस्याशक्यत्वात्। किंचगतादेर्द्रष्यवान्वितयाक्रिया
268 वाचकोपपदत्वाभावेनण्वुलएवतत्राप्राप्तेः क्रियावाचकशब्दग्रहणेक्रियायांसाध्यमात्रावस्थायाग्रहण
स्यगतिकारकोपपदानामितिसूत्रेप्रकृतसूत्रेचभाष्येध्वनितत्वात् प्रकृतसूत्रेउपपदमक्रियेतिन्यासेऽक्रियेत्य
स्येदंप्रत्युदाहरणमाशंक्यास्यक्रियावाचित्वाभावात् दूषितं। नचक्रियावाचित्वाभावादत्रप्रत्युदाहरणत्वंनतुमुन्भव
तीत्यस्यान्याय्यत्वात्। नच धातोःक्रियावाचित्वेनतन्निबंधनस्तुमुन्स्यादेवेतिवाच्यं उपपदमितिमहासंज्ञयातुमुन्वि
धावपिपदत्वपर्यंतनिवेशात् तस्मात्तत्रतुमुन्ण्वुलोरसाधुत्वमेवभाष्यतात्पर्यं। अप्यमात्रग्रहणेतु ग्रहण
मितियत्तयाकादियोगेपिकारकविभक्तिकत्वसुजंत्कादीनांसाधुत्वंभवत्येवेतिभाष्यप्रदीपोद्योतेविस्तारः। कारकोव्रज
तितरामित्यादेस्त्वनभिधानमेवेतिभावः। सुपेत्येतदिति। सुविलस्यासुपलक्षणमिदं। किंच। कारकोव्रजतीत्यस्यैवभाष्ये
प्रत्युदाहृतत्वेनतद्व्यावृत्तेः सुवितिप्रथमांतानुवृत्त्यैवसिध्यातद्वैयर्थ्यमितिप्रथमांतानिवृत्तिरेवतेनबोध्यपितुयुक्ताप राम:
रिभाषाकरणलाघवानुरोधेनतुभाष्येसामान्यापेक्षज्ञापकमाश्रयोमयोर्निवृत्तिरुक्ता। पूर्वसूत्रेपीति। तत्रग १६८

त्वात्तिङिति बहुव्रीहिणा तिङन्ताच्चेति समास इत्यर्थेन तादृक्प्रवृत्तेस्तदाह। अतिङन्तश्च समास इति। कथमपि
तिङन्ताघटित इत्यर्थः। समास इति तत्संज्ञकः समुदाय इत्यर्थः। कुम्भश्रसीति। नन्वेवं तरंगानपीतिन्यायेन संज्ञा
लोपयोर्लुकाबाधादिदमयुक्तमिति चेन्न। इत्थमलोपबाधयोः फले विशेषाभावेन तरंगानपीत्यस्याप्रवृत्तेः।
अलौकिकप्रक्रियावाक्यमित्यस्य समासप्रवृत्तियोग्यं लोके प्रयोगानर्हमित्यर्थः। हरिङ्ङीसत्रा पीतसंज्ञाद्यु
त्तरमेव समासो लोके प्रयोगानर्हत्वस्योभयत्रापि सत्वेनाविशेषादकृते संज्ञालोपमेवोच्चारितमित्युक्तं। कृद्यो
गलक्षणा चात्र षष्ठी। न चातरंगा द्वितीया। अकल्प्यापवाद दविषयमुत्सर्गप्रवृत्तेः। अत्र षष्ठीसमासो न। उत्तर
पदे विभक्त्युत्पत्तेः पूर्वमेवास्य प्रवृत्तेरन्तरंगत्वात्। कारकषष्ठीत्वेन षष्ठीसमासस्यापि ततः पूर्वं प्रवृत्तौ लक्षुसः अ
स्य नित्यत्वेन तत्कृततत्पुरुषसंज्ञाप्रयुक्तैकार्थीभावाभावेऽपि तत्कृतसंज्ञाप्रयुक्तस्य तस्यानपगमेनादोषात्।
एकस्या एव संज्ञाया मुभाभ्यामपि प्रवृत्त्याऽविरोधेन युगपद्वेभाष्यां। स्यपंचेदमत्र भाष्ये एवं च द्वितीयाश्रि
तेत्यादिसमासोऽप्युत्तरपदे सुबुत्पत्तेः प्रागेव अत एव कारकेतिसामान्यत एवोक्तं भाष्यकृता न च तदंशे प्रमाणं नो
गतिकारकेति समासवचनादित्युक्तं तेन कारकांशे वचनलमेव बोधितमिति दिक्। मा भवानिति। समासे सति
व्यवहितप्रयोगो न स्यादिति सूचयितुं भवानिति। इदम पलक्षणं। कारको व्रजतीत्यादेर्भाष्योक्तस्य। किंच मा

ल॰शा॰शे॰रू॰ १६८ त्वर्थेउपपदसमासः। अमैवेति। तुल्यविधानमित्य ... ध्याहारलब्धं। संज्ञायास्तुल्यविधानत्वमाश्रित्य तत्संज्ञक
स्य तुल्यविधानत्वमुक्तं। येनामैव विधीयते तेन यस्योपपदसंज्ञा विधीयते तदुपपदममयेन समस्यते नान्येन
तुल्यविधानमित्यर्थस्तत्फलितमनुवदति। तदेवेति। कालादेरन्ये प्रभृते अमैव तुल्यविधानत्वाभावान्न दो
षः। अमित्येमुल्खमुञोः सामान्यग्रहणं तेन चोरंकारमित्यप्युदाहरणं। तृतीयाप्र। वासमस्यंतेइति। यद्यप्युप
पदनिमित्तकद्विधौ समर्थपरिभाषोपस्थितेरुपपदसंज्ञासूत्रे भाष्ये उक्तत्वेनोपपदकृदंतयोर्व्यपेक्षा दुरुपपादा
769 कतो ऽसाधुत्वापत्तेः। अत एव महांतं कुंभं करोतीत्यत्र सविशेषणत्वेनासामर्थ्यान्न णिति तत्रोपपदमित्यत्र भाष्ये
स्पष्टं विशिष्टस्यतु नोपपदसंज्ञा ऽप ... दत्वात्तथाप्येकार्थीभावएववाग्रहणात्संज्ञाभावोत्र यथा गंगापारमित्यत्रा
व्ययीभावत्वाभावः। न च संज्ञायाभावाभावाद्विध्यते इति भाष्ये महाविभाषयेति ... शेषः। एवं च महतामूलकेनो
पदंशंभुंक्ते इत्यसाध्वित्याहुः। उपदंशेमूलकादेरार्थिकमेतस्यापि सत्वात्सामर्थ्यं विभक्तिस्तु प्रधानक्रियानु
रोधित्वात्खल्वन्तृतीयैवेति निरूपितमन्यत्र। त्वाच। त्केतितृतीयांतं। अलंकृत्वेति। अलंखल्वोरिति
सूत्रमुपदंशस्तृतीयायामित्यतः पूर्वमिति भावः। अथ तत्पुरुषासाधारणसमासांतानाह। तत्पुरुषस्ये। च्यंगु
लमिति तद्धितार्थे तिसमासः। द्वंद्वार्थमिति। ब्रह्मणोह्नोवयवीभूता मानुषीरात्रिरित्याद्यर्थे षष्ठीतत्पुरुषा
भिधानमितिभावः। सर्वरात्र इति। पूर्वकाले केति समासः पुंवत्कर्मधारयेति पुंवत्। सर्वनाम्नो वृत्तिमात्रे इति वा।
अतिराजीति। उत्तरपदावयवत्वस्य भाष्यासंमतत्वेनाटितोनुपस ... र्जनत्वान्ङीप्। द्वहीनइति। समांतविधेर रामः १६८

संशे ऽतिङि त्यस्य संबंधे फलाभावेन तिङं ताघटितः समासेत्येवं समासविशेष एवैव। अत एव प्रपञ्चतितरामित्सा
दौ न गतिसमासः किंतु दात्तवता गतिमता च तिङे ति वा तिङ् किं न समासस्तत्र तिङस्य स तिङंत घटिते नेत्यर्थः स
न२ हेति योगविभागेन वा। तत्राप्यधिकारानुरोधेनात्राप्यतिङं तः समास इति व्याख्यातं। अत एवान लुमतुमर्थयोरिति
सूत्रे किं व त्तस्यानधिकारादकिं वत्तग्रहणं नर्थक्यमित्युक्ता सामर्थ्यादुपपदसंज्ञार्थं तर्हि त्याशंक्य तिङिति
प्रतिषेधात् संज्ञानर्थक्यमित्युक्तं संगच्छते। अतिङिति स्योपपदविशेषणत्वे तदसंगतिः स्पष्टैव। उपपदमतिङं तेन
तितुनार्थः। अतिङिति ज्ञापयति। अनयो योगयोर्निवृत्तं सुप्सुपेति केनेदानीं समासः समर्थेन इति भाष्यासंगतेः
लुप्तत्वीयांतलकल्पनेमानाभावाच्च भाष्यरीत्याप्रसुदाहरणाभावाच्च। न चैवं तत्र वंते तद्वारणाय तत्र तस्य चारितार्थ्ये किंच
तत्र सुपेत्यस्यासंबंधे तस्य ज्ञापकत्वमिति वाच्यं उपपदमिति सूत्र संबंधे नैवानेन तिङंतव्यावृत्ते के न प्राचीनपठितया
परिभाषानुरोधेन सूत्रद्वयेपि सुप्सुपेत्यतद संबंध ज्ञापनात्। तदुक्तं भाष्ये ऽतिङ्ग्रहणं ज्ञापयति अनयोर्योगयोर्नि
वृत्तं सुप्सुपेति तत्र पूर्वसूत्रेण संप्राप्तवात्तदसंबंधः परिभाषानुरोधादेव तदाह। तथा चेति। कारकांशे ऽप्येकदेशानुमते
ष्ठ इति गम्यते भाष्याच्च कर्तृकरणे इति सूत्रविहितसमासो बहुलग्रहणात्क्वचित्सुवुत्सस्यनंतरमपि साहितस्य धन
क्रीतत्वादौ। प्राक्सुवुत्पत्तेरिति। स्त्रीप्रत्ययोत्पत्तेः प्रागित्यपि बोध्यं। अश्वक्रीतीति। अश्वेन क्रीतेति करणस्य
कृतासमासः क्रीतात्करणपूर्वादिति ङीष्। सुवंते न समासे पूर्वं टापदंतत्वाभावात्सन स्यादिति भावः। वा
घ्रामपि आङो घ्रशब्देन वे। घ्रशब्देन गतिसमासः कच्छपीत्यत्रापि सुपीति योगविभागात्केकच्छपिवती

छार्यमिति।समाहारेन्यस्यच्च स्यभावात्।सुराणाहमिति।सुराणसुदिनाभ्यामिति क्लीवत्वं।अग्र्या आख्या अग्रे भवोग्र्योमु
ख्यः।अग्रेत्यादि किं।देवदत्तस्याग्रे देवदत्तोरः।छ्पानसमिति।प्रादिसमासः।अतिश्वइति।ततोधिकत्वेनवा निलयः।
सेवेति।नीचैस्पर्धः।आकर्षश्व इति।पंचाङ्गुलो धान्यादिकर्षकः काष्ठविशेषः आकर्षः उपमाना। किंस्तुनो निष्क्रा
तोनिःश्वा।फलकसदृशमिति।मयूरव्यंसकादित्वात्समासः।नावो।मंडूकप्लुत्याऽतद्धितलुकीत्यनुवर्तते।पर
वल्लिंगतया स्त्रीत्वं प्राप्नोतीत्यत आह।क्लीवत्वमिति।द्विगोरिति।खारीशब्दान्ता द्विगो रित्यर्थः।अत्राप्यतद्धित
लुकीत्येव तेनद्वाभ्यां खारीभ्यांक्रीतो द्विखारि इत्येवउदाहरणं द्वेखारमित्यादौ क्लीवत्वं प्राग्वत्।अर्द्धखारीति।
एकविभक्तावषष्ठ्यंतेति वचनादुपसर्जनत्वाभावेनन ह्रस्वः ह्रस्वपाठे तु लोकतो नपुंसकह्रस्वत्वं।अंजलि
भ्यामिति।तत्परिमितधान्यादिनेत्यर्थः।अस्यपरिमाणत्वाड्ठञो ध्यर्द्धेतिलुक्।जनपदे भवो जानपदः।भावप्र
धाननिर्देशस्तदाह।समासेनेति।प्रत्यासत्तिलभ्यमेतत्कस्ये त्याकां क्षायां संनिधाना द्ब्रह्मण इतिलभ्यते।सु
राष्ट्रे इति।अधिकरणस्यशेषत्वविवक्षाया षष्ठीसमासोत्र वोध्यः सप्तमीति योगविभागस्तु न भाष्यारूढः।जान
पदेति किं।देवब्रह्मा नारदः कुब्रह्म इति ब्राह्मणपर्यायो ब्रह्मशब्दः श्मशानाद्यधिकृतो ब्रह्मेति चार्थः।तत्रापि म्लेच्छत्रै
यस त्तायास्तत्रैव प्रसिद्धत्वात्।आन्महतः।ग्रहीष्यत इति।एवं च समानाधिकरणग्रहणं व्यर्थमिति भावः।महावाहु
रिति।वहुव्रीहिः।ननूत्तरसूत्रे द्व्यष्टनोरेव ग्रहणादेकादशेत्यत्रात्वं न स्यादत आह।आदिती ति।योगविभागस्य
भाष्यानारूढत्वादाह।निर्देशादिति।अन्येषामपि दृश्यत इति दीर्घत्वमिति परे।कृते आत्वमिति।आन्महत इत्यत्र
लिंगविशिष्टपरिभाषाभावस्य ज्ञापकं सूत्रे भाष्ये उक्तं तयापरत्वात्सु वत्वं वाधित्वात्वं स्यादिति न शंक्य मितिभावः।म

276

३६

निसत्वान्नटच्। अत एव द्विगोर्वेत्यनुवर्त्तमाने रात्र्यहःसंवत्सराच्चेति चरितार्थं सामासांते हि रात्र्यहरं तद्विगो
रप्रसिद्धिरिति बोध्यं। अनिसत्वादिति। अत एव समासांतप्रकरणे साने ति ज्ञापकसूत्रे भाष्ये उक्तं। मद्रराज्ञीति। टचि
भस्याढे इति पुंवद्भावे टिलोपे मद्रराजीति स्यादिति भावः। अन्होदं। अत इत्येव पूर्वपदविशेषणं तया सामानाधिक
७४ रण्येनान्वये ऽदंतपूर्वपदे त्यर्थलाभे तद्ग्रहणं स्पष्टार्थं। अन्ह इति। नांतानुकरणं षष्ठी द्व्यन्हेति। द्वयोरन्होर्भवे
त्यर्थः। इदं तद्धितार्थे द्विगोर्विशेष्यनिघ्नत्ववादिनां मते। वस्तुतोऽस्य स्त्रीत्वमेव नास्ति। रात्राह्नाहा इति पुंस्त्वेन बाधा
त्। नन्वेदं रात्राह्नाहादिशब्दघटितसमाससमासांतनिमित्तलिंगस्यांतरंगस्यैव बाधकं न तु बहिर्भूततद्धितार्थनि
मित्तलिंगस्यापीति वाच्यं। सत्योपस्थितरात्राह्नाहादिशब्दार्थविशेष्यलभ्यस्यैव बाधापत्त्या बहिर्भूततत्समाहारविशेष्य
लभ्यस्य बाधानापत्तेः। न च पुंस्त्वाधिकारे ह्नाहांताः द्वंद्वेडं भे दारान्नांताः अणसंख्याकाइत्यनंतरमथांताः प्राद्यल
प्राप्तायन्नपूर्वाः परोपगास्तद्धितार्थे द्विगुः संख्या सर्वनाम तदंतका इत्यमरोक्तेन परं विरोधे शेषं तु ज्ञेयं शिष्टप्रयो
गत इत्युक्तेर् न्हाहांता इत्यनेन प्राप्तस्य पुंस्त्वस्य तद्धितार्थे द्विगु इति परोपगत्वेन परत्वाद्बाध इति वाच्यं। कोश
स्य लोकव्याकरणसिद्धलिंगानुवादकत्वात् व्याकरणैकवाक्यतया तद्धितार्थे द्विगु इत्यत्र रात्राह्नाहांतादिरिक्तस्यैव ग्र
हणात्। अन्यथा प्राप्तत्वं प्राप्तेः सत्वेनापि परत्वाद्बाधे प्रागहः परागतमहः पराह्ण इत्याद्यसिध्ध्यापत्तेरिति दिक्। द्यु
म्नादिषु च। तत्पुरुषातिरिक्तो ह्नशब्दांतः समासः सर्वोऽपि द्युम्नादौ युवादिरपि द्युम्नाद्यंतर्गण एवेति युवादि
सुपाठ इति भाष्येण विरोधस्ततो न पन्नाह। अदंतानुकरणमिति। तत्पदे षष्ठ्याः स्थाने व्यत्ययेन प्रथमा। स

ल०श०शे०ॐ: १७१

वैकविंशत्या दीनि। अत एव तेभ्यः कृत्वसुजादिसिद्धिरन्यथा सांगसमुदाये स्वांगकार्याभाववदिहापि संख्याकार्यं

नस्यादित्याहुः। अयमिति। सां तआदेशो व्याख्यानादित्याह। अयस्यादिति। सुजर्थे इति। संख्याव्ययेति समासः। सु

जर्थे नेति पाठे तदर्थेन त्रिशब्देनेत्यर्थः। व्यवहितत्वाद्यन्संबंधाय सर्वेषामिति। एकादिरश्र इति। अत्रैकशब्दः सं

ख्यावाच्येव प्रसिद्धत्वात्। स्त्रीप्रत्ययेतीति। सहेति योगविभागान्मयूरव्यंसकादित्वाद्वेति तुल्यार्थं। धास्विति। धा

प्रत्ययएव व्याख्यानात्। तेनषड्दधातीति षड्धेत्यत्र न। आतोनुपसर्ग इति कः स्त्रीयांटाप्। धासुवेत्यनेनो

त्वस्यैव विकल्पः। तेन षुत्वं नित्यमेव तेनोत्वाभावेपि षड्ढेत्येवेति कैयटः। उत्वपदो नित्यं ष्टुत्वमिति हरदत्तस्तद

सारेणाह। षड्धेति। अत्र कैयटोक्तं युक्तं भाष्येपि षड्ढेत्येव पाठस्य प्रायेणोपलंभात्। षोडन्निति। बहुव्रीहौ व

यसि दंतस्येति दत्रादेशः। परवल्लिंगं। समाहारे सनपुंसक मित्यस्य बाधकत्वात् द्वंद्वपदमितरेतरयोगवि

षयं तत्राभ्दूतावयवभेदस्य समुदायस्य तद्द्वंद्वार्थतया ऽवयवलिंगेनानियमे प्राप्ते नियमार्थमिदं। तत्पुरुषे

त्वेकदेशिसमासे पूर्वपदार्थप्रधाने परलिंगताप्राप्त्या विध्यर्थं द्वंद्वतत्पुरुषयोरिति षष्ठ्यंतमर्थपरं तेनानुप्र

योगेपि तल्लिंगं। शब्दार्थयोरभेदाध्यवसायेन तथा निर्देशस्तदाह। परपदस्येव समासार्थस्य लिंगमित्यर्थः। द्वि

गुप्राप्तेति। द्विगुग्रहणमेकविभक्तौ तिसृत्रस्थ कैयटानुरोधेन वस्तुतस्तद्व्यर्थं। परवल्लिंगमित्यस्य परपदा

द्विशेषोपस्थित पूर्वपदप्रयुक्तलिंगमात्रबोधकत्वेन तद्धितार्थद्विगावेतदप्राप्तेः समाहारद्विगोर्नपुंसकत्वमेव राम: १७१

प्रायेणेष्यते। अत एव भाष्ये निषेधवार्त्तिके द्विगुग्रहणं नोक्तं। यत्तु अर्धशब्देन पर्यादियोग्लानाद्यर्थे इति

271

हृद्भूतश्चंद्रमाइत्यादौ च्वंतेगौणत्वान्नात्वमितिभाष्ये स्पष्टं। महत्तोमहत्त्वावेति। पुंवद्भावश्चेति चोन्वाचय इति
भावः। समुच्चयेचशब्दः पुंवत्त्वसंनियोगेनैवचात्वमत भाष्येस्त्रियामेवोदाहृतमितिमतांतरं कैयटेस्पष्टं। अष्ट
नःकाहविषि किं। अष्टानांकपालानि अष्टकपालानि। बहुव्रीहावपीति। तत्पुरुषेएवसमासांतत्वलभइतिनिय
तोबहुव्रीहावप्यच्समासांतःसुलभइत्यर्थः। एतेनास्यसाधारणत्वाद्बहुव्रीहावपीतिचिंत्यमित्यपास्तं। योगवि
भागस्यभाष्येऽप्रदर्शनादाह। [illegible] समाहारइति। एवंचगोरतद्धितेतिटजितिभावः। एकादिन
वांतानांद्वंद्वतत्पुरुषयोरर्थे द्वंद्वइतिसूत्रस्थभाष्यध्वनितानभिधानादाह। द्व्यधिकाद्दशेति। द्वाविंशतिरिति।
समाहारद्वंद्वे स्त्रीत्वंलोकात्। इतरेतरयोगस्तुन। तत्सूत्रभाष्ये एवध्वनितानभिधानात् द्व्यधिकाविंशतिरिति
तत्पुरुषोवाद्व्यधिकेत्यत्रसंख्यासंख्येयवाच्यपदार्थः। एकादीनांचत्रिविंशत्ये विंशत्यादीनांचसर्वत्रसंख्यापरत्व
स्यापिसत्वात्। तेनद्वाविंशतिर्गवांद्वाविंशतिर्गावइत्युभयंसिद्धं। तत्रद्वंद्वे संख्येयत्वेनपूर्वपदप्रकृतिस्वरत्वं
तत्पुरुषेसमासांतोदात्तत्वमितिबोध्यं। भाष्येद्व्यधिकाविंशतिद्वाविंशतिरितिसमानाधिकरणसमासे स्वरोन
सिध्यतिसंख्येत्यस्यद्वंद्वविषयत्वादस्तुतर्हि द्वंद्व द्वंद्वइत्यस्यद्वंद्वोपीत्यर्थः। स्वरोनसिध्यतीत्यस्यसोपीष्टःस्व
रोनसिध्यतीत्यर्थइतिकेचित्। परेतु। भाष्येइतरेतरयोगद्वंद्ववत्समानाधिकरणसमासोक्तिरेकदेशिनः
सान्यस्वरासिध्याद्दूषिता। ततोस्तुतर्हिद्वंद्वइतिसिद्धांतयुक्तिस्तस्मादितरेतरयोगद्वंद्ववत्समानाधिकरणत
त्पुरुषस्याप्यनभिधानएवभाष्यस्वरसइदमप्यन्याख्यानोपायमात्रं। वस्तुतःसंख्यांतराणिनिरस्तादयवान्ये

ल०शा०शे० १७२ त्यादि। जातेः प्राधान्येनाख्यायामित्यर्थः। भावप्रत्ययं विना प्राधान्येन जातिबोधे यवादिशब्दानां साधुत्वे इदमे
वसूत्रं मानं तस्याविशेष्यत्वे च व्रीह्याद्यन्वयो व्यक्तिघटितपरंपरया बोध्यः। तत्र जातेरेकत्वेनैकवचनमेव प्रा
प्तीत्यप्रमाप्तेः। एकत्वं चात्र बहुवचनार्थः। एकस्मिन्नर्थे वर्त्तमानः शब्दो बहूनामर्थानां वचनं बोधको
भवतीत्यर्थादप्यीति [gap] देशोयमित्याह। एकोप्यर्थ इत्यादि। बहुत्वे भाष्ये यावद्ब्रूयादेकोपि बहुवद्भवतीति ता
वदेकस्मिन्बहुवचनमितीति। एकत्वेऽर्थे बहुत्वप्रयुक्तकार्यमतिदिश्यते इत्यर्थेनेपिकार्यातिदेश एवेत्यन्यविस्तरः।
एतच्च भाष्ये प्रत्याख्यातं जातौ संख्यान्वये एकवचनस्य व्यक्तौ संख्यान्वये बहुवचनस्य सिद्धत्वात्। एवं च यथोक्त
रं मुनीनां प्रामाण्यात् सूत्रोक्तार्थे प्रयोगाणामसाधुत्वमेव। एतेन यत्र वने एक एवाम्रवृक्षस्तत्र जातिपरत्वे आम्रा
आः सन्तीति प्रयोगसाधुत्वार्थमिदमित्यपास्तम्। सविशेषणानामिति। इदं मुख्यार्थे बहुवचननिषेधाय। यदा त्वस्म
च्छब्दस्य स्वघटिते उभयत्र तावयवभेदे समुदाये लक्षणा तदा बहुवचनं भवत्येव तेन त्वं राजा वयमप्युपास्ति
तगुरुप्रज्ञाभिमानोन्नता इत्यादि सिद्धं गार्ग्योहं ब्रवीमीत्यादावप्ययं निषेध उत्तमपुरुषानुरोधेनात्राहमित्य
स्यैव विशेष्यत्वात्। फल्गुनी। नक्षत्र इति प्रथमाद्विवचनं नक्षत्रे यद्य [gap] भिधीयेते इत्यर्थः। चेन द्वयोरित्यनु
कर्षः। फल्गुन्यौ माणविके इति। फल्गुन्योर्जात इत्यर्थे फल्गुन्यषाढाभ्यां टानाविति टः टित्वान्ङीप्। एकस्या
नुताराया न तयोः प्रयोगः उभयत्र तावयवभेदे समुदाय एव रूढत्वात्। तिष्यपुनर्वस्वोः। नक्षत्र इत्यनुवर्त्तते।
पे१ तिष्यपुनर्वसुशब्दयोरभि धेयैर्नक्षत्रे तत्र वर्त्तमानयोर्यो नक्षत्रवाचकानां द्वन्द्व इत्यर्थः। तेन पर्यायाणा राम: १७२

172

समासइतितन्नतस्यनित्यसमास त्वेनालंकुमार्यै इतिभाष्योक्तविग्रहानुपपत्तेरतआह। अतएवज्ञापका
दिति। अतएवालंशब्दयोगेचतुर्थीविधानंसार्थकं। गतिसमासपदंगतेःसमासोयेनेतिबहुव्रीहिः। कुग
तीतिसूत्रपरंतत्रान्यत्रफलाभावात्प्रादिपरमेवेत्याह। निष्कौशांबिरिति। द्वंद्वेकदेशिनोरितिन्यासेनायंप्रति
षेधोभाष्येप्रत्याख्यातः। अर्धर्चमिति। अतएवपूर्ववदित्विचारितार्थमन्यथानिपातनादेवसिद्धेकिंतेनसमुदा
यस्यपूर्ववल्लिंगत्वेपिउत्तरपदेऽश्ववडवपूर्वापराधरोत्तराणामितिनिर्देशाट्टापोनिवृत्तिः। अश्ववडवा
वितितुसमुदायस्यावंतत्वाभावाच्छीभावाप्राप्त्याकथमासिद्धमतिदेशस्त्वनुप्रयोगेचरितार्थः स्यात् अश्ववडव
शब्दार्थःपूर्ववल्लिंगंलभतइत्यपीत्याशयान्हा। द्वंद्वतत्पुरुषपदमनुवर्तते। द्वंद्वप्राप्तापन्नालंप्रादिसमासेष्वपि। अ
तएवप्राग्रहःसर्वाग्रहःइत्यादिसिद्धिःपुण्यसुदिनाभ्यामितिचरितार्थं अस्यैकदेशिसमासविषयत्वेतुतद्वैयर्थ्यंस
ष्टमेव। द्व्यहइति। अकारांतोत्तरपदत्वाभावान्नस्त्रीलिंगं। गणरात्रमिति। समासाहारद्विगुः। द्वंद्वतत्पुरुषाधिका
रेलिंगानुशासनेपाठात्प्रतिप्रसवविधित्वाच्चबानुरोधात्समाहारद्विगावेवप्रवर्त्तते इतिभावः। तत्पुरुषइत्येवे
तिताद्दृशाद्वंद्वासंभवादितिभावः। अपथमिति। पथोविभाषेतिसमासांतनिषेधःभविष्यतिमर्यादेतिसूत्रस्यस्थिं
प्राद्वात्रःपंचदशरात्रइतिभाष्यप्रयोगोलोकाश्रयत्वाल्लिंगस्यसिद्धः। अर्धर्चाः बहुवचनादाद्यपवित्तत्वतिः।
ननुलिंगप्रकरणंव्यर्थमर्द्धनावमित्याद्यपिलोकाश्रयत्वाल्लिंगस्येत्यस्यावश्यकत्वा दितिचेत्सत्यंजात्या
ख्यायामित्यादिसूत्रसमहत्ववदिप्राप्तेस्तत्रनयन्नकृतानुपयुक्तान्यपितानिव्याचष्टे। जातारव्यायामि

अतएवप
रवदितिसू
त्रेएकदेशि
ग्रहणंकुला
प्राप्तेत्यादि
भाष्येप्रत्या
ख्यातं। अ
त्रैव
तत्पुरुषग्र
हणंकार्य
मितितद्भा
वः ७

ल०शा०शे०पू०

१७३ तच्छब्देन समाहारे द्विगुद्वंद्वौ परामृश्येते व्याख्यानात्। अकारांतेति। अत्र द्विगुः समाहारे वसन
पुंसकमित्यपवादत्वात्। पात्रादीति। स्त्रीत्वं नेत्यर्थः। त्रिस्त्रीला दिप्रयोगदर्शनात्सूत्रेप्राद
स्यात्र पाठ इति कैयटः स्त्रीत्वः बहुसूत्रमिति भाष्य प्रयोगस्तु प्रकरणे न्यपदार्थे बहुव्रीहिणा
साध्यः। पुण्याहादि। रात्राह्नेत्यस्यापवादः। पथः सं। कृतसमासांत इति। पथ इति कृतसमासां
तैकदेशानुकरणं पथ मांतमिति भावः। प्रतिपदोक्तपरिभाषा न प्रवर्त्तते व्याख्यानात्तदाह।
173 अपथं पंथा इति। ऋक्पूरिति समासांतः विषयानगरी अतिपथेत्यादौ च नेदं। अर्द्धनाव
मिति वह्नलोकाश्रयत्वात् लिंगस्य। एतेन कापथ विपथौ व्याख्यातौ। आवश्यकत्वादनेनैव
सिद्धे ऽपथं नपुंसकमिति सूत्रं न कार्यं। सामान्येन पुंसकमिति। अनियतलिंगविष
यं तेनादिं पचतीत्यादौ च। आदिशब्दो निसंपुमान् आद्य पाकानुकूलक्रियेत्यर्थः।
न्यायसिद्धमेतद्विशेष्य विशेषासंनिधाने लिंगसर्व नाम्नो नपुंसकस्य न्याय्यत्वात् लिं
गसर्वनाम नपुंसकमिति दां डिनायनेति सूत्रे भाष्येस्पष्टं। अनेनैव क्रियाविशेषणा राम:
नां नपुंसकत्वे सिद्धे क्रियाविशेषणं क्लीवत्वं द्वितीयात्वं चेति नापूर्वं। धातूपा १७३

मपि सिध्य। पुनर्वसू इति। तिष्य एका तारा पुनर्वसू द्वे तारे छंदसि पुनर्वसो रिति निर्देशात्। तदाह। तिष्यश्च पुनर्वसू चे
ति। विशाखेति। विशाखश्चानुराधाश्चेति द्वंद्वः। माणवाणकाइति। नक्षत्रेण युक्तः कालः लुब्विशेषे इति लुपि जा
तार्थे संधिवेले त्यणि तस्य श्रविष्ठाफाल्गुन्यनुराधादिना लुक्। बहुवचनस्य किं। इदं तिष्यपुनर्वसु॥
समाहार द्वंद्वः। अत एव समाहारद्वंद्वः प्राण्यंगादीनामेवेति द्वंद्वश्चेसादीनां नार्थः। नन्वेव
मप्यत्र जातिरप्राणिनामिति नित्यैकवद्भावे बहुवचनाभावात् सूत्रं व्यर्थमिति वाच्यं। तद्वै कल्पि
कत्वस्यानेन ज्ञापनात्। नन्वेवं तेऽप्राणिनः आपोमयः प्राणा इति श्रुतेरद्भिर्विनाऽग्लायमान
प्राणानामेव प्राणित्वात्स्पष्टं चेदं भाष्ये। नक्षत्रसमासे इति तु नोक्तं यस्ति ष्यस्तौ पुनर्वसू येषां ते
तिष्यपुनर्वसव उन्मुग्धाः अवयवभूतास्तिष्यादयो वर्त्तिपदार्थस्तेषामेव विपर्यास बुद्धि
विषयाणाम् भूतावयवभेदः समुदायः समासार्थः उन्मुग्धा इत्यस्य विपर्यास बुद्धि विषयाइ
त्यर्थः। अस्मदद्वत्यादीन्यपि व्यर्थानि। आचार्याः कथयंतीत्यादौ प्राक्तिगतस्यावयवगतस्य वा
बहुत्वस्यारोपेणेव्चेहापि तदारोपेणैव सिध्देरिति स्पष्टप्रतिपत्त्यर्थमित्यर्थमिति चेल्लिंगानु
शासनमपि तथेति भावः। उच्छिः। खलास्तु कालोपसर्जने इत्यत एकशेषप्रकरणं तं तुल्य पदानुक्रमा
प्रधानप्रत्ययार्थवचने नतुल्यमित्यादितिर्व मिदं सूत्रं कृतेव प्रत्याख्यातमित्याहुः। सत्नपुं।

ल०श०शे० ऽशेषमनिष्ठत्वस्यचापवादः।उपज्ञोपइहसनाशास्त्रेविवक्षैवनियामिकानवस्तुस्थितिरितिसूच्यते।तेन
१७४ तदुपक्रमंसौजन्यव्यवहारइत्यपितत्रपद्यपिविवक्षाद्विविधाप्रयोक्त्रीलौकीचप्रयोक्तृशब्देनव्यवहारार्थ
प्रयोगकर्त्रीरोस्मदादयःलोकशब्देनविदितवेद्याःपरावरज्ञःशिष्टोलोकएतदेवशिष्टत्वंपक्षोदराद्सूत्रे
भाष्योक्तंतथाप्यत्रनाद्याविवक्षितातेषामपभ्रंशप्रयोगेवाहुल्येनप्रवृत्तेस्तस्माद्द्वितीयैव।तेहियत्रार्थेयंशब्दंध
मबुध्याप्रयुंजतेतेषांशास्त्रविनयतेतिःतदस्यतदस्मिन्नस्यादितीतिसूत्रेभाष्येस्पष्टंतेषामेवाभिधानान
भिधानेप्रविवोध्येइहषष्ठीतत्पुरुषंविनातदादिर्वासंप्रत्ययान्नाधिकारफलउपज्ञापतइत्युपज्ञाक
मीपङ्पाणिनेरुपज्ञेतितत्त्वमष्ठ्यासमासः।उपक्रमेकर्मणिघञ्पाणिनिसंवंध्याद्यज्ञानंविषयइत्यर्थः।
छायावा।वाहुल्येसतिपाछायातद्वाचीयःछायातत्पुरुषइत्यर्थः।तत्रकस्यवाहुल्येइत्याकांक्षायामावरक
मनिमित्तत्वाच्छायायास्तद्वाहुल्यइतिगम्यतेतच्चपूर्वपदार्थएवतमेवेत्याशयेनाह।पूर्वपदार्थेति।पूर्वपदा
र्थवाहुल्यस्यषष्ठीतत्पुरुषएवसंभवान्नात्राप्यधिकारफलं।पर्यायस्येति।पर्यायवचनस्येतिवाच्येपर्यायस्येत्यु
क्तिःसभासभा मेतिवत्।एवकारेणस्वरूपस्यविशेषाणांचव्यावृत्तिः।कुड्येति।पर्युदासइत्येतत्पिकाश्रित।
नेहकाष्ठसभा।अत्रापिनाधिकारोपयोगोन्यासंभवात्।सभाशब्दःशालायांसंघातेचतत्राद्यप्रतिषेधादाह।संघा
तेति।अशालेत्यस्याशालार्थइत्यर्थः।अत्रा न्यासंभवान्नाधिकारोपयोगःप्रथमाषष्ठीत्याशयेनाह।ए रामः
तदंतइति।द्वंद्वेसमाहारेतरतरयोगाभ्यांरूपद्वयस्यदुर्वारत्वेनवहुव्रीहौप्रत्युदाहरति।द्वंद्वेनेइति। १७४

॥ ॥ ॥ इति तत्पुरुषः ॥ ॥ ॥ ॥ ॥ ॥

274

त्तभावनां प्रति फलांशस्य कर्मतया तत्समानाधिकरणे क्रियाविशेषणे द्वितीयां तत्त्वस्यापि सिद्धेः
तस्य क्रियाजनकत्वमपि स्वज्ञानद्वारा बोध्यं तद्बुद्ध्या पूर्वमुद्दिश्य क्रियायां प्रवृत्तेः संप्रदाना
देरिव । ज्ञानगतजनकत्वस्य च तद्विषयेऽआरोपः वाचनिकत्वे तु यत्र धात्वर्थस्य करणत्वेना
न्वयस्तत्रापि स्याद्यथा तृप्तिकामः स्तोके नौपचतीत्यादौ । तृप्तिविषयकामनावत्कर्तृकः स्तोकवि(क्लि)
त्तिकरणक ओदनकर्मकः पाक इति बोधस्तद्विषयकामनावत्कर्तृकत्वेन तस्य उद्देश्यत्व मर्थसि
द्धं केषांचित्स्पृहादिषु कर्मत्वव्यवहारस्तूद्देश्यत्वसामान्यात् इति दिक् । तत्पुरुषो नञ् । परव
ल्लिंगमिति यावदधिकारोऽयं । अनञ्कर्मधारय इत्युक्तेर्नञ्तत्पुरुषस्य न कर्मधारयत्वं आरो
पमात्रस्य नञ्द्योत्यत्वेन सामानाधिकरण्याभावात् । पदद्वयोपस्थितयोः सामानाधिकर
ण्यव्यवहारः नञ्समासे हि आरोपितोत्तरपदार्थे आरोपितधर्मकेऽर्थे वोत्तरपदस्य वृत्तिर्नञ्स्तु
द्योतक इति तद्भावः । संज्ञायां कं । अनादिरिह संज्ञा स्याच्चोशीनरेषु तत्पुरुषभिन्नानञ्स
मासकर्मधारयरूपान्वनास्तीति नात्राधिकारप्रयोजनं इदं प्रकरणं परवल्लिंगत्वस्यावि

न चित्राजरद्गुरित्यत्र चित्रापदे पुंवत्त्वं न। कपिंजलाधिकरणन्यायस्यात्र शास्त्रे नाश्रयणाच्चतुरादिपदानामप्यर्थंपदि
तुतद्धितार्थेत्यनेनोत्तरपदे समासविधानाज्ज्ञापकाद्बहूनां समासोपयाभिधानं सिद्धः। चित्रगुरित्यादौ गोशब्दा
दिहोपसर्जनत्वमप्येकविभक्तीति सिद्धं तत्सूत्रे वोपपादितं स्पष्टं चेदं प्रकारान्तरेण भाष्य इत्युच्यते तदासत्त्वार्थ
मनेकग्रहणं स्पष्टमिति तृतीयां तत्तु नेह संबध्यते द्वयोः समासानापत्तेः। प्राप्तमुदकमित्यादि। अत्र यदुक्तं तत्कारकेऽ
क्तं। तत्रान्यपदार्थः समासघटकसर्वपदशक्यः परस्परसमभिव्याहार एव च तत्र तत्तत्युबोधकः। अत एवान्यपदार्थे व
र्तमानमनेकं सुबन्तमिति संगच्छते। नञोऽस्त्यर्थानामिति। नञः परं यदस्त्यर्थवाचिपदं तदन्तस्य पदान्तरेण बहुव्री
हिरस्त्यर्थवाचिनां तु वा लोप इत्यर्थः। एवं प्रादिभ्य इत्यपि व्याख्येयं। उच्चैर्मुख इत्यादावुच्चैरित्यस्याधिकरणश
क्तिप्रधानत्वेपि वृत्तावाधेयप्रधानत्वात्सामानाधिकरण्यमस्तीत्यस्मात् तिङन्तत्वे न सुबिति नानुवृत्तेः समासो न स्या
दत आह। विभक्तीति। विद्यमानत्वीरत्युदाहरणार्थः। निपातनादिति। अन्यथा प्राप्तस्यान्यथोच्चारणं निपातनं
प्रसज्यप्रतिषेधार्थकनञ्समासोपि तत एव। भाषितःपुमान्यस्मिन्नर्थे इति भाषितपुंस्कं प्रवृत्तिनिमित्तस्याधारत्वेवि
वक्षायास्सप्तमी ततस्तदस्यास्तीत्यर्थः। आद्ये च पदार्थज्ञाने नत तद्विशिष्टशब्दस्य प्रवृत्तिस्तत्प्रवृत्तिनिमित्तं। भाषितः
पुमान्येनेति तु नोक्तं कुटीजीविक इत्यादावतिप्रसंगात् कुटशब्दो घटे पुमानो हे स्त्री गर्भिर्भार्याः प्रसूतभार्या इत्य
त्र तु गर्भी व्रीहिः प्रसूतो यामित्यादिप्रयोगात्पुंस्त्व विशिष्टस्यापि बोधनाद्भाषितपुंस्कत्वमस्ति। उभयत्रापि गर्भ
संबंधोपलक्षितत्वं संबंधः प्रवृत्तिनिमित्तमिति समानायामाकृतौ तत्त्वमस्तीति कैयटादयः। अन्ये तु पुंसि गर्भी

द्वितीयाश्रितेत्यादिनेति व्याख्यानात्। शेष इत्यस्य प्रथमांतत्वाच्च प्रथमांतपदोपात्तापेक्षाशेषस्यैव ग्रहणमिति भावः।
अन्यस्येति। अन्यत्वं चोपस्थितसमस्यमानप्रथमांतापेक्षं तच्चान्यस्य यस्मिन्नित्यादित्तदाह। अप्रथमेति। तदंतार्थ
इत्यर्थः। यद्यपि पदेन प्रकृत्यर्थोपसर्जनः क्रियाकारकभावादिसंबंधरूपो विभक्त्यर्थः प्राधान्येनाभिधीयते
प्रकारतानिरूपितत्वाच्च संबंधस्यापि प्राधान्यव्यवहारः। एवं चदेवदत्तादिपदैः सामानाधिकरण्यानुपपत्ति
स्तथापि व्याख्यानाद्विभक्त्यर्थो द्विष्ठसंबंधांतर्भावेणापि शक्तिकल्पनया ऽदोषात्। तत्रैकस्य संबंधिनः समस्य
मानपदेनोक्तत्वेनाद्वितीयसंबंधीयस्येत्यादिप्रकृत्यर्थोऽभूतोऽन्यत इतिस्पष्टं भाष्ये। चित्रागावोयस्येत्यादौ
लौकिकेवाक्ये चित्रागणवां प्राधान्येपि वृत्तौ तदर्थबोधकविग्रहवाक्ये च विशेषणविशेष्यभावव्यत्यासस्ततः शि
ष्टानांतथैवबोधात्तत्र षष्ठीसप्तमीविभक्त्यंतातिरिक्तार्थे कर्तृकर्मवचनसुबंतानामेव समासः मत्वर्थे बहुव्री दद्द
हिः कर्मकर्तृवचनेनाप्रथमायाइतिवार्तिकात्। ततः परोयस्मादिति विग्रहेमत्वर्थएव तत्र पंचम्याः षष्ठ्यर्थवाले
नषष्ठ्यर्थकत्वात्। एवं चन्याइतरेयेष्विइत्यत्रापिमत्वंतस्यैवबहुव्रीहेरप्यस्यार्थांतर्भावेणशक्तिरितिमतुसूत्रे
भाष्येस्पष्टं। ग्राहवतीनदीत्यादेः पदसमुदायसमास्त्वाहीतिवाक्यार्थे वर्तमानस्य बहुव्रीहित्वाद्वयर्थपद
ग्रहणं। अन्येत्यादि किं। वहुपदो बहुव्रीहिः स्वपदार्थेमाभूदिति। द्वयोः समानाधिकरणत्वे स्वपदार्थवृत्तौ तत्पु
व्री॰२ रुषेणवाध्याकिं च बहुषु सावकाशं बहुव्रीहिं स्वपदार्थेपि समानाधिकरणतत्पुरुषोवाधेत सातिलस्मिन्स्वपदा
र्थे सावकाशांतत्पुरुषमन्यपदार्थे बहुव्रीहिर्विधितदोषः अ नेकं किं। बहूनामपि यथा स्यात् ते

ल०शां०शे०१ ष्ट।किंचस्त्रित्वविशिष्टार्थवाचकस्यस्थानेपुंस्त्वविशिष्टार्थवाचकरूपातिदेशेतदर्थविशिष्टस्यनिवृत्त्यार्थस्यापिनिवृत्तिरिति
१७६ नकश्चिद्दोषः ध्वनितंचेदंतृतीयादिष्वितिसूत्रेभाष्ये।समानाधिकरणइति।सामानाधिकरण्यंचैकार्थविशेष्यकप्रतीति
जनकत्वमात्रंनतुभिन्नप्रवृत्तिनिमित्तत्वगर्भमतएवयुगपदाधिकरणवचनतापत्त्रेपदीम्यृद्वा दिस्त्वत्रमुवत्वमाशंक्य
वृत्तौवृत्तेःप्राक्कपत्रसामानाधिकरण्यंतत्रैवतत्प्रवृत्तिःप्रकृतेनचततःप्राक्सामानाधिकरण्यमित्युत्तरितंदंद्वसूत्रे
176 भाष्येनामंत्रितेसमानाधिकरणइतिसूत्रेचभाष्येसामान्यवचनमित्यस्याग्नेदेविसरस्वतीतिपर्यायेषुप्रत्युदाह
रणंदत्तमितिदिक्।चित्रागुरसिति।वृत्तौसंख्याविशेषाभानेपिगोत्वेनात्रानेकव्यक्तिभानाद्भूमरूपमत्वर्थेत्रेवहुव्रीहिरि
176 तिभावः।नेहेति।अतएवात्रसूत्रेपदीम्यद्वौभार्येयस्येतिद्वंद्वगर्भवहुव्रीहौपद्वीम्यदुभार्यइतिभाष्येउदाहृतं।तत्रहियः
पूर्वपदंद्वंद्वोनसभाषितपुंस्कः।अतएवपद्वीशब्दोत्तरङीपोननिवृत्तिःमृद्वीशब्दस्यकेवलस्यभाषितपुंस्कत्वेपिनपू
र्वपदत्वमितितदाक्षेपेनेतत्सिध्येदितिभावः।परेत्वाद्वौपेपिनदोषःधर्मादनिच्सूत्रेकेवलादित्युक्त्यातस्ययोगिक
त्वबोधनात्।तद्धिममध्यपदव्याख्यातृयेसमासास्तिप्तपूर्वपदविशेषणमित्याकरइत्याहुः।चित्राजरद्गुरितीत्यस्यप्रयोग
इतीतिशेषः।भाष्यमित्यस्यसूचयतीतिशेषः।पद्वीम्यदुभार्यइतिभाष्येणेदंध्वनितमितिभावः।जरद्गवीस्यत्रगोरतद्धि
तेतिटच्।चिङीपूततास्त्रित्राशब्देनवहुव्रीहौनघ्नतस्त्रेतिकप्।वामोरुभार्येति।संहितशफेत्यूङ्प्रधानमितिभाव
त्युङंतंनित्यनपुंसकं।अप्पूरणीपूर्वपदप्रकृतिस्वरेणप्रत्ययस्यानुदात्तत्वेसिद्धेपित्वंसुपंचमाइत्यादौनञ्सुभा रामः
मित्यंतोदात्तवाधनार्थंस्त्रीलिंगनिर्देशात्वंचमशब्देनसमासेसुपंचमाइत्यादावप्नतेनतत्रांतोदात्तमेव।रात्रय १७६

श्रीहिरित्यत्रावयवभूतगर्भसंबंधः स्त्रियां लक्षणया वयवभूतगर्भसंबंधस्तथा प्रसूतादिशब्दानामपि स्त्रियां गर्भविमोचनं पुंसि
गर्भाधाननिमित्तसमानाकृतिलाभावत्त्व पुंवच्छब्दवाच्यत्वं तु स्त्रियाः पुंवदित्ययोगविभागरूपो यत्नः कार्यः। अग्रिमेणान्वतस्य
कांचित्कल्पं बोध्यते एतदेवष्ट्वा नयितुं पुंवदितिश्चादीपवित्तं। आतरवभाष्येकर्त्तव्योत्रयत्न इत्युक्ते नहि शब्दस्यप्रवृत्ति
निमित्तं यत्नसाध्यं शब्दार्थसंबंधानित्यता हानेः एवं च प्रवृत्तिनिमित्तविशेषे गर्भिणीशब्दो नित्यस्त्रीलिंग इति गर्भि भे५
ण्यादाराइत्येव स्त्रीदाराद्यर्थे। किं शोध्यं यादृशेः प्रस्तुतं पदैः गुणद्रव्यक्रियाशब्दास्तथा पुंस्त्वस्य भेदका इत्यमरोऽनि
स्येवात्मन इत्यस्यात्मन इत्यस्यानुवृत्तिर्वेत्याकाम्येरोरित्यादेरिवे यद्वापरस्येति सूत्रे चेत परप्रतिद्वंद्वितया त्मशब्दस्य ग्रहणमितितदाशयः। योगविभागादिति। सुप्सुपेतिसमासइ सुचितं। गविपुधि। स्थिरशब्द उणादि किरच्यत्ययांतः सात दाद्योरितिनिषेधेप्राप्तेइदं। अत्र तरंगा नदीतिन्यासन्येनावादितः पूर्वलुक्प्राप्त्याह लदंतादित्यसा त्राप्तेराह। क्वचना देवेति। हृदिस्पृगिति। अलुगिति धेज्ञापकात्कर्मण्यसप्तमीतिभाष्यं। अष्टम्यां मस्तकादित्यनेनतु न सिद्धिस्तत्र संज्ञायामित्यनुवृत्तेः। कारनाम्नि। नामग्रहणंस्पष्टार्थं संज्ञायामित्यनुवृत्त्यैवासिद्धेः। कारनाम्न्येवेति। प्राग्देशनाम्निचे कारनाम्न्येवे तीदंच सनुसारेणभाष्येत्वयंनियमोनोक्तः। अमाहिंतपस्वादेः संज्ञात्वमेनेति कारनाम्नीतिस्पष्टार्थमि तितदाशयः। अविशब्दास्संधा तकटच्चूज रत्णेमेव। नद्यामिति। नद्युत्तारणेतात्कालिको दोहः कारइत्यर्थः। वणिक्पश्चु पालकर्षकेभ्योराजग्राह्योभागः करः स एव कारः हलादावित्यादिग्रहणं सष्टार्थं। तत्र यूथपश्वोदेशेकारा ह लेद्विपदिकादयश्च विकटेरणश्च प्राग्देशो। प्राचामेवेति नियमोपिके यटाद्यनुसारेण। भाष्येतु एवं णनित्ये प्राप्ते कार नाम्नि प्राचामितिविकल्पार्थं तेन मुकुटेकार्षापणं मुकुटकार्षापणमित्याद्युभयं हलादिवितियोगविभागेन निय मार्थं तेनाजादौ लुगेवेति स्थितं। कारनाम्निवा वचनार्थं चेदजादावति प्रसंगः नैषदोषः योगविभागात्सिद्धं। कार नाम्नि च प्राचांततो हलादौ इदमिदानीं किमर्थं नियमार्थं। हलादेवेव कारनाम्नीत्यविकदोरणइतिभाष्यं। वंधेच। उत्तरस्य स्थतत्पुरुषपदमिहापकृष्यते वंध इति घञंतं। अन्यत्र नेत्यिन्त्यद्वे तिनिषेधः स्पष्टं चेदंसर्वं भाष्येवहुलग्रहणेनैवासिद्ध्वा हलदंतादित्यनुवृत्तिर्मध्ये ति ध्वनयन्नाह। क्वचिन्न। कुरुचर इति। अतएव गोचुचरः सिद्धः। विभाषा। वर्षक्षरशरवराः। वर्षलिंगवि शिष्टग्रहणाद्धर्षासुजोपि। घकाल। घशाले तरत। मो। कालेति। सकृत्पग्रहणं। तरः सतुच्युच्युत्वं। मृतो हे तरे इति॥

स्तुशब्द उत्तरपदार्थप्रशंसायां प्राप्ती विषयत्वद्योतक इति फलितं एतच्चैतद्वृत्तिविषयमेव। एवं चाशीर्लिङंत प्रयोगस्य
वास्य साधुत्वमिति वृत्तिः। सप्तमीस्थादि। सप्तम्यर्थे वृत्तेरित्यर्थः। अनुगवमिति। गोदैर्घ्यसदृशं दैर्घ्यं वधानमिति बोधः। द्विस्ता
वा। द्विरावृत्ता तावतीत्यर्थे सुच्। आवृत्तिक्रियाजन्मगणने सुच्। निपातनं फलमाह। यावतीति। यत्र सकलांगोपदेशः साप्रवृत्तिः
आवृत्तिक्रियांतर्भावेण पूर्वपदस्य वृत्तिः। द्विगुणेति तु फलितार्थकथनं प्रत्युदाहरणे द्विस्तावतीति भिन्ने पदे। उपसर्गा इदं
प्राद्युपलक्षणं। किंराज इति। किमत्र प्रश्ने। षष्ठीसमासः कर्मधारयो वा। नञस्त। नञ्पूर्वपदकादित्यर्थः। अपथमिति॥
नस्तद्धित इति टिलोपः। पथः संख्याव्ययादेरिति नपुंसकत्वं। अपथं वर्त्त इति। अर्थाभावे व्ययीभावः ऋक्पूरिति समासांतः।
नञाप्यव्ययीभावं स्वीकुर्वतां मतमिदं॥ ॥ इति साधारणाः समासांताः॥ ॥ उत्तरपदे इति। उत्तरपदशब्दः समास
चरमावयवे रूढः। पदे इत्युक्ते व सिद्धे उत्तरग्रहणात्। अयं च विधिः पंचम्याः स्तोकादिभ्य इत्यारभ्यान्ते दाह। अधिकार इति।
स्तोकान्मुक्त इति। द्विवचनांतादिभिर्न समासो नभिधानात्। समासफलमैकपद्यादि। प्रगीतमंत्रसाध्यं गुणे निघण्टु
णाभिधानं स्तोत्रं। अप्रगीतमंत्रसाध्यं तच्च शस्त्रं सुप्सुपेति समासस्तदाह। शस्त्राणीति। ओजसेति। कर्त्तृकरणे इति स
मासः। पुंसानुज इति। यस्य पुमानग्रजः स पुंसा हेतुनानुज इत्यर्थः। जनुषा जन्मना। पूरणादिति। स्वरितत्वबलात्तदधि
धे ४ कारविहितप्रत्ययग्रहणमत्र। यद्यप्युत्तरपदाधिकारे प्रत्ययग्रहणे न तदंतग्रहणं हृदयस्य हृल्लेखेड्लत्र ज्ञा
पयिष्यते। तस्मान्नीहात्मशब्दात् पूरणे प्रत्ययासंभवेन तदंतग्रहणमित्याह। पूरणप्रत्ययांत इत्युदाह। मनो हेतुवा
स्तकलादेरात्मनेति सुप्सुपेति समासः। [illegible] भाष्यस्वरस्तु आत्मनश्च पूरणे इत्यस्य वार्त्तिकत्वे। एवं
हि भाष्यं आज्ञापितं च। आत्मनश्च पूरणे उपसंख्यानं कर्त्तव्यमिति वैयाकरणाख्यायामित्यन्तु वार्त्तिकं [illegible] कस्य

ल॰ श॰ शे॰ मू॰ दितिभावः। ननु विंवी बदरी ग्रामलक्यादयो भाजितपुंस्का इति न पदांतरस्य त्र भाष्या क्लमतइत्यत आह। कुवलीति। नद्याः शे
१८ ३ भाजितपुंस्कादित्तीह न संबध्यते तदाह। स्त्रीतरेति। उगितः परेति विहिते तिरोषः तेन श्रुमतो पलस्त्री रेश्रुमतीततस्तरे ये
श्रुमतीतरे त्यत्र ह्रस्व इति युवोरनाकावित्यत्र भाष्ये स्पष्ट। पञ्चमीसमासे नाचः परस्मि तिस्थानिवत्त्वेन व्यवधानं तु न। व
हिर्भूततरनिमित्तस्य ह्रस्वस्यस्थानिवत्सूत्र ह फ्यासि फलेन तन्नातद प्रवृत्तेः। निर्मूलमिति। नहिस्वपमप्रवर्त्तमा
२९३ नोपिह्रस्वः पुंवत्त्वं बाधत इति नाप्य मितिभावः। ग्रामिनीतरेति। घिनुणस्सूत्र भाष्यप्रयोगे तु तान्वछी लिकानां रूढिशब्दे
नसंज्ञाशब्दतया संज्ञापूरणयोश्चेति निषेधान्नदोषः। ज्ञापकमिति। उत्तरपदविशेष्य छत्वात दंतावंधिने र्णपः। एवं
च तदंशे उत्तरपदे इत्यस्यासंबंध इति बोध्यं। हृच्छब्दे न सिध्ये हृदयलेख इत्यादि निवृत्त्यर्थमिदं। सौहार्द्यमिति।
४८ ब्राह्मणादित्वात्ष्यञ्। हृद्भगसिंध्वंते इत्युत्तरपदवृद्धिः। प्रपंचार्थमिति। प्रयोगद्वयमेवेवान्यत्र हृदयशब्दप्रयोग ए
वेति व्यवस्थार्थमिति भावः। पादस्य पदा। उत्तरसूत्रे पग्रहणात्सदेस्य दंतां लुप्तविभक्तिकं तदाह। अदंत इति। पादशब्दस्य सं
गशिटामित्याद्युदात्तत्वे प्राप्ते यमंतोदात्तो निपातनात्। पद्या इति। विध्यत धनुषेति यत्। पाद्ये पादार्घाभ्यां चेति य
त्। पादशब्दः शाणपणवाच्येव व्याख्यानात्। इके इति। पर्पादिभ्यः पादः पश्चेत्यनार्थ। पत्काषीति। सुप्यजातौ णिनिः।
पद्भ्यां कर्मणि क्विन्। ऋचः शे। अत्र चतुर्थ्यैशिवा चिपादग्रहणं। उदकस्य। प्रसन्नोदं सरइति ल साध्वेवोदकपर्या
यो शब्दां णी कारे एकहलादावित्यस्यैवेयमपूर्व। समुद्रेत्विति। संज्ञात्वादिति भावः। एकहल। संज्ञायां तु पूर्व विप्रतिषेधेन
नित्यमेव एकशब्दो सहाय वाची सहाय पक्ष तुल्यजातीयो हलेव व्यवच्छिद्यत इति बोध्यं प्रसिद्धेला देकशब्दः संख्यावा राम॰
च्येव सर्वस्यापि शब्दस्यैकहलादित्वात् [illegible] मध्ये ने कं हलमुच्चार्य [illegible] यते तत्रैवेतस्य वृत्तिरिति भाष्ये १८ ३

प्रकर्षाप्रकर्षविवक्षायाञ्च द्व्यप्रकर्षसत्वादाम्न कृतः साधं चिरमिति सूत्रभाष्ये । हृद्युगयोरदंतत्वनिपातनं व्यर्थमलु
कः सिद्धेरित्याशंक्य पदात्सप्तम्यन्या विभक्तिः । ग्रा हृः सोढेत्यस्यार्थं तद्दिद्युते विभाषेत्युक्तिकत्वनुरोधेनेति बोध्यं । विभाषा
वर्षक्षरेति सूत्रे देशातन्नमित्यादावप्यायादिति ए लुकोनेनालुकमाशंक्य समानकालस्यप्रत्ययनिमित्तलुक एवाय
मलुक् । अप्यायादिति बंतरंग इति समाधानं भाष्यादन्नहलदंतादित्यस्यानुवृत्तिः । अतिप्रसंगस्त्वनभिधानान्नेति
बोध्यं । अपो योनिमन्मतुष्विति । अयं पाठो हरदत्तानुसारेणमति । ष्विति युक्तः पाठः । एकवचने त्वस्यातिप्रसंगवाजेनाप्सु
जाप्सुचनादि व द्रस्याभाष्येऽपन्य सातनत्व सुमंतादित्यत्र तस्य प्रसंगोऽस्तिशब्दपरतया तस्यैकवमात्रार्थत्वात् लिंग्व
मतुष्विति पाठे फलं चिंत्यं । अस्यवामीयमित्यादावित्वलुकोप्राप्तेः । चक्रवन्धइति । सप्तम्यंते नानिष्टांतस्य साधनं कथमेति
समासः । स्येच । अयं निषेधो नंतरस्येति न्यायात् तत्पुरुषे कृतीत्यस्यैव । अत एवामूर्धमस्तकादित्यलुकि कंठेस्थः का
लो [illegible] यस्येत्यनेकमिति सूत्रस्थभाष्यप्रयोगः संगच्छते । पश्यतो हरइति । पश्यंतमनादृत्येत्यर्थः । षष्ठी चानादर इति
षष्ठी । देवानामिति । मूर्खाणामित्यर्थः । मूर्खश्च मूर्खत्वं प्रियर एवेत्यत्र कैयटः । निंदायामिति । आक्रोशइत्यनुवृत्त्यालब्धमि
दस्यार्थं चेदमानडूत्र तद्धृत्सूत्रभाष्ये एवं चात्मनस्सामर्थ्यादेव विकल्पो सिद्धे न्यतरस्याम् इतिस्य स्पार्थं । पितुःपुत्रइति । प्र
ख्यातात्पितुरुत्पन्न इत्यर्थः । तत्सूत्रे इति । विद्यायोनिसंबंधवाचकान्यतरस्यां बहुत्तरपदके इत्यर्थस्तेन होतुःपुत्र इत्यादि
सिद्धं । मातुःपितुर्भ्यामिति रेफांतानुकरणं विसर्गादावष्येकदेशविकृतन्यायेन तत्वं ॥ इत्यलुक्समासः ॥ ॥
घतमप । घशब्देन तरतमौ प्रत्ययौ ग्रहीतिलेख ग्रहणेनोत्तरपदाधिकारे क्वचित्प्रत्ययग्रहणे तदंताग्रहणज्ञापना

त्तिरुत्तरपदपरत्वाभावात् जंत्ति पि समासप्रवृत्तिकालएव डाचः प्रवृत्तिरित्याहुः॥ धेनुंभव्येति॥ मयूरव्यंसकादित्वात्समासो तोभ
व्यस्य परनिपातः लोकंपृणतीति॥ विग्रहे कर्मण्युपपदसमासात्प्राह॥ मलेति॥ रात्रेः॥ अत्र प्रकरणे प्रसंगग्रहणे तदंतावि ध्यभावे
पिरात्रेः कृतोसंभवात्कृदंत इत्यर्थः॥ निसमेवेत्यस्यर्थं चेदमत्रभाष्ये॥ रात्रिंमन्यइति॥ आत्मनेइति खश् श्यन् सहस्य सादेशो
निपातनादुदात्तइतिभाष्यं॥ सह सुध्येति॥ सहे चेति क्विनिस्सुपपदसमासः॥ समुहूर्त्तमित्यत्र वचनेव्ययीभावः॥ मुहूर्त्तादि
शब्दानां कालवाचिनामेव तत्प्रतिपादके ग्रंथे कालत्वारोपेण प्रवृत्तेरव्ययीभावे चेत्यनेन नसो कालइति निषेधात्॥ ज्यो
तिषमिति॥ ज्योतिषइदमित्यर्थः॥ द्वितीये चानु॥ उपाख्यं प्रत्यक्षेतरत्विन्नेनुमेये सहायवाचिनि उत्तरपदे इत्यर्थः॥ अप्रधाने
सहायेद्वितीयशब्दइति हरदत्तः॥ सराक्षसीकेति॥ बहुव्रीहिर्नद्युतश्चेति कप्॥ योगविभज्यतेइति छांदसमपीदमेतदर्थ
मेवा त्रोपन्यस्तम्॥ विभक्तेचोपसर्जनस्येत्यतो वेत्यनुवृत्त्या व्यवस्थितविभाषाश्रयणेन समानजातीयाद्यपीत्या
हुः॥ योगविभागस्य भाष्यानुक्तत्वादाह॥ अप्यवेति॥ सदृशवचनइति॥ अयं कृत्तिविषयएवतदा ह॥ तेनायम स्यप
देइति॥ तेन सह शब्देन समासेऽयं वक्ष्यमाणइत्यर्थः॥ वोपसर्जनस्येति सादेशः॥ अतएव विभाषोदरइति चरितार्थ॥ अ
न्यथा कर्मधारये सोदरसमानोदराभ्यां सपक्षादिवद्योगविभागेन सिद्धाभ्यां यत्तो रूपद्वयसिद्धौ तद्वैयर्थ्यंस्यष्टमेव॥
सदृशार्थकसहशब्दस्य तु तत्र सादेशो दुर्लभोत्र पक्षे समानशब्दे न समासे समानजातीयाद्येवेत्याहुः॥ ब्रह्मचारीति॥ व्र
तइति सुप्यजातौ णिनिः॥ समानः सइति तस्य समानत्वे वेदस्य व्रतस्य वा समानत्वात् तस्य तत्वं चाध्येतृभेदाद्वे
दभेदं व्रतभेदं वापरिकल्प्यबोध्यं तेन समानवेदाध्ययननिमित्तव्रह्मचारीत्यर्थः॥ समानं ब्रह्म वेदाध्ययनार्थव्रतं

राम
१९४

सर्षं।अ्रसहायवाचीतुअ्राकिनिजमत्रविषयइतितद्भावः।दर्शयितवंपूरणं हि।अत्रलीभावइति।ऊर्यादिच्वीतिनिपातत्वे
ययल्वं।ठवङःभाविलान्निषेधेप्राप्तेअ्राह।अभुइति।एकात।एकशब्दांतस्यहृस्वइत्यर्थे पुंनपुंसकयोर्विशेषाभावादा
ह।एकस्याइति।रेवतिपुत्रइतिसंज्ञा।छंदस्याहाजदीर्घमिति।अजक्षीरेणजुहोतीतिप्रयोगः।लेच।संज्ञाया।अ्रसंभवाकुं
दस्येवेदं।अ्रनुत्तरपदार्थंवचनं।ष्यङःसं।अनुबंधद्वेयोऽच्चारणंपाशादिभ्योयस्यष्यञोञ्ङे दितिष्यङः।अ्रव्याक्तस्यं
संप्रसारणस्य।दुलोपइसतोदीर्घइत्यनुवर्त्ततेउत्तरपदइत्यधिकारः।हलइत्यनेनतुनात्रदीर्घःसंप्रसारणात्पूर्वस्यहलःसं
प्रसारणंनिमित्तंनिरूपितंनाथपवलाभावात्प्रलासलात्ताहृग्रंशिवयस्येवतत्रग्रहणात्।अतएवनिरुत्तमिलादौनसःकुमुद
गंधेरपत्यंस्त्रीत्यर्थेणिञ्ञ्योरिति ष्यङि।यङआप्रपूर्वांतत्वेनष्यङंतत्वात्संप्रसारणेपूर्वत्वेचाप्यथावपिदीर्घविधिसा
मर्थ्यात्स्यानिवत्वेनसंप्रसारणत्वाद्दीर्घः।हृस्वोनेति।इकोहृस्वइत्यनेनप्राप्तः।परेतु।आमाणिकुलमित्यत्रेकइतिहृस्वस्यावका
तिप ७ शःहृस्वस्यवैकल्पेनाभावेकारीषगंधीपुत्रइत्यादौसंप्रसारणेसोतिसावकाशाहृस्वप्रसंगेउभयप्राप्तौपरत्वात्संप्रसारणदीर्घ
त्वमेवेति।अ्रत्रैवभा ष्यस्यकमिताहुः।अतिकारीषेति।अत्रा दायइतिसमासेषष्ठीतत्पुरुषेष्यङंतंनपूर्वपदमितिभावः।
मातजादेशइति।सच्चकबभावपक्षेएव।ननुनच्छातइतिनित्यकपःप्राप्त्यातदभावपक्षोदुर्लभोतआह।कपश्चविकल्पश्रेति।
अ्रयंमातजादेशोसंबुद्धावपिकारीषगंधीमातइतिभाष्योदाहरणात्।बहुव्रीहावेति।तत्रैवभाष्येउदाहरणात्।च्चिलेति।
मातच्चइतिशेषः।इष्टकेषी।असंज्ञाछंदोर्थंवचनं।उत्तरपदादिहितंपूर्वपदविशेषणीकसततदंतविधिरित्याह।तदंतान
कन्तोतुडाजेव।तत्रोपपमितिस्त्रत्रेपचमंततोपपदेसारभवतिनवेति विच्चारेसाधम्रा

ल०शा०को०ष्टु

विग्रहणं ज्ञापयति । तद्धदपि अह्निशब्देन वहुव्रीहिर्वेति । काप्येति । कुगतीतिसमासः । ऋक्पूरिति । पथः संख्येति
१२ ५ नपुंसकत्वं । अनीषदर्थमिदं । एवं विप्रतिषेधादिति भाष्योक्तक्रम चिन्त्य त्ति भाष्यमाण्पादाहृतं । पृषोदरा । आदिश
ब्दः प्रकारे यथोपदिष्टमित्युक्तः । उपदिष्टमिति कर्मणि क्तः । उपदेश उच्चारणं तत्सकर्तृकोद्धायां शिष्टेरित्यध्या
हारलभ्यं शिष्टाः अग्रशब्दतत्ससाधुत्वारवन्तो योगिन इति भाष्ये स्पष्टं । उत्तरपदाधिकारात्समासविषयमिदं ।
हंस सिंहयोर्दृष्टतारार्थमुपादानं पश्यात योरणादित्वात्साधुत्वं तथा गूढोत्मादेः पृषोदरादित्वमर्थं इत्येको परे
295 तु इदं तद्धितविषयमपि । पुमणशब्दे तलोप इति सर्वादिस्त्रैके यटारा एवं च हंसादेऋणधत्तत्वेन शास्त्रां
तरोक्तस्याविग्रहनेनसाधु त्वं सर्पिषेत्यादौ षत्वमप्यनेनैवेत्याहुः । इडाशादौ रेफस्योत्वे सवर्णदीर्घः धश
ब्देन प्रत्यपातग्रहणं आगंतुना कारेण धीशब्दस्य च ग्रहणं तेन सर्वस्य दुर्बुद्धेरेह इति रूपद्वयोनोस्मान्माव
धीदित्यर्थं कं मानः समस्तदुन्य इति सिद्धं दुष्टं ध्यायतीति विग्रहे कारकपूर्वपदत्वाद्घत्वार । श्रुतीकप्रत्ययां घ्वे
तं । ङस्य्यानिकं तु नस्वरिता संगतेरिति दिक् । संहितायां । एतत्फलं ह्यचास्ति ङ । तस्यातो दीर्घः स्यादित्यर्थे
धा०११ नह्यचो तस्ति ङीस नेन विद्धा हिलागोपतिं शूरगोनामित्यत्र संहितायामिव विद्धा हिलेति पदकालेन
दीर्घः एतदधिकारस्थान्यशास्त्राणां तूत्तरपदाधिकारात्समास एव प्रवृत्तिस्तात्र च संहितायां नित्यत्वान्न
तेष्वस्याधिकारस्य फलमिति बोध्यं । कर्णे लक्षणस्य । यत्स्यपूर्वनां स्वामि विशेषसंबंधनार्थं दात्रकाराचिन्हं क्रि
यते तद्धि लक्षणं तेन लंबकर्णसिद्धिः । अष्टकर्णा इत्यादेर ह संख्यालिपिचिन्हकर्णा इत्यादेरर्थः तत्र लव रे रामः
१२ ५

चरती सवर्णभाव्या लभ्यते । तीर्थ्ये । अकारोऽत्र विवक्षितः । पश्चाद्वे विवक्षित इत्यर्थः । निरनुबंधकपरिभाषा तु नात्र
तीर्थ्येति । निरनुबंधकस्यासंभवात्सच प्रत्यय एव संभवतीति ध्वनयन्नाह । यादावितीति । समानतीर्थे इति । सादे
शस्यैकदेशविकृतन्यायेन समानतीर्थशब्दत्वं । एवं च सति शिक्षाद्यत्स्वर एवोदाहरणे एतदर्थमेव विवक्षित
इति व्याख्यातं । विभाषोदरे । अत्र यदि इति वर्तते विवक्षितसप्तमीत्वादन्यादेः सति शिष्यते यासप्रत्यय स्वर एवान्यथा सा
देशस्वरः स्यात् । तत्र सादेशपक्षे सोदराच्छः समानोदरे शयित इत्यर्थे प्रथमेऽच्चारितो यो भवति स च सोदर्य इत्यर्द
तितदर्थः । सादेशाभावे तु समानोदरे शयित इ [illegible] तियत् । सोदरोपीति
प्रयोगस्तु समानमुदरं यस्येत्यर्थे । अयं चैतत्सत्युक्तरीत्यास्य पक्षाद्वत्समभावो बोध्यः । बोपसर्जनस्येति विकल्पात्सय
नभ्राता सहोदर इत्यपि सिद्धं । दृग्दृग्देति । सदृक्सदृतिभाव्योदाहरणं दृक्सदृशादृत्यतापि संदर्भस्थ ध्ययमिहोप
न्यासः त्यदादिषु दृशोऽनालोचने कञ्च समाना । न्योऽन्यदृशेश्चेति कञ्क्विन्नक्सा । दीर्घ इति । अंतस्यालेक्तेस
वर्णदीर्घ इत्यर्थः । इदं पूर्वपरान्वयि । अमूर्द्धगिति । अः से रितिव्याख्याने ऽप्येवमेव अकारेण कारस्यापि ग्रहणेन ।
समासेंगु । अंगुलेः संज्ञः भीरोः स्थानं ज्योतिषः स्तोमः आयुषः स्तोमः इत्याद्यर्थे प्रत्यासत्यात्तयोः पदयोः समासे
सस्य ष इत्यर्थस्तद्ध्वनयन्नुदाहरति । ज्योतिषः स्तोम इति एवं हि संज्ञ इत्यादि प्रथमानिर्देशः । अग्रे ज्ञसोभव
ति । अपे । सुषामादिराकृतिगण इत्यर्थः । तेनैतत्पोषेण स्वलक्षितिरसूचितम् । अमयतस्तीर्थे ति । न
न्द योपादानं सख्यार्थम् । कूष्क्षेति बहुव्रीहिः इदमेव तत्पुरुषग्रहणं मसमग्रे प्रकरणे प्रतिपदोक्तसमासस्या

ल॰शा॰शे॰पृ॰ सूत्रेऽभूतकलोविवक्षितस्तेनबाह्यंपदानारोपितंसंनिहितमात्रंतदापिभवतीतिभावः।तदुक्तंभाष्ये।आहितोपस्थि
१९ ६ तयोरितिवक्तव्यमिति।अश्ववावाहनंवाह्याद्विवक्षितंपदाहिताग्न्यग्निंवहनमपविष्टेतिष्ठतितदाहमाभूत्तद्गवा
हनमिति।पदग्रगर्गीवाह्यत्वेनविवक्षितोनाभवतितदाएतत्संभवत्येवेतिकैयटः।कर्मण्यल्युडिति।बाहुलकादितिभा
वः।देशेकिंदाक्षीणांपानंदाक्षिपानंदेशइत्यस्यदेशवासिष्वित्यर्थः।क्षीरपानमिति।नपुंसकेभावेकरणेवाल्युट्।सर्पिष्पा धा॰४
नमित्यादौतुन।बासदातादितिनिषेधात्।तस्यहिपदेपरतोऽन्तोयः षकारस्ततःपरस्यनस्यणत्वेनेत्यर्थः।अंतग्रहण
296 सामर्थ्यात्सुसर्पिष्केणेत्यादौणत्वंभवत्येवेत्यर्थः।आनुमित्यादौसुवुलसनंतरमेवसमासः।अतएवनिष्पानमि
तितदुदाहरणंभाष्येसंगच्छते।पदपदंपदत्वयोग्यपरंवा।व्रीहिवापाणीति।कर्मण्यणघञंतेनबहुव्रीहिवीजसः
शिरजंतत्वान्नुम्।अतएवेति।पूर्वपदाक्षिप्तेनोत्तरपदेनप्रातिपदिकस्यविशेषणाद्देवेत्यर्थः।उत्तरपदशब्दस्यसमा
सचरमावयवेरूढत्वान्माषवापिणेविषादाबुत्तरस्यपदत्वेनेतिनशंक्यं।ज्ञापकंशिथिलमित्याह।किंचेति।पूर्वप
दाक्षिप्तसमासप्रातिपदिकांतस्येतिव्याख्यायनुमग्रहणंभाष्येनप्रत्याख्यातमितितत्रणत्वस्येष्टत्वानुमानादितिभावः।
भाष्येसमासरूपप्रातिपदिकांतस्येत्यर्थकरणादंगस्यादितद्दुपपादन ग्रंथोपिचिंत्यएवेतिपरे।णत्वार्थमपीति
णत्वार्थमेवेत्यर्थः।प्रेन्वनमित्यादौत्विति।प्रत्ययसंबंधिनस्येवधातुमध्यवर्तिनुमोपिनस्येत्यर्थः।एवंसमुदायाए
वतत्रपाठ्यादितिद्वयोरपिनयोर्णत्वाभावसिद्धिरितिनुम्व्यवायेनुस्वाराभावेणत्वप्रतिषेधोवक्तव्यइतिनकार्यमि
तिभावः।युवादेनेति।समस्ताःशब्दाःयुवादिषुअसमस्ताःदृष्ट्यादिष्वितिभावः।अतएवबहुवादेनेतिप्राति रामः
१९६

रवा१ र्वाञ्चिन्ह कर्णं इति वा। मर्मा विदिति। वध्येर्ग्रहि ज्येति संप्रसारणं। साच्चव्यवस्थितेति। एतच्च प्रचुरलक्ष्यदर्शिना दास्थितं।
केचित्तु यथोपदिष्टमित्यनुवृत्त्या न्यत्र तं वारयंति। एभ्य एवेति। कृतदीर्घेभ्य इत्यर्थः। कृतदीर्घाणामिति व्याख्यानात्।
अत एव विपरीतनियमो न। अन्यो त्तरपदणत्वादीर्घोति त्वासंभवाच्च। नियमार्थ इति। पूर्वपदात्संज्ञायामित्येव सि
द्धेः दीर्घस्य संज्ञायामेव विधानाद्स्य णत्वस्य संज्ञायां प्रवृत्तेः। विध्यर्थ इति। अग्रे वणं द्वशस्या संज्ञात्वादिति भावः।
पुरगावणमित्यत्रागइति प्रतिषेधस्तु न। अणकारांत पूर्वपदादित्यर्थात्। असिपत्रवनमिति। नरकविशेषस्य संज्ञा।
वल प्रत्यय इति। यथोपदिष्टमित्यनुवृत्तेरिति भावः। तेनाजंते वलधातौ न। अण इत्येव नेह भ्रातृवलः रजः कृषीवल
त्रान्येभ्योपि दृश्यते इत्युक्ते वलच् प्रत्ययः। उदाहरणे रजः कृषीति वलच् संज्ञायामेवेदं। तेन पुत्रवल इत्यादौ न। प्रत्यय
निमित्तलोपेपि संदर्भस्थ दृष्टे एषामुपन्यासः। धातादिना कृतिगणः। इको वहेः। पचाद्यच्। उपसर्गात् घञोसंभवेन
तदंतविधिरित्याह। घञंत इति। इकः काश इति। पचाद्यजंतार्थं। अन्येषामपीति सूत्रस्याभियुक्तोक्ते प्रपंचमाह।
श्नुनोदंतेति। तत्प्रपंचत्वादेव श्वपुच्छमित्याद्यपि। यथा दृश्यते तथास्याधितितदर्थात्। अत्रा च वराह अत्र श्वावराहं।
येषां च विरोध इत्येकवत्। अनित्तः संज्ञायां वनं पुरगेति नियमाद् प्राप्ते संज्ञायां पूर्वपदात्संज्ञायामित्युक्त्या अ
त्र वचनं शरादीनामोषधिवनस्पत्यर्थत्वादुत्तरेण विकल्पे प्राप्ते वचनं। असंज्ञायामपीति। असेतत्तः संज्ञाया
मिति नानुवर्त्तत इति तात्पर्यं। द्विमात्रो। औषध्यः फलपाकांताः। वनस्पतिरत्र वृक्षमात्रं व्याख्यानात्। ध्वनि
तं चेदं लुपियुक्तवद्व्यक्तिरिति सूत्रे भाष्ये। आरोप्योति। अनेन बाहुल्यात् चेतनत्वं प्रत्ययं बोधितं। उद्यत इति।

ल॰आ॰शे॰कृ॰ सेनादेशात्। यत्तु कुमतिश्चेत्यत्र भाष्ये माषकुंभवापेनेत्यत्र षष्ठीतत्पुरुषोत्तरपदकषष्ठीतत्पुरुषे कुमतिश्चेति निय

१९७ ण त्वेन भवितव्यं षष्ठीतत्पुरुषपूर्वपदकषष्ठीतत्पुरुषे प्रातिपदिकान्तेति विभाषेत्युक्तं तत्प्राप्तिनिरूपणं बोध्यं। य

त्तु तद्भाष्यादयं निषेध उपसर्गादसमासेपीत्यादेस्तेन प्रावनद्धमित्याद्युदाहरणमिति तन्न। पदव्यवायेपीति त

च्छेषः। तस्मात्तद्धितइति वार्त्तिकस्यार्द्रगोमयेणेत्यादिभाष्योक्तोदाहरणसंगत्यापत्तेः। अतद्धितइति व्यवधा

यकस्य पदस्य णत्वाप्राप्तिरिक्ततद्धितभिन्नपरत्वे निषेधसूत्रार्थः। उदाहरणे गोमद्वत्पदं। सूत्रे नपुंसकनिर्दे

शात्कुत्तुवरत्यित्युक्तमत आह। प्रातरमिति। बहुत्वं चैवमिति बोध्यं। गोष्पदे। असेवितसामर्थ्यान्न पूर्वकमुदाह

रणं गोष्पदानीति। असेवित इति बहुव्रीहिस्तेन गवां संचारो यत्र न नैव कदाचित्तत्रैव नञ्पूर्वे सुडिति भाष्ये स्पष्टं। गो

ष्पदं क्षेत्रमिति क्षेत्रस्याल्पप्रमाणत्वमनेन बोध्यते तेन गोष्पदात् क्षेत्रस्याधिकत्वेपि न क्षतिः। आत्मपापनं शरी

रस्य दारणमित्यर्थः। तत्फलकस्थानलाभ प्रतिष्ठा प्रकृते लाभविषयस्थानं तथा यथास्पदमनेन लब्धं शरीरदारण

यस्थानलब्धमित्यर्थः। अद्भुत इति। अनित्यत्वेन कादाचित्कतयाद्भुतत्वं लक्ष्यते इति भावः। विकरग्रहणमिति। विष्कि

रः शकुनो वि किरो वेति तन्मते सूत्रपाठः। तस्यापि विकिरशब्दस्यापि भाष्योक्तत्वात्तत्र हि शकुनौ विकिरो वेति वाच्यं विष्कि

रः शकुनौ वेत्युच्यमाने शकुनौ तत्तुल्यजातीये चान्यत्रापि नित्यमेव विष्किरः स्यात्। सिद्धशब्दस्य विकल्पायोगा

च्छकुनौ वान्यत्र वेत्यधिकरणविक ल्पस्यैव प्रतीतेरित्युक्तं न तत्र न वा वचनेन शकु निरूपमधिकरणं सं रामः

बध्यते किंतु निपातनं विष्किर इत्येतच्छकुनौ वा निपात्यते इत्युक्ते यथं चान्यत्र विकिर स्येष्टत्वं सम्यगेव लभ १९७

पदिकांतेतिसूत्रे भाष्ये पठितं। उभावप्याकृतिगणौ। ब्रह्महणं विति। ब्रह्म हतवानित्यर्थे ब्रह्मभ्रूणेति क्विप्। ब्रह्महणी
त्यप्युदाहरणं। हरिमाणीति। मानयतेः क्विपि समासे ङीप्। हरीरपेणेति। विवृतेः कर्मण्युपपदे आतोनुपसर्गे इति कः।
आतो लोपः। रम्ण विरोणेति। रम्या आसौ विश्रेति विग्रहे आङो ना। नन्वंतर्वर्ति विभक्त्या विशब्दस्य पदत्वात्तद्व
यवायेपीति निषेधः स्यादिति चेन्न। अतद्धितवृत्तिके कवाकृत्याणत्वाश्रयातिरिक्ततद्धितभिन्ने परतः पदेन
व्यवायेनेत्यर्थेनादोषात्। व्यवधायकपदस्य णत्वाश्रयातिरिक्ततद्धितभिन्नपरत्वेनेति यावत्। तत्र व्याख्याने
तु पदव्यवाये इति सप्तमीसमास इत्यदोषः। अत एव प्रत्याख्यानारंभयोः समफलता। कुमतिं चेति। क्वादावित्य
पीभियाकावितिनोक्तं। अनेकाजुत्तरपदार्थमिदं। अत्र कवर्गवदुत्तरपदादिषु समासस्य विभक्त्यादिष्वप्रक
तेश्च प्रश्लासस्यैकत्वाश्रयणेपि विभगवीणामित्यादौ णत्वं भवत्येव लिंगविशिष्टपरिभाषया विभक्तिप्रकृतौ समासत्वा
सत्वरहितयावस्तुत्वेवकप्रमादात्। पदेनेति। निमित्तनिमित्तिनोर्मध्ये पदेन व्यवधाने इत्यर्थः। पदेनेति किं। चतुर्व
हं १ क्रेणावहुजयंप्रत्ययः। माषकुंभवापेनेति। नच माषकुंभस्य वापश्चत्वार्यञानि यस्य तेन योग इति विग्रहे उत्तर
पदत्वे चेति निषेधात् कुंभयोः पदत्वं दुर्लभमिति वाच्यं। प्रत्यासत्त्योत्तरपदस्य कार्यित्व एव तत्प्रवृत्तेः अपदादि
विधाविति पर्युदासेन पदांतविधावेव तत्प्रवृत्तेश्च। नन्वेवमपि माषकुंभस्येत्यादेर्वापादिनिरूपितकारकत्वा
द्गतिकारकोपपदानामित्यनेन वापादिभिः सुबुत्पत्तेः प्राक्समासे तेषां पदत्वं दुर्लभमिति सप्तमीसमासेन
व्याख्यानेन णत्वनिषेधासिद्धिरिति वाच्यं। तस्यानित्यत्वेनात्र सुबुत्पत्त्यनंतरमेव समा

ल०श०श्री०हः
१९८

198

रामः
१९८

तेह्रस्पते-चुविकिर वैश्वदेविकमितिप्रयोगइतिदिक्।धातोरित्युपथन्नाप्रीकिरइतिकेनेनसुट्परिनिविभ्यइतिषत्वं।
कशेरेवक्रुशोतिकशधातोरेवकशाशब्दइत्यर्थः।इहचयमेःअतिरूपसर्गेनकशेरितिभावः।अमंत्रार्थमिति।मंत्रेतु
हस्वान्चइत्युत्तरपदेमंत्रइत्येवसिद्धमितिभावः।हरिश्चन्द्रोराजर्षिःसुडितिवैरणेइत्यस्यैतिपरिव्राजकेचात्सुडपि।
इदंवृत्त्यनुसारेण।अपनाकारोदयनाकरोदतोमाकृतकर्मा।निष्कामकाम्यकर्महानिद्वारासकलकर्मपरि
हानिर्युष्माकंश्रेयसीत्युपदेष्टा।मस्करीपरिव्राजकः।माङ्युपपदात्कृञइनिर्माङोह्रस्वःसुट्चनिपात्यतइतिभाष्य
कैयटयोःइदमेवयुक्तंवृत्तिमतेमस्करशब्दादिनौयोगरूढ्यापरिव्राजकबोधेसिद्धेमस्करिपरिव्राजकयोः
ग्रहणंवैयर्थ्यापत्तिरितिबोध्यं।कातीरइति दपेचेतिकोःकादेशःकारस्करेद्विधाविभेतिठः।केचिदिति।अत्रा
रुचिवीजंतुपारस्करादिषुपठ्यन्तातोदर्शनंप्रकरणेहिसर्वस्थानेएवंतेनसत्वविधानंचेति।नस्करन्नेष्विति। धा०८
नगणस्करन्नेषुइत्यर्थः।एवंचपारस्करादौतगणस्करन्नमिदमितिबोध्यं।पारंकरोतीतिकृञोहेत्विितिटःपारस्क
रोदेशोनगरंच।तस्करोरिति।प्रायस्येतिचगणसूत्रे।कारपरेऽस्तुसुडिति।अतोनरुत्वं।तद्बृहतोःसेत्यादेशेतु
तत्दुबीरं।बृहस्पतिरिति।बृहत्याःपतिरिति।कुकुस्त्र्यादीनामण्डादिष्वितिपुंवत्त्वमवैवबृहतीतस्याएवपतिरिति
दर्शनात तत्प्रत्याख्यानेतुबृहतोवाक्पतिःबृहस्पतिरितिविग्रहोबोध्यः।प्रायस्येति।निर्देशादकारान्तःपुंलिं
गस्तपोवाचीप्रायशब्दः।प्रायोनामतपःप्रोक्तंचित्तंनिश्चयउच्यते इतिस्मृतेः।प्रायःपापमितिस्मृतरालाप
वाच्यपीतिसर्वेषुसिद्धिः॥ ॥इतिसमासाश्रयविधयः॥ ॥ ॥ ॥

ल॰शा॰शे॰

पृ॰ १९९ भावात्तदंतविधिः। अभिव्यक्तपदार्थायइति न्यायेनसंज्ञाभूतस्यग्रहणंन। अपत्यार्थस्यापिस्यान्नोकारानुबन्धस्यलुगोपेनसाधा
रणप्रत्ययेऽलुकथनं। इति साधारणाः प्रत्ययाः। स्त्रीपुंसाभ्यां। ननु प्रकृतान्त्रसंनियोगे नाकारसहितनञ्गागमोस्त्वकारसाहित्य
त्वनस्तद्धितइति टिलोपेन। एवं चा अंतत्वादेवङीपि सिद्धे नञ्स्नञ्ग्रहणं म्। नचगो
त्रस्त्रीविवक्षायांजातेरितिङीषि ष्टोन्यदोतुततः परत्वाच्छा ङीं बाधत्वइतिङीनप्रसंगइतिवाच्यं यञञोश्च संघांकेष्वित्यत्रेव
जातिलक्षणेपित्राद्यपत्यस्यैवगोत्रस्यग्रहणेनङीषएवतत्रापीष्टत्वात् यत्नन्यत्रापिजातिकार्यमिष्यते तत्रतदारोपेणसाध्यं। अ
चे७ तएवस्त्रैणइत्यत्रयञञोश्चेतिलुक्नस्त्रैणनांसंघइत्यर्थे संघांकेत्यण्वचनतान्हि स्त्रीविवक्षायामेतत्प्रकृतिकप्रयोगान
भिधानाच्चेदिन्न। विवक्षितांत्साकारविशिष्टागमस्याप्रसिद्धेः। नञ्स्नञ्भृतुनक्रतः पौंस्नेसयोगांतलोपापत्तेः। न चास्त्रियानञ्
भवनात्सुंसोभ-वेतिकार्यं। लाघवाभावात्। आकडारस्थत्वाभावेनान्नयापदत्ववाधस्यन्यायेनाप्राप्तेश्चेसत्। द्विगोरिति। हे
१९९ तुहेतुमद्भावेषष्ठीत्याह। द्विगोर्निमित्तमिति। नन्वेवं पंचकपालीतिसमाहारद्विगोः संस्कृतमित्यर्थे पांचकपालमित्यादि
सिद्धान्यं। अनभिधानात्ततः प्रत्ययानुत्पत्तेः। गोत्रे लु। अन्यस्यासंभवात्तद्राजस्यबहुष्वितिप्रकरणविहितलुकोयमलुकसं
भवश्चातत्रतवक्ष्यते। अतएवजनपदशब्दादित्सूत्रेतद्राजलुकोप्ययमलुगुक्तोभाष्येविवक्षितइति। तेनगर्गाणांछा
त्रइत्यर्थे विवक्षायां लानिमित्तप्रत्ययसिद्धिः। अतएवभाष्ये लुकः पूर्वमंतरंगत्वात्लुकमाशंक्ययद्ययंभूम्निप्राप्तस्यलु
कोजावेतद्धितेलुकंशास्तितज्ज्ञापयतिसमानकालावलुग्लुकाविति विषयसप्तमीतितद्भावः गोत्रंचात्रपारिभाषिकमेवयू
निलुगितिसूत्रेस्थयुवसाहचर्यात्। एण्यद्वाञ्रियोतिविहितस्यतुनायमलुक्। यूनोगोत्रत्वाभावात्स्वाण्डीमतीतिविषयत्वा राम:
भाष्ये द्वितीयेनेदमकारि। आपत्यस्य च तिष्येसतोपदूत्यनुवर्तते। हलस्तद्धितस्येत्यतोहलइतिचतदाह। हलइत्या
दि। आभीयत्वाद्यस्येतिलोपासिद्धत्वंनात्रासमर्थ्यात्। आपत्यस्येति किं सांकाश्यकः संकाशादिभ्योभवार्थे एयस्ततोयो १९९

समर्थसंभवे
एवास्यसंबं
धःशेषइस
त्रापितत्तस
मर्थविभक्त्य
तनिर्दिष्टेन
र्थएवशेष
इत्यनेक॥

अवसरसंगत्यात्तद्धितप्रकरणमारभते।समर्थानां।पदत्रयमिति।तेनप्रत्येकंपदानांस्वरितत्वाद्देतस्यप्राग्दिशइत्युत्तरमपिसंबंधः।
अन्यथिप्रदर्शनंतुविशिष्टस्येतिबोध्यं।तद्धितनामेकार्थीभावएवप्रवृत्तिःसमर्थःपदविधिरित्युक्तेरित्युक्तेसमर्थानामितिसमर्थश
ब्दःशक्तपर्यायःशक्तत्वंसर्वप्रतिपादकत्वं तच्चपरिनिष्ठितस्यैवतदाह।कृतसंधीति।नहिसुउत्थितइत्यस्य क त्पनयाप्यर्थवत्त्वं
समर्थानामिति निर्धारणेषष्ठी समर्थानांमध्येप्रथमादित्यर्थः तत्तत्सूत्रेषुप्रथमोच्चारितशब्दप्रतिपाद्यत्वंचप्रथमत्वम्
एवंचानेकसमर्थसंभवःस्वार्थिकेष्वनेकसमर्थासंभवात्प्राग्दिशइत्युत्तरेणास्यसंबंधइतिबोध्यं।प्राग्दीव्यतो।तेनदीव्यतीतिस
त्रपठितदीव्यतिशब्देकदेशादीव्यच्छब्दोत्रगृह्यते तेन चैकदेशविकृतमनन्यवदितिन्यायेनदीव्यत्पर्यंतउपस्थाप्यतइत्यर्थस्या
वधित्वं।अयमेवनिर्देशस्तत्सज्ञापकइतिबोध्यं।एवंचावधिमतोप्यर्थाएवेत्यतइत्रिसादौनास्यसंबंधइतिबोध्यं।अश्वादेरन्वइति।
तेननिर्दिष्टस्यानिकालादिकपरिभाषयाप्रवृत्तिरितिबोध्यं।प्रामादिकमेवेति।गणपति दौत्रपत्यादीनामश्वपत्यादिषुपा
ठादितिभावः।दौत्रपत्यंचरुंनिर्वपेदितितु छांदसमित्यादि।पत्यंतादितिनोक्तं।परमप्रजापतिशब्दादप्याप्तेः।उत्तरपदग्रह
णेतु पंसमासरूपंप्रातिपदिकंपतिपतिशब्दउत्तरपदंतस्यैवग्रहणं।नत्वदोषःप्रत्ययविधौतदंतग्रह ।णेनपरमदितिश
दान्नाणपादीनांपूर्वविप्रतिषेधेनपराणपवादबाधकत्वान्ङीपंताभ्यामपिलिंगविशिष्टपरिभाषयाणपस्यप्राप्तेदैतेया
दितेपावसाधू।नन्वलिंगविशिष्टपरिभाषानित्या।अत्राप्रवृत्तौमानाभावात्।दितिवनस्पतिभ्यामपत्यसमूहयोरण्यस्यैवे
ष्टतायाभाष्यात्लाभाच्च तयोःक्वचितदंताङीविच्चहृदप्रमाणभावाच्चइत्यास्तत्रेभाष्येलिंगविशिष्टपरिभाषादोषेष्वस्या
युक्तेश्चदोषाः खल्वपिसाकल्येनगणिताइतिभाष्योक्त्याप्यत्रानित्यत्वेमानाभावाच्च।अश्वकादइति।अश्वत्थाम्नोपत्ये म्नो १
पं लुगवरुध्यतेइति।अतःपूर्वपदादित्यत्रभाष्येइतिभावः।लुग्वाच्यइति क्वचित्पाठः।लोम्नःइति।केवललोम्नस्येनयोगा

बाधनार्थमिति। मानवादौ ह्रस्व इति शेषः। ननु च शैषिकेणानेन स्वविषये प्राप्तस्य ह्रस्वस्य कथं बाधः। किंच तस्येदमित्यपत्ये
पीति पूर्वपक्षोऽप्यसंगतः। अशैषिकविषये शैषिकेणास्ति वृद्धिरिति। तृतीयस्याः शंकां समाधातुमाह। उत्सर्ग इति। योग
विभागाभावे प्रकृतिविशेषसंबद्धान्यापत्यार्थस्य शेषत्वमिति दोषद्वयं योगविभागे तु णादिविधानपक्षत्वेनापत्यस्य
प्रयोगान्न शेषत्वमिति ह्रस्वाप्राप्तिरेवात्र बाधः। इदंशब्दो हि इदंत्वेन सर्वविशेषबोधकस्तदुक्तं शेषसूत्रे भाष्ये। इदं विशेषा
ह्येतेऽपत्यं निवासः समूह इति। इदंपदार्थप्रवृत्तिनिमित्ताश्रयाश्च के विशेषा इति तदर्थः। तत्र शेष इति विशेषणादपत्यादीना
मिदंत्वाश्रयतयाऽनुग्रहणमिति बोध्यं। शेषपदसंबंधेनेदंपदेन प्रागनुक्तानामेवेदंत्वेन ग्रहणमित्येतद्बोधयितुमेव उत्सर्गः
शेष एवास्य विलुप्तरूपे त्विदंत्वेन बोधे शैषिकमिष्टं तिवान्ति किंतु शाब्दबोधकृतविशेषानादरेण प्रवृत्तमिति वदंति तत्तेषामेतद्वि
रोधः स्पष्ट एव। किंच भानोरपीदंत्वेनापत्यबोधे ह्रस्वत्वे बहुत्वेनास्पत्तदा बाधकत्वोक्तिः स्वारस्यासंगतिः। अपत्यं वाजोत्थमिति वा
त्ति किंप्रयोगे शिवादित्वादण्बोध्यः। दाक्षरूपायेत्यादित्वसाध्यत्वेवेति वात्तिकस्वरस इति विभावनीयं सद्भिः। कृतसंधेः किमिति।
अंतरंगत्वात्संधिकार्योत्तरमेव प्रत्ययो भविष्यतीति समर्थानामिति मर्थीमिति प्रश्नः। उत्तरयति। अकृतेति। यद्यप्यत्रैकादेशप्रवृ
त्तिसमये न वृद्धेः प्राप्तिः कृते एकादेशे जायमाना या वृद्ध्या च नतान्निमित्तविनाशस्तथापि निमित्तविनाशसंभावनैवात्र परि
भाषाप्रवृत्तौ निमित्तं सा चात्रास्त्येव यदि दीर्घो न स्यात्तदा वृद्ध्या निमित्तविनाशः स्यादितीति भावः। वस्तुतोऽन्तरंगन्यायलब्धा
र्थानुवाद एव समर्थानामिति। विष्णु ए इत्यादावकृतसंधेरपि प्रत्ययदर्शनेनान्यत्रापि तथा शंकावारणाय। अत एव विप्र
तिषेधसूत्रे भाष्ये तरंगं बलीय इत्यस्यासौ स्थितिर्वै न्हामणि रिखुदाहरणं दत्तं। पदस्य विभज्यान्वाख्यानेषु उत्थितइ
त्यइत्ति स्थिते परत्वादादिवृद्धिः प्राप्नोतीति च कैयटः। अकृतेति परिभाषा तु भाष्याव्यवहृतत्वान्नास्त्येवेत्यन्यत्र विस्तरः। व
त्रे मुपगोरिति। यद्यपीदं तत्संबंध्यपत्यमित्यर्थे प्रत्यय इत्यर्थेन प्रत्यासत्त्या वारयितुं शक्यं। तथापि वृद्धस्योपगव इ

पथत्वाद्वुञ्। तद्धिते इति किं। गार्ग्यः। अनाती किं। गार्ग्यायणाः। गार्गीयाः। भक्तिप्राक्क्रीताच्छः। यूनि लुक्। विवादित इति। तेन ग्लुचुका
यने छेन। वर्त्मा एव इति। प्राचामवृद्धादित्यर्थः। आदौ किं। ग्लौचुकायनस्यापत्यं। प्राग्दीव्यतीये इति किं। ग्लौचुका
यनीयं हितेऽच्छः। पैलादि। एष ह्यात्रिये सत्तो यूनि लुगित्यनुवर्तते। इञः प्रा। इञन्तात् युवप्रत्ययस्य गोत्रार्थकादेव संभवेनाह।
गोत्रे य इति। तस्मादिति। प्राचां ग्रहणं न विकल्पार्थमारम्भानादित्तिभावः। नतौल्वली। एते इञन्ताः। अनन्तरस्येति न्यायात्
लादेर्लुको नायं बाधक इत्याशयेनाह। यूनि लुगिति। वेत्यधिकारे त्वन्यतरस्यांग्रहणं हि जो लुगित्यादौ तदसंबन्धज्ञाप
नार्थं। कात्यायने गार्ग्यादियञन्तकतशब्दात् इञो ऽञ्जेति फक्। कातीये आपत्यस्येति यलोपः। तस्यापत्यं। तत्संबन्धस्य पत्यामि
त्यर्थे सूत्रे समर्थानां प्रथमा प्रातिपदिकादणं दपद्यर्थः। चकारस्तनेत्तिज्ञापका त्स्वार्थे परिसमाप्त
स्येवा र्थान्तरान्वयेन सूत्रं तत्तद्धितोत्पत्त्यावहितं ततः परत्वं। यत्तु प्रातिपदिकादि पदं तत्स्वकृतिकेत्यादि एकमिति।
तन्न। जघन्यवृत्तिकल्पनाया अन्याय्यत्वात् सुप्चतस्य पदेनउपस्थित अक्षयवत एकीतमाह। अस्यंतादिति। तस्येति
सामान्यषष्ठ्यपि वृद्धिस्थेन सर्वं विशेषबोधक इति उपगवादिभक्तसत्तिर्न विरुद्धा। आदिवृद्धिरिति स्वविषय इति शेषः।
तेन असोर्भावो वै यस्य वापदिभवं वैयापदमित्यादौ न दोषः तत्रापि वृद्धिप्राप्त्या विषयसत्वात् ऐज्विधायकेन निषेध
इत्यन्यत्। बाधत इति। अनुशतिकादिषु पुष्करसच्छब्द पाठात्स हि पौष्करसादा बुभपद वध्यर्थेषु गादित्तु ततो नान
भिधानादिति भावः। परत्वाद्वा घ इति न युक्तं। युगपत्कार्यद्वयासंभवे एव विप्रतिषेधप्रवृत्तेः। नापितक्रौण्डिन्यन्याये
नापवादत्वात्। उभयोरपि जेः पाचकः सोऽनुत इत्यादौ चारितार्थ्यात्स्यच्चेदंभाष्ये। तस्येदमिति। सामान्ये सर्वं विशे
षातभावाद पत्येपि तस्येदमित्येव सिद्धत्वात् तस्यापत्यमत इत्येव कार्यं द्वियोर्योगविभाग इति प्रज्ञः परिहरति।

गविशिष्टादावेकोगोत्रे इति नियमादिञ्न स्यात्। गोत्राद्यूनीत्यस्याप्राप्तविधायकत्वेतु गर्गस्य चतुर्थे जीवद्वंश्ये विवक्षिते
गार्ग्यइत्यस्यापि तेः गोत्राद्येवयूनीति नियमाभावात्। किंच समावेशे द्वितीयाध्यायस्य लुक्प्रकरणे समध्येपवादान्याये
नगोत्रे लुगन्ची स्यलुक्स्यात्। तथा च पीलाया अपत्यं पैलः तस्यापत्यं युवा ण्यौ द्वाच इति फिञः पैलादिभ्यश्चेति लुकि
पैलस्य छात्राः पैलीयाः इत्यत्र गोत्रे लुगित्यलुक्प्रसंगः। असमावेशे तु युवप्रत्ययविषये स्याप्राप्ते स्तेन न्यायेन भूम्निप्रा
प्तस्येत्यर्थादस्याप्राप्तेऽंतरंगत्वात्पैलादिलुगेवेति सिद्धमिति दिक्। भ्रातरि च। भ्रातुर्वंश्यत्वादारब्धं। वहुषु पुत्रे
ष्वेतदुपपन्नं भवत्ययं मे ज्येष्ठोऽयं मे मध्यमोऽयं मे कनीयानिति। अत एव रूपं भावप्रयोगे बहूनां निर्धारणे पीयसु
त्र७ न्दर्शनात् द्विभागमात्रीयसुनादिनिमित्तं द्वित्वादि तु रूपेऽविवक्षितं ध्वन्नयपन्नाह। ज्येष्ठे इति। अत एव बहुष्वपि पु
त्रेषु मृतेपि पित्रादवगुजे जीवति द्वौ गार्ग्यायणाविति गार्ग्यस्य द्वौ पुत्रौ तयोः कनीयान्गार्ग्यायण इति चोपपद्यते।
वान्यस्मिन्न। सप्तपुरुषावधिपितृकुलेसपिण्डाः मातृकुले पंचपुरुषावधि प्रकृते भ्रातुरन्यस्मिन्निति पर्युदासादाद्यमे
व गृह्यते इति वृत्तिरसमपि गृह्यते इत्यन्ये। अन्यस्मिन्निति सस्य ज्येष्ठभ्रातुरन्यस्मिन्नित्यर्थः। तच्च भ्रातृरूपसपिंडे जीवति
जीवतः पत्त्वाद्विकल्पया वत्सर्थं जीवति सत्यनुवर्तमाने जीवतीतिवर्धमत आह एकमिति। तिङंतं तदिति भावः। द्वितीयमि
ति। शत्रंतत्सप्तम्यंतमिति भावः। ननु ज्यायसीत्यनुवृत्त्यैव सिद्धे तरवंतं व्यर्थमत आह। तरब्निर्देश इति। तरवंतनिर्देश
इत्यर्थः। उभयोरिति। स्थानवयसोरित्यर्थः। स्थानं पदं पितृत्वादिकं ते तद्रूपेणैव तेषां पूज्यत्वात्। यद्यपि भ्रातृत्वे
न न पूज्यता कनिष्ठभ्रातर्यपि तत्सत्वादेवं च भ्राता न स्थानत उत्कृष्ट इत्स तेनैव व्याख्यातं सिद्धावन्यस्मिन्निति जीवति२
व्यर्थं। तथापि। अन्यस्मिन्नेव सपिंडे जीवति विकल्पः भ्रातृसहिते न्यस पिंडे जीवतो नित्यमेवेत्यर्थं तत्। नन्वज्या रामः
यसीत्यस्यानुवृत्त्यासाज्यायसित्यस्य विरोध इत्याभ्यामुभयप्रकर्षताभेतरपूर्वपर्व इति वाच्यं स्पष्टार्थत्वात्। मातामहभ्रातरी २०१

सादिवारणाय सावृश्यकीति तत्त्वं। षष्ठ्यर्थे इति। उपगुरपत्यमस्य देवदत्तस्येत्यर्थे औपगवो देवदत्त इति माभूदित्यर्थः। त
स्यापत्यमित्यादौ लिङ्गवचनेन विवक्षितमिति बोध्यं। अपत्यं पौ। यद्यपि प्रवराध्यायप्रसिद्धं लोके गोत्रं। तथापि प्रवराध्या
याप्रसिद्धस्यापि संज्ञार्थमिदं पौत्रादेरपत्यत्वाव्यभिचारा दपत्यपदसामर्थ्यादाह। अपत्यत्वेन विवक्षितमिति। तेन पौ
त्रप्रभृतेस्तत्त्वेनाविवक्षायां न गोत्रत्वं पौत्रापत्यशब्दयोः ससंबन्धकतया यदीयं पौत्रप्रभृति अ पत्यं तत्प्रत्येव तत्सगो
त्रमिति गर्गस्य पौत्रे गार्ग्यस्यानन्तरे वाच्ये न गर्गशब्दाद्यञ्। अत्र समर्थानां प्रथमादित्यनुवर्त्य विभक्तिविपरिणामे
न समर्थानां प्रथमस्य प्रकरणादपत्यप्रत्ययप्रकृतेर्यत्सौत्रप्रभृति अपत्यं तत्सुत्यवाच्यतयापत्यत्वेन विवक्षितं तद्गोत्रमि
त्यर्थः। सौत्रपरगार्ग्यपुत्रादिशब्दाद्यूनि प्रत्यय इति भाष्ये स्पष्टमेव च गोत्रप्रत्ययान्तेभ्योऽपत्यत्वेनैव बोध इति सू
चितं। अत एव गार्ग्यस्यापत्यं गोत्रमित्यर्थं प्रदर्शयति गार्ग्य इत्यादेरर्थः। अत एवापत्यं वा गोत्रं परमप्रकृतेः आपत्यः आप
त्याजीवद्वंश्यत्वार्थे द्वितीयो युवसंज्ञः सचास्त्रियामित्येतत्क्वात्तिकसमुदायेन प्रत्यययोरेव गोत्रयुवसंज्ञाविधानं अप
त्यस्यापत्यमापत्यं शिवादेराकृतिगणत्वादण्। तेन च तद्बोधकप्रत्ययस्य रूपं लभ्यते। आपत्यः आपत्यादित्सन योस्तद्
युक्तिलात्। गोत्रसंज्ञासूत्रे क्वचित्पुस्तके आपत्यो वा गोत्रमिति पाठो दृश्यते स च युक्ततरः। स्त्रीपुंसाधिकारे पत्याताद्यमरो
क्तेः। अत एव [illegible] पत्य इति द्वितीयवार्त्तिके पुंलिङ्गप्रयोगः। न चापत्यमेव इत्यर्थे एवंतःसः अप्रत्ययाप [illegible] त्तेः। तद्युक्तयुवसंज्ञा
साहचर्येणस्याप्रत्ययनिवृत्तायामेवोचित्याद्वार्त्तिकमते प्यर्थस्य गोत्रसंज्ञायां सूत्रोक्तापौत्रादिविशेषणवाशब्दा
सङ्गतिश्च। न्यासेत्वा घवमात्रे एवं [illegible] गोत्रमिति वेति वदन्ते। आपत्यो वेति न्यासे न संज्ञिविकल्पस्यैव
ताभात्। आपत्यादेरापत्यबोधकप्रत्ययान्ताज्जीवद्वंश्यबोधकात्स्वार्थे द्वितीयो युवसंज्ञः प्रत्ययो भवतीत्यर्थ इति स्पष्ट
मेवेति दिक्। पौत्रेति। यौत्रादेरपत्य [illegible] औपगवस्य गोत्रस्यापत्यमौप

शाब्दे आ
मलो ऽ

सत्तु तयोस्तर घटितसंतानपरंपरयोरित्यर्थ इतिनासंगतिः। पितामहोत्संगे स्थितस्य दारक ७

म्योगाद्विविधानेनेष्टसिद्धेः। एवं च पुत्रे एकः पौत्रे परस्तदपत्ये चापर इति गोत्रागोत्रसमुदाये बहूनां प्राप्तौ एक एवा
पत्यप्रत्यय इति नियमे नैकाभ्यनुज्ञाद्वारा परमप्रकृतेर्विधिरपि परंपरापत्यापत्यवत्संबंधे प्रवर्त्तेत इत्यनुमीय
त इति वाच्यं। एकग्रहणसामर्थ्येनैकाभ्यनुज्ञानादिरूपपूर्वोक्तार्थकल्पनापेक्षापायितम्महादीनामप्यपत्य
मित्येतत्कल्पनस्यैवयुक्तत्वादत एवापत्यं पौत्रप्रभृतीति सूत्रं स्वरसतः संगच्छते दशसु पुरुषेषु यस्य कुले विवा
हितास्मृदानास्ति समो मे पितेव द्विगुत्तया यथाएकपाते सर्वे पातास्तथात इहितस्यैकस्य सर्वोत्प्रत्यपातहेतुत्वेना
पत्यत्वमपि युक्तमिति स्पष्टं भाष्ये। जरत्कारौ व्युत्पाख्यानेन च स्पष्टमेवैकस्य सर्वोत्प्रत्यपातहेतुत्वं। अपतनादप
त्यमिति च पंक्तीति सूत्रे भाष्ये स्पष्टमपत्यं तोकं तयोः समे इत्यमरस्याविषये कस्यायमिति प्रश्नो जनकविषय एवे
ति तत्र पितृत्वव्यपदेशो नान्तरस्येनासंगतिरित्यरुचेराह। यद्वेति स्वघूनेति। स्वं गोत्रं तदपेक्षया। घूनसंख्येभ्यः प्र
कृतिभूतेभ्यो निष्ठाप्रत्ययोत्पत्तिरित्यर्थः। उपगोस्त्वतीपे एकस्मादौपगवादिनिष्ठः प्राप्नोतीति च तु पेक्षा भामित्या
दीतिभावः। अनिष्ठोत्पत्तिस्तन्मात्रेनाविष्ठासिद्धिरित्यर्थः। अत्रपक्षेउपगोरणेष्ठसिद्धावप्यौपगवादिञो निवृत्तये
निपमार्थमेवेदं। नन्वेवमनंतरापत्यप्रत्ययांतात्पौत्रे प्रत्ययोदुर्वारः गोत्रएकस्यैवकृतत्वेन नियमावाधात्तच्चगोत्र
पदेनापत्यसमुदायलक्षणया परमप्रकृतेरेवेति वाच्यं। अपत्यमितत्यनुवृत्त्यैव सिद्धौ गोत्रग्रहणं वैयर्थ्यापत्तेरिति चेन्न।
भाष्ये प्रत्याख्यातत्वेनेष्टापत्तेः। पक्षागोत्रेवोधनीये एकएव शब्दः प्रत्ययप्रकृतिर्नानेक इत्यर्थः। यदि च प्रत्ययांता
त्प्रत्ययः स्यात् नैकप्रत्ययप्रकृतिः स्यादिति। यद्वा एकशब्दः प्रथमवाची प्रथमः शब्दो गोत्रे प्रत्ययमुत्पादयतीत्यर्थः।
प्रथमत्वं च सर्वमूलत्वं सर्वं चैतम्द्भाष्ये स्पष्टं। तद्वान्यै। आद्येइष्टासिद्धेः प्रत्ययमालापत्त्ये निवृत्तये लेनि

ति। मातृसापिंड्यमपि गृह्यत इति मतेदं। केचित्तु पितामहभ्रातरीति पाठः। स्थानवयोन्यूनेइति। स्थानन्यूनः स्वजेष्ठो
भ्रातृपुत्रादिः। जीवतीति किमिति। स्फ्रत्रोपा तमनुवर्त्तमानं च किमर्थमिति प्रश्नः। मृते सपिंडे मृते भ्रातर्यादिः। कश्चस्येचे
तियूनश्चेतिच वार्त्तिके। तत्रभवानिति। पूजागमकं। युवसंज्ञा कानाम ल्पवयस्त्वेन कुत्साधीनत्वेन सुवितया च पूजातां
च गोत्रभूतस्तृतीयो विमन्यते। अत्र युवसंज्ञाविधानसामर्थ्यात्स्वापत्ये युवप्रत्ययो वोध्यः। जाल्मइति। जीवदंश्ये नाहि
कुत्साधीने नभाव्यं यत्तु कुत्सा नैनाट्टत्यस्मात् तत्र कुत्तेस एवमुच्यते। एको गोत्रे गोत्रइति। अभिधेयइत्यर्थः।
एक एवेति। संख्यावाची एक शब्दोधिकारलब्धापत्यप्रत्ययस्य विशेषणमिति भावः। अतएवानंतरापत्यप्रत्ययांतान्वा
पत्यप्रत्ययः। अपत्यग्रहणानुवृत्तिस्तु अनंतरापत्यप्रत्ययांतागोत्रप्रत्ययवारणाय अन्यथा नियमस्य तुल्यजातीय
तया गोत्रप्रत्ययांता देव गोत्रप्रत्ययो वा स्यादिति। उपगोरपत्यं गार्गादिभ्यो यञ् नडादिभ्यः फक्। ततोसितृसंवंधेवापत्य
मात्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी। आहुर्दुहितरं सर्वेपत्यं तोकं तयोः समम् इत्यमरात् पोः पुत्रदुहित्रोः अतएव
वपितामहो संगे प्रासीनं दामकं कञ्चिस्ख छात्तिकसायमितिसततितरमेवव्यपदिशति नाप्ता नंतदाह। गोत्रेइति।
उपगोस्तृतीयेवाच्ये औपगवादिभिः। अनिष्ठा प्रत्ययपरंपरैव प्राप्नोति न तु कदाचिदप्यौपगव इत्यण् विशि
कमिच्छसि भवति। एवं गार्ग्यस्तृतीये वा न्वेगार्गादिभ्यइत्यादावारंभसामर्थ्यात्सिरं परापत्यत्वसंवंधे प्रवृत्तेष्वसिद्धा
च्छघटकत्वात्सोपानिच्छः परंपरे सस्य प्रसज्यत इत्यनेनान्वयः। नन्वत्रपदो उपगोस्तृतीये एर विध्यर्थत्वम
स्वाच्यं। प्रत्ययमालाव्यावृत्तये नियमार्थत्वं चेतिजोरवं। नचगोत्रपदेनगोत्रं गोत्रसमुदायो पत्यवोधि
यः। एकपदं च सामर्थ्यात्सावयवा [illegible] ने इत्युक्तेवोप ज्यादि

नुवर्त्तते। तद्राजत्वादिति। आदयस्तद्राजा इत्यनेन। लुगिति। तद्राजस्य बहुषु लुक्त्यनेन अपत्ये इति भावः। स्त्रियामिति। अप्रत्यये हि यो पथ त्वाच्छीञ्जस्यात् टाब्वस्यादिति स्त्रियामिति लुक् मिति भावः। यञञो। अधिकृतं गोत्रे इति यञिञो विशेषणं फकु यूनि। गोत्रे किंतु तं गमादिभ्यश्चातुरर्थिके इञि सौतं गमेरपत्ये भाष्कर। शरद्वच्छुन। अशुवत्स पदे पत्ये षु अंगुलादयो पे प्रयुक्ते। अन्यथा भज्ञुवत्सयोः शरद्वच्छुनकदर्भा विलादसंगतिः स्यादेवेति केचित्। अन्यः। कृत्रिमपुत्रादिः अत्राय णो नञादि फगंतः। दार्भि रिति। अस्यञ् पिले तु वाह्वादित्वादिञ् शरद्वच्छुनको विदादी ता भ्यां फको ऽभावे त्र। अनादिरिति। भारतप्रसिद्धो ऽस्मदाद्य ऋ्यादिकाल इत्यर्थः। अभिव्यक्त पदार्था ये स्वतंत्रा लोकविश्रुताः। शास्त्रार्थस्तेषु कर्तव्यः शब्दे षु न तदुक्तिष्विति हर्युक्तेः। अभिव्यक्तेत्यनेन नाद्यर्थाभिधायित्वं। तेन विशिष्टरूपोपादाने पदकार्ये एव चायं स्वतंत्रा इ त्यनेन गोणनिरासः। लोकविश्रुता इत्यनेनाप्रयुक्तं निरस्तं। तदुक्ति श्रुतत्स दृशेषु। वाह्वादिभ्यश्चेतिसूत्रे भाष्ये पि। वाह्वा दि प्रभृतिषु येषां दर्शनं लोकविदितादिपुरुषत्वरूपे लौकिके गोत्रभावे ततो ऽन्यत्र प्रतिषेधः। वाहुनाम्न आधुनिकस्या पत्यं वाहव एव संबंधिशब्दानां कार्ये तत्स दृशात्प्रतिषेध इति चोक्तं। तत्र गोत्रभाव इति प्रकृताभिप्रायेण तदेव ध्वन यतावयुत्यानुवादेन संबंधिशब्दानामित्याद्युक्तं। एवं चायं न्यायः सर्वविषय इति बोध्यं। वाह्वादिसूत्रे पाठात द्धित विषय एवेति काश्चित्। अन्यथा। अन्यथीति लुप्तपंचम्यंतं। आनंतर्ये। अनंतरापत्ये। इदं वृत्त्यनुसारेण। भाष्ये तु अ त्रिभ्यो ऽनंतरे नेत्यर्थोऽसमर्थसमासे न दर्शितः ये त्वत्रान्ये षयः पठ्यंते तेभ्यो ऽनंतरे पीति चोक्तं निषेधसामर्थ्याद् दैवात्र गोत्र इत्यस्यासंबंध इतितद्भावः यूनि तु गोत्राद्यूनीति नियमान्न दोषः। गर्गादि। रामो जामदग्न्यः पाराशर्यो व्यास इ रामः त्यनंतरे गोत्रत्वारोपाद्बोध्यं। यञञोः। एषद्व त्रियेत्यतो लुगिति। त द्राजस्येतिसूत्राद्बहुषु तेने वास्त्रिया २०३

षष्ठ्यात्रनिवृत्तये तत्राद्योऽप्युक्त इत्युक्तं। तृतीयेइति। तृतीयसंमूलपुरुषापेक्षयायजमानपंचमोइत्यादौ द्विजातीयेना
पिसंख्यापूरणदर्शनात्। अत्रो यजवादिष्विति। तस्मादेवेत्सर्थः। नतु पञ्चोस्तृतीयस्पतं प्रत्ययत्सत्वाभावादितिभावः। एवमिति।
पितामहादीनामपीतिसिद्धांतपक्षे। पंचमादौ यूनितृतीयादुत्पत्तौगार्ग्यायणइ तौष्ठे सिद्धे पिमूलप्रकृत्सनंतरापत्ययुवप्र
त्ययांतादनिष्टमपिप्राप्नोतीतियूनिगोत्राद्देवनत्वसंत्तोमइति नियमार्थंगोत्राद्यूनीति। आद्येतुपक्षे पंचमे यूनिचतुर्थ्यात्प्र
त्ययःस्यान्नतुतृतीयवाचिगोत्रप्रत्ययांतादितिविध्यर्थमेवेदंस्यान्नतुनियमार्थमिति पितामहादीनामपीतिपक्ष एव
ज्यायानितिबोध्यं। स्त्रियांतुनेति। अस्त्रियामितियोगं विभज्य तत्र यूनीति अनुवर्त्यते। पिप्पल्यमयाविपरिणामप्य
स्त्रीयुवानेत्यर्थइतिभावः। अत इत्यनेनाधिकृतप्रातिपदिकस्य विशेषणं तदंतविधिरित्याहादंतादिति। अस्यापत्यमित्यादौ
बपदे शिवन्दावादिभ्योऽण्। व्यास व। व्यासोत्र वेदव्यास एव प्रसिद्धत्वात्। ननु व्यस्येर पवादावेवाविति नेतद्विषये बाधः
प्रसक्तिः। नचविषयभेदेकथमपवादत्वं विषयभेदेप्यचिरादेशेननुटोबाधस्यभाष्ये शंकितत्वात्। नतिस्त्रितिनिषेधे
ननुटोनरादेशोनबाधइतिसमाहितमित्यन्यत्र एवंचनेतियर्थमिति। चेन्नयत्रद्वाभ्यांपरस्परप्रसक्तायाबद्धेनिषेध
तत्रैवेत्याविसैन्यौर्विधयानिर्देशार्थंतत्सत्वात्। तेनदाध्वाघ्वित्यादौन। अयंच निषेधोयेननाप्राप्तिन्यायेनताद्धि
तेष्वचामादेरितिवृद्धेरेव। तेनद्वाशीतिकेसंख्यायाःसंवत्सरे तिवृद्धिर्भवत्येव। पदांताभ्यांकिं। एतीतियन्तस्यद्वात्राया
ताइत्यादौमाभूत्। पूर्वौ। पूर्वावयवौ। अ भक्तत्वेहिइआगमश्चैयन्तस्मादणंताच्छेनस्यात्। प्रातिपदिकस्यावृ
द्धत्वादितिहरदत्तः। गोत्रेकुं। गोत्रेबोधनीयेत्सलंबंध्यपत्यमित्यर्थेकुंजादिभ्यःपरःप्रत्ययइत्यर्थः। च्फञिञकारःकौ
जायनीत्यादौवृध्यर्थः। चकारोव्रातच्फञोरित्यत्र विशेषणार्थः। व्रातच्फञो। पूगात्ञ्योग्रामणीपूर्वादित्यतोञ्यो

ध्रु। नन्वेवं गार्गीप्रभृतिभ्यो यूनि ठक् न स्यात् यूनो गोत्रत्वाभावात्। न तु दाक्षेर्यीलादौ चरितार्थमिति वाच्यं उदीचां वृद्धा
दितिसूत्रेऽगोत्रादित्युक्तिसामर्थ्येन तत्रेति सूत्रेऽनिञ इत्युक्तिसामर्थ्येन च गोत्रत्वस्य पात्तप्रकृतिभ्यो ष्फेथा विशिष्य
विधानेन तत्सामर्थ्याद्यूनि गोत्रेतिवद्युन्युक्तानि सिद्धेः शास्त्रीयगोत्रत्वं युव बानाक्रान्तपौत्रप्रभृत्यपत्यस्वरूपं। तद
र्थकत्वं च वास्तवं शास्त्रप्रक्रियानिर्वाहाय शास्त्रकल्पितं वा परन्तु लौकिकग्रहणमपि यत्र शास्त्रीयग्रहणमकाभा
वस्तत्रैवात एव काण्वादिभ्यो गोत्रे इत्यत्र गृष्ट्यादिसादौ च शास्त्रीयस्यैव ग्रहणं। राजन्यमनुष्यशब्दयोर्लोके जाति
204 प्रकारकबोधजनकत्वेपि प्रक्रियादशायां राजश्वशुरादित्यादेर्गोत्राधिकारे पाठकल्पितं शास्त्रीयगोत्रार्थकत्वं।
अत एव राजन्यादिभ्य उदीचां वृद्धादिति फिञ्। अत एव ग्लुचुकस्य युवापत्यं ग्लौचुकायन इत्यत्र फिञन्ताद्यूनि फि
ञो लुक्न्निमतेस्तद्युवरिः लौकिकं च प्रवराध्याय प्रसिद्धं लोके तत्रैव गोत्रव्यवहारात्। अणिञोः स्त्रीपुंसाभ्यामिति सू
त्रस्थभाष्यस्वरसाच्च। न चाशिवादिभ्य इत्यत्राण्ग्रहणं व्यर्थं। न च बाधकबाधनार्थमित्यत एव विधिरयं स्यात् ततोण्
ग्रहणं तद्बाधकस्यैवाभावात्। तत्रेञ्बाधनार्थं शिवादिभ्यो यथाविहितमित्येवाण् सिद्धेरिति प्रकृतसूत्रभाष्योक्त
मसंगतं स्यात्। शिवादिभ्यो गोत्र एवेञ् नान्यत्रेति नियमे नचारितार्थ्येनाण्ग्रहणं विना तदसिद्धेरिति वाच्यं। विधि
नियमसंभवे विधेरेव ज्यायस्त्वेन विधित्वानुरोधेनाण् एव विधेरिति भाष्याशयात्। अण्ग्रहणं त्वत्र पठितादृ
ष्टिषेण शब्दादिर्बाधकस्येसेनात लक्षणप्रत्ययस्य सत्त्वेनेत्र एव विधानं स्यादन्न लभ्यत इतीति भाष्य एव स्पष्टं। यत्तु रव राम:
ङ्किकादिसूत्रे जनपदशब्दात् द्वेत्र्यादित्याद्यधिकारस्थप्रत्ययान्तवद्रूपात् द्वाद्व्रकमालवाज्जोत्रो द्वौ तित्वं मित्रे द्वौ २०४
द्रकमालवकामित्युक्तं तत्तत्र लौकिकगोत्रव्यारोपेण निर्वाह्यं। अतिप्रसंगस्तु आरोपे सति निमित्तानुसरणमिति न्या

मिति यस्कादिभ्योऽन्यतो गोत्र इति चानुवर्त्तते। प्रवराध्यायप्रसिद्धं गोत्रं वा चिलं यञञो नास्तीति तत्राह। यञं तमिति। निर्दिश्यमानपरिभाषा लुक्संज्ञा भ्यां लब्धमतमाह। तदवयवयोरिति। प्रवरे ति। एतदेव च लौकिकं गोत्रं। एतत्सर्वं यूनि लुक् गोत्राव यवात्स्त्रीपुंसाभ्यामित्यादौ भाष्ये स्पष्टं। लोहितादिकार्थमिति। स्त्रियां ष्फ इत्यर्थः। आंगिरस इत्येवेति। तत्र यत्रे वेत्यर्थस्तदाह। अनांगिरसे त्विति। आंगिरस एवेति नियमस्तु न गर्गा दिपाठस्यवैयर्थ्यापत्तेः स्त्रियां तु लुक्सत्वेन यञ्यो कार इति व्याख्यानेन चास्य लोहितादिकार्यार्थं पाठ इति न वाच्यं। शिवादिगणे पाठमानं ठलुक् स्त्रियामित्यनेन वतंडाच्चेत्यस्य विभाग एवेति बोध्यं। विहितस्येत्यनंतरस्येति न्याय लब्धमिदं। वक्ष्यमाण इति। आंगिरसो रितिसूत्रेणेत्यर्थः। तत्र प्रतिपदोक्तपरिभाषयानंतर्यार्थग्रहणमिति न युक्तं इत्यंशे तदसंभवेन तत्त्यागस्य वयं दर्शयितुमप्रवृत्तेः। परंतु। वतंडाच्चेति सूत्रमारब्धिलाघवेन किमर्थमिदमुच्यते गर्गादिभ्यइत्येव सिद्धं लुक् स्त्रियामित्यपि तत्रैवोच्येत साशंकयांगिरस इति विशिष्येतेत्युक्तं भाष्ये। तदाशयस्तु पूर्वं पक्षे सम्यगेव तत्र पूर्वसूत्रे आंगिरस इत्युक्त्यानांगिरसे यञ्अभाववदनापि तदभाव एवोचितः विधित्वस्ये वोचित्साद्योगविभागस्तामर्थ्येन कपिबोधयोरिवासाचिगणे पाठाभाव एवानुमीयतेगणपाठेतु आंगिरस इत्येतद्विधेर्देनानांगिरसे पियञ्स्यादिति शिवादिगणपाठोपिय द्विश्रामाणिकस्तदानांगिरसे चरितार्थः स्यात्स्यांगिरसे यञ्ञा बाधः एवं चानांगिरसे वातं डपापनीतिं चिंतामेवेत्याहुः। निकृष्टमिति। इदं बसनुरोधेन। यूनि लुक् सूत्रभाष्ये गोत्रसंज्ञासूत्रपर्यं तं गोत्राधिकार इति ध्वनितत्वात्। तत्रभाष्येऽपत्याधिकारादन्यत्र शास्त्रीय गोत्रग्रहणे गार्ग्यायणाद्भ्यो युवप्रत्ययांतेभ्यः समूहादौ गोत्रत्वप्रयुक्तो वुञ्न स्यादिसाशंक्यापत्याधिकारादन्यत्र प्रवराध्यायप्रसिद्धरूपलौकिकगोत्रग्रहणे गोत्रोक्षो क्षेतिसूत्रे राजन्यमनुष्यग्रहणं ... दितु जामदग्न्यादिव दारो पेण सा

स्येत्यतः पूर्वस्यतु वेतिचानुवर्त्तते तदाह। शब्दस्योत्तरपदस्येति। शब्दस्येत्यवयवषष्ठी। प्रवाहणः अभ्रादि उत्तरपदस्य वृ
द्धिमत्त्वेपि तद्विधानं पूर्वपदस्य वृद्ध्यभावे पिवृद्धिनिमित्तस्येति पुंवत्वप्रतिषेधार्थं। जातेश्चेति नि षेधस्तु अस्मादेवज्ञा
पकादनित्य इति बोध्यं। तत्स्य। तत्शब्देन टः परामृश्यते प्रवाहणस्येत्यनुवर्त्तते। वाह्लीति। स चेन्न इत उत्तरं विक
र्णादिभ्यो वेयइत्यंतोग्रंथो विपरीतलेखस्तु लेखकप्रमादात्। कल्याण्यादी। ढकि सिद्धेपी नङ् थमिदं। ढक्तु नि
त्य इति। कत्यादिव्याख्यानादितिभावः। पूर्वेण। स्त्रीभ्यइत्यनेन। अत्र इनङ् द्वौ। पद्वोइति। तदभावे ढगित्यर्थः। हृद्भ
ग। सिंध्वादुत्तरपदस्य। महतेसौभगायेत्यादौ लुङ्आत्रादित्वादत्रिः। दस्वात्नोत्तरपदवृद्धिः। स्त्रीलिंगनिर्देशात्पुंसि न
स्यादतआह। चटकस्येति। एवं च स्त्रैणेच ढकाइति वर्थमित्याह। लिंगविशिष्टेति। अजादित्वादिति। तत्रसामान्येन
द्वयोरनुकरणमितिभावः। क्षुद्राभ्यो। अर्थनिर्देशो यंतदभिधायि प्रकृतिभ्य अयंप्रत्ययः। शीलहीना अनियत
पुंस्कादास्यादयः अंगहीनाः काणादयः। अतएवेति। शुभ्रादिपाठकल्पन क्लारेतिभावः। प्रकारांतरमपि प्राक् शुतं। मा
तृष्व। चासित्वृषसुरित्यनुवर्त्त्यते षष्ठ्या च विपरिणम्यते त्याह। पितृष्वसुरिति। ढकोरिति। इदं ते भ्यइतश्चे तिटक् प्राप्तः।
ढञिति। गृष्ट्यादित्वादिति। युलोपइति। ढेलोपइत्यस्यतु न प्राप्तिः परेण यादेशेन बाधात्। गोत्रप्रत्ययस्येति।
प्रवराध्यायप्रसिद्धं घटकस्येत्यर्थः। अपत्याधिकारादन्यत्र लौकिकं गोत्रमितिभावः। पस्कस्यापत्यं यास्कः शिवा
द्यण्। तदंतात् यूनि अणोद्व्यचइतिफिञि यास्कायन इत्यत्र युवप्रत्ययस्तु न लुक्। विहितविशेषणात् अपणस्तु
वस्तुतो त्रशास्त्रीयं गोत्रं भाष्यरीत्या यस्कादिभ्यः शास्त्रीयगोत्रएव प्रत्ययविधानात्। अतएव वान्यस्मिन्निति सूत्रे
गोत्रयूनोः समावेशे यास्कायनइत्यत्र दोषः शंकितो भाष्ये अन्यथाति व्याप्ते व्यस्य दोषस्य समाधेयत्वेन तत्रैवाशं
कापर भाष्यासंगतेरित्यलं। तद्राजस्येति। स्त्रावहुष्विलादिवर्त्तते तत्कृतेति किं। प्रियायस्काः। वहुत्वे किं। या

येन परिहार्यः। अपत्याधिकारात्परमिति भावः। परशब्दोऽन्यपर्यायस्ततः पूर्वस्मिन्यञञोश्चेति लुग्विधायके स्त्रीपुंसा
भ्यामिति सूत्रभाष्ये लौकिकगोत्रग्रहस्योक्तत्वादित्यलमत्र विस्तरः। अवृद्धाभ्य इत्यादेर्विशेषं प्रकृतिभ्यः इति न
दीमानुषीभ्य इत्यस्य पृथक्कारकं तद्विशेषणत दाह। अवृद्धे भ इति। ऋष्यन्धक। अन्धकादयस्त्रयो वंशाः। ऋषयो मन्त्रद्रष्टारः।
ऋषिर्वेदस्तद्द्रष्टृत्वात्तत्ते षां तत्वं। मातुरुत्। अत्र पूर्णतं स्त्रीत्वं शेषात्त्वपूर्वा या इति निर्देशः। मातृशब्दस्य जननी
वाचिन एव ग्रहणमभिक्तपदार्थकत्वात्। द्वे मातरौ यस्य द्वयोर्मात्रोरपत्यमिति तद्धितार्थेति समासः। तेन व्याप्नोति। इदं चिंत्यं
तादृशस्त्रीवाग्ग्रहणस्याभिमतत्वे तस्यावश्यकत्वात् लिंगविशिष्टपरिभाषया प्राप्तिः। वैमात्रेय इति। एवं च विमातृश ब्दो
न्यप्युदाहार्य इति भावः। अनूढाया एवेति। नत्वदत्तयो नित्यकन्यात्वमिति भावः। वत्सादीनां मूलपुरुषत्वाद्विकार्णी
दीन्प्रत्यपत्यत्वासंभवाद्वत्सादयस्तदपत्ये आरोपितप्रवृत्तिनिमित्तका इत्याशयेनाह। वात्स्यश्चे दिति। पद्मोद्भवेति।
पूर्वसूत्राद्ढग्रहणमनुवर्त्तत इति भावः। स्त्रीभ्यो। स्त्रीशब्दः स्वर्यते तेनाधिका र्थावगतिरित्याशयेनाह। स्त्रीप्रत्ययेति।
तदंतप्रातिपदिकादित्यर्थस्तदंतस्य प्रातिपदिकत्वं चालिंगविशिष्टपरिभाषया प्रातिपदिकत्वादीनां तादृशविशेष्यबोधना
स्वतं। तेन टाबादय एवमाख्यानात्। तेन दरदोपत्यं दारद इत्यत्र न ढक्। तत्र दरदोपत्यं स्त्रीत्यर्थे। एस्त्रीप्रत्ययोत्पत्तेः प्रागे
वाणतश्चेति लुक्। परे त्वत्र स्त्रीभ्य इत्यर्थग्रहणमेव। अत एव पितृष्वसृमातृष्वस्रोर्ण्यां ढकि लोपविधानं संगच्छते। दरत्
इड्विड्पृथुडशिम्भो नाभिधानात् ढगभावः। शिवादिपाठात् बाध्यानितं चेदृष्यंधकेति सूत्रे भाष्ये इत्याहुः। नि रूपितं चे
दं भाष्यप्रदीपोद्योतेषु। वा ग्रहणनिवृत्तये पुनर्ढग्ग्रहणं। शिवादित्वादिति। तत्र सपत्नीति पाठे पि लिंगविशिष्टपरिभाषया
सपत्नीशब्दादपि बाध्यसामान्यचिंतया पाठकं बाधित्वा एव इति बोध्यं। तस्येदमितीति। शिवादिपाठादिषु त्वितं। तस्याकृ
तिगणत्वात्। इतश्च। अनिञः किं दाक्षायणः। इतः किं दाक्षिः। प्रबाहुल्यस्य उत्तरपदस्येत्यधिकारः। अर्द्धसिरिभाषा

ल०शा०श्री०भू०
२०६

206

पिप्राह्लणो न सिध्येत् । अनितितुल नमपूर्व इति लिखितमत आह । योगविभाग इति । प्रकृतिभावनिषेधाद्विलोपः निपात
नस्यासाधारणं प्रयोजनं वक्ष्ये तत आह । अजपस इति । प्राह्लो नारद इत्यादावपसे न मपूर्व इति प्रकृतिभावनिषेधाद्विलो
पः एवं चात्र निपातनसामर्थ्यादपस इति न संबध्यते । अजातादिति । असमर्थसमासः अत्र मंडूकप्लुत्यापस इति संब
ध्यते तदाह । अपसे जातावेति । जातौ किं । प्राह्लो नारदः । औदूा इति । ननु प्रकृतिभावादल्लोपोपि न स्यादत आह । अ
पूर्वेति । तादृशे तद्ग्रहणे उपसंख्यानमिस्मरः । तान्दाणे । कारितद्वाणो लोपः । ह्रात्वात्रघ इति । स्वरूपग्रहणमाख्याना
त । लिंगादिति । अन्यथा प्रत्ययविधौ तदंतविधिनिषेधात्तद्व्यर्थं स्यादिति भावः । आढ्यकुलीन इति । एवं च ईकार उ
दात्तः कुले चाढ्यत्वप्रतीतिः । कुलीनशब्देन समासे तु तदप्रतीतिरिति भावः । बहुकुल्य इति । बहुच्प्रत्ययः । पद्योरव इति ।
तेनाद्विलब्धिरहितमपि । पूर्ववदिति । अन्यतरस्यामित्यनुवृत्त्येति शेषः । शत्रुरिति । अपस इतिकल्पितार्थेनान्वाख्यान
मात्रमिति भावः । सपत्नीशब्दे सहयुद्धाय पततीति विग्रहे पतेर्नप्रत्ययः सहस्य सादेश इत्याहुः । अंगस्येत्यनुवृत्तं पंचम्या
विपरिणम्यते तदाह । अंगादिति । तेनाढ्चषष्ठ्यस्य नात्रठस्य त्वाणं तु नाकारेणोच्चारणार्थे नानिर्देशः वर्णमात्रं स्था
निढगादिप्रत्ययेष्वपि वर्णमात्रं प्रत्ययः उच्चारणार्थो कारः । आदेशस्त्वकारांतः । अत एव वर्णग्रहणपक्षो कर्मठ इत्यत्रदो
षवारणाय ागस्यानिमित्तं षष्ठ्यकार इति भाष्ये व्याख्यातं । यद्यपि संघातग्रहणपक्षो पि भाष्ये उक्तः । अर्घुलात्तिपद्याश्रयणे
नकंठादिषु णादिषुन दोषः माथितिके पि पंचमीसमासे नालोपस्यास्या निवन्द्वावान्न दोषः । संनिपातपरिभाषयापावा ।
कर्मठ इत्यत्रार्थविस्तारिभाषया न दोषः । तथापि लघुत्वाद्वर्णग्रहणपक्ष एव युक्त इति बोध्यं । पुंवद्भावादिति । वृद्धि
निमित्तस्येत्यादि निषेधः सौत्रस्यैव न भस्याढ इत्यस्येति भावः । स च प्रत्ययो लत्तः प्रागेवेत्याह । गार्ग्यशब्दादि रामः
ति । पुंवत्त्वेनार्थस्य निवृत्तावपि भूतपूर्वगत्या स्त्रीवाचकत्वं गृहीत्वात्र एठकौ तद्विवक्षामुपजीव्यैव पुंवत्त्वप्रवृ २०६

स्कः। अत्रि। अत्रिशब्दादितश्चेति ढक्। अन्येभ्य ऋष्यणिति बोध्यं। बहुले इति। तत्कृते न तु स्त्रियामित्यपि बोध्यं। युधि
ष्ठिरा इति। बाह्वादित्वादिञ्। भरतानां प्राच्यत्वादेव सिद्धे पुनरुपादानमन्यत्र प्राच्यग्रहणे भरतानामग्रहणार्थं ते
नेमः प्राचामिति लुक् भरतयूनो न गर्गयौधिष्ठिरिः पिता यौधिष्ठिरायणः पुत्र इति। अत्र तर्ग्गण इति। गोपवनादय अवि
दादौ प्राक्हरितात् द्रौ ध्याः। इदमत्र वर्भाष्ये स्पष्टं गर्गभार्गविकेति समुदायोऽत्र पठ्यते इति तद्राजस्येति सूत्रभाष्ये गोत्रे
लुगचीति सूत्रभाष्ये च ध्वनितं तत्फलं तद्राजस्येति सूत्रे निरूपयिष्यामः। तिककि। अत्र द्वन्द्वोत्तरपदयोरुभयत्रापि लु
गविशेषात्। उपकादिभ्योऽद्वंद्वे इत्यस्य द्वंद्व इति नानुवर्त्तते इत्यर्थस्तदाह। द्वंद्वे चाद्वंद्वे चेति। आष्टकिकापिष्ठल
य इति इदं भाष्ये स्पष्टं। एतेन आष्टककापिष्ठलो पितिककितवादिषु पठ्यत इति वृत्त्युक्तमपास्तम्। आगस्त्य। अग
स्त्यशब्दादृष्यण् इति सूर्यतिष्येति सूत्रे कैयटे स्पष्टं। अगस्तिप्रकृतिकगर्गादियञं ते तु यञञोश्चेति लुका सिद्धं। कुं
डिनपर्यायं तं कुंडिन्शब्दात्तस्य भार्येत्यर्थे ङीपि निष्पन्नात् कुंडिनीशब्दाद्गर्गादियञि भस्याढे इति पुंवत्त्वे प्राप्ते तए
व निपातनात्पुंवत्त्वाभाव इति भस्याढे इत्यत्र भाष्ये स्पष्टं। एतेन कुंडिनप्रकृतिकगर्गादियञंतस्याप्यत्र ग्रहणमित्यपा
स्तं। कुंडिनी त्वं ब्गर्गादिषु पाठात्ततो यञभावाच्च। लुगिति। तेन अगस्तीनां छात्रा इत्यर्थे विवक्षायां गोत्रे लुगची
ति लुकि प्रतिषिद्धे तत्संनियोगशिष्टादेशनिवृत्तौ कृष्टलान्दृष्टे आगस्तीया इत्यादि वृद्धिकासिद्धिरिति। यच्चा।
प्रकृत्यैकाजित्यतः प्रकृत्येत्यनुवर्त्तते। तत्र नेति वाच्ये प्रकृत्येत्युक्त्यानंतरस्येति न्यायेन वा धित्वाल्लोपो न इति लो
पो विनिवार्यत इत्यर्थः तेति सूत्रे भाष्ये स्पष्टं तदाह। राजन्य इति। शूद्रादाविति। तज्जातीयस्त्रियामित्यर्थः। द्विलो
पो। नस्तद्धिते इति प्राप्तः। अल्लोपस्याप्युपलक्षणमिदं। राज्यपुरोहितादिना घक्संयोगादिश्च इन इति पन
पस इत्यत इनणीति वर्त्तते [illegible] जातो ब्राह्मण इति। निपात्यत इत्यर्थे

त०बो०शे०मू०
२०७

त१

दीनांयदिह कच्छमगोत्रं ततः फिञि सिद्धे आगमार्थमि दमन्येषांमुभयार्थं । उदीच्यामनुवर्त्तते नेह । वेति व्यवस्थितादि
त्यनुवर्त्तत इत्याशयेनाह । वाफिञ्नास्ति च इति प्राचाम । प्राचामिति ष्ठञाप्त्यधिकारात्कालिं राजदंतेः बहुलग्रहणं नेह ।
दाक्षिः । मनोर्जजातौ किं मानवी प्रजा । जनपदशब्दात् जनपदवाचकः सन्यः क्षत्रियवाचक इत्यर्थः । जनपदे तिकिं ।
द्रुह्योर्द्रौह्यवं । अश्रावेव । क्षत्रियसमानेति । क्षत्रियवाचकशब्देन समानो यः शब्दो जनपदवाचकस्ततः षष्ठ्यंताद्रा
जन्यपत्येऽपि सर्वत्र प्रत्यय इत्यर्थः । इदं चात्रैव सूत्रे वार्त्तिकं तत्र प्राचामनुसारेणाह । न्वर्थसंज्ञेति । अपत्यैत्यसास्त्वं नोक्तं ।
किं तु तत्त्वेऽपत्यवाचकत्वे सानस्यात् । आदीनां वसानस्यादी सन्ने । साल्वेयसाल्वावयुलन्नो देश क्षत्रियोभयव
चनोऽत्र प्रकरणोऽसूत्रपाठात् । कच्छेदिती दितिलपरकरणं कुमार्यां कौमारः जनपदक्षत्रियोभयवाच्यम् । उदंवरा
दयइति उदुंवरास्तिलखलामद्रकारयुगंधराः भुलिंगाः शरदंडाश्च साल्वावयव संज्ञिता इति द्व्यग्वघेति सूत्रेमा
आद्युधाजपीगजकं दाश्रपिवोध्याः । वहुष्वर्थेष्विति । वहुत्ववदर्थे ष्वविद्यमानं यत्तद्राजांतं तदवयवप्रत्ययस्य लुगि
त्यर्थः । तेनांगाश्च वांगाश्च कालिंगाश्चेति विग्रहे अंगवंगकलिंगा इत्यादौ लुक् सिद्धेः द्वंद्वे प्रत्येकमन्यसंख्याप्रतिपाद
काविभक्त्यभावेन वहुत्ववत्वेनैव सर्वेषां प्रतीतेः यथाश्रुतद्राजार्थसम्बहुगते वहुत्वे तद्राजस्य लुगि ति न दोषः । तदर्थे इ
ति । तद्राजात मात्रार्थाश्रितमि तियावत् । तेनांग चैत्रमैत्रा इत्यादौ न तत्र चैत्रादावप्यन्वयेन वहुत्वस्य तत्तदर्थ
मात्राश्रितत्वाभावात् । अत एव गार्ग्यकाश्यपगालवानामिति निर्देशस्तत्र गालवन्नचुष्यणं तः । अन्यथा यत्र
गोत्रेति लुक् स्यात् भृगुवत्साग्रायणेष्विति निर्देशात् क्वचिन्नोऽप्यलोपि द्वंद्व विषये तेनैवेत्संग वैकल्पेपि प्रव रामः
परिपंथं । अव्ययीभावे मयूरव्यंसकादित्वात्तत्पुरुषो वा । अत एव निपातनात्पादेशः न्चो भिन्नक्रमस्तदाह । हंति
चेत्पथे इति । माथः । पंथाः । आक्रंदिक आर्तत्राता । प्रातिकण्ठमिति । अव्ययीभावादेवेष्यते । अधर्मो धर्मविरोधिगु
णविशेषजनकं कर्म । प्रतिपथमित्यव्ययीभावः । ऋक्पूरिति समासांतः । कन्नौ लोहितप्रसवो निरुक्तः । समवायान्स । वहु
वचनादर्थनिर्देशोयं तदाह । सामूहिक इति । तस्य धर्म्यं । धर्मोनुवृत्त आचारस्ततो नपेतमित्यर्थः । पण्यं । हट्टे विक्रेय युक्तं
पणप्रसारितं । किसरादि । तालव्यमध्यणाग कन्नौ शलालुके इत्युक्तास्तालुकः । शिल्पं । अभ्यासपूर्वं क्रियासु कौशलं शिल्पं ।
प्रहरणं । आयुधं धानुष्को इत्युसितिकादेश इणः षड् तिवः । प्राक्रिय ईकक्किदीर्घोच्चारणं संध्यर्थं । अस्ति नास्ति । कत्ति वि
के४ षयेस्वविषयमतिलाल्लाणि भ्यांस्मादिभ्यः अयमासमर्थे भ्यः अस्त्यय इत्यर्थः । परलोक इत्यभिमानस्वभावलब्धं द्विष्टश
ब्दोत्रदेवपर्यायोपाख्यानात् । न तु कालवाची पुंल्लिंगः । शीलं स्वभावः तदस्येत्येव । अरूपादिशब्दाः स्वभदाणे ताच्छी
काः । क्रियानंतर्भावे तु न वृत्तिरनभिधानात् । एकान्विक इति । एकमन्यदिति विग्रहे तद्धितार्थ इति समासः । निष्टु
तं नियतं संघातेति । अत एव [illegible] दध्यात् । तद्विग्रो दनं कद्विवार

वोधकत्वाभावेन तेष्वनुपस्थितेः। नभ्योन्द्वा इत्यादि। अत्र हितार्थे यत्। नभ्यं चक्रमिति। तु नाभिरिवेत्यर्थे शाखादित्वात् यः
साधु। सद्धिद्दश्चाऽवयवो नाभिस्तस्य यथा न्नास्यं काष्ठविशेषं धारयति परितस्तेऽञ्जनाद्यपेक्षते तथा चक्रमयीति
सादृश्यं। एवं नभ्यार्थो कृतोऽपि नभ्य एव तादर्थ्ये तान्तच्छन्द न्यायेनेतिस्पष्टं भाष्ये। वा च दीर्घत्वमिति। चेन प्रकृतिभावः
समुच्चीयते तेन दीर्घे तदभावयो पि लोपेन। हविष्यमिति। हविः शब्दो गवादिर्विभाषा हविरित्यत्र तु हविर्दिं शेष
वाचकानामेव ग्रहणं। नस्ये पद्दन्नेतिनसः। प्रभृतिग्रहणस्य प्रकारार्थत्वात् भाष्ये तु नासिकाया यत्तस् क्षुद्रेषु नासि
ति पठितं। ये च तत्। शीर्षन्छन्दसीत्यतः शीर्षन्नितिवर्त्तते। शीर्षण्ये ये चेति प्रकृतिभावः। ऋषयव। ऋषशब्दोत्राका
रान्तो व्याख्यानान्नतु नान्तः। ब्रह्मन् शब्देन वक्ष्महितमिति वाक्यमेव एवं ब्रह्मन् पर्याय ब्राह्मणशब्देन ब्राह्मणेभ्यो
हितमिति वाक्यमेव न तु प्रत्यय इति स्पष्टं भाष्ये। आत्मन्वि। उत्तरपद ग्रहणं भोगे नैव संबध्नातीन्येन व्याख्यानात्।
भोग शब्दः शरीरवाच्यत्राहि रिवभोगैः पर्येति इति दर्शनात् इति स्पष्टं भाष्ये। कर्मधारयादेवेति। पंचजनसर्वं ज
नेभ्यो वमे व रथकार पंचमेषु चतुर्षु वर्णेषु प्रत्येकं पंचजनशब्दस्य रूढिः मातृभोगीण पथ्या एवं तथा व्याख्यान्भ्या मि
सत्र निरूपितं। सर्वपु। यथासंख्यमत्र। पुरुषाद्वधे तिवधादिषु त्रिषु सामर्थ्यात् षष्ठी समर्थे विभक्तिः कृते तु तेनेति
निर्दिष्टैव। अग्निप्राप्ते इति। पादिकमयं टोषु पल द्राणहिते तु पुरुषाच्छ एवेति वोध्यं। तदर्थं वि। विकृति
वाचकादिति। नन्वास्य न प्रथमत्वं प्रकृता विसर्थसमर्थ कापेक्षयात लसत्वात्। तस्मादित्यनुवृत्तेराह। चतुर्थ्यी
तादित्ति। तदर्थमिति। सप्तम्याः स्थाने प्रथमा सामान्येन पुंस कंतदाह। तदर्थायामिति प्रकृति विकृतिशब्दावुपादानकार रामः
णत्कार्यपरौ परस्परं समभिव्याहारात्। तदर्थग्रहणं स्पष्टार्थं। शंकमेड गवादीतियत्। वालेया इति वल्प वस्था २२२

षष्ठीनिषेधाद्द्वितीया तृजंतत्वेहि षष्ठी स्यादिति भावः। सर्वस्यापि स्वेच्छानुसारित्वेन सामर्थ्यं लभ्यमर्थमाह। परेच्छा
नुसारीति। पदमस्मिन्। निर्देशादेवात्र प्रथमा समर्थविभक्तिः। आवहि उत्साटनयोग्यं। उद्वहं पतिनाशं। निर्देशा
देव तृतीयासमर्थविभक्तिः संज्ञायामित्यनुवृत्तेर्दिगण्यादौन। नौवयो। मूलशब्दयोर्नैः कश्चेषोयत्तद्भ्यइति
वन्मूलांतमूलादिद्वंद्वयोः पुनर्द्वंद्व इत्यन्ये। नावातार्यमिति। प्राक्क्रीतार्थेऽत्र हलोऽयत्। करणे तृतीयातस्य स्वातंत्र्यविव
क्षायां कर्त्तरि वा। वय सातुल्यो मित्रएव वयस्यः। धर्म्यं। धर्मफलं। वध्यो वधार्हः दंडादिभ्य इत्यर्हार्थे यत्। मूलेनेति।
कर्त्तरि तृतीया। सीता। कृष्टक्षेत्रसमीकरणार्थः काष्ठविशेषो मई इति मध्यदेशप्रसिद्धः। समितामिति। संपूर्वा
दिणः क्तः। धर्मादनपेतं। यदनुष्ठानं धर्ममनुवर्त्तत एवं तदित्यर्थः। निर्देशादेव पंचमीसमर्थविभक्तिः। द्वंद्वसो।
निर्माणेच्छायाः करणत्वेन तृतीयांतात्प्रत्ययः। प्रेम्ण इति संज्ञाधिकारबललब्धं प्रीणातीति प्रियः। भावः साधनं
चेति। ल्युट् उभयोर्विधानादिति भावः। प्रतिजनमिति। जनं जनं प्रतीति विग्रहः। भक्ता इति। भक्तोऽन्नं तत्र साधवः
स्त्रिफलीकृता इत्यर्थः। योगविभागादिति। सर्ववेदपारं वदहीदं शास्त्रमिति भाष्यप्रयोगादिति भावः। एतस्यानु
वृत्तेरुभयोर्विधानमित्यन्ये। समानतीर्थाधिकरणकवासकर्त्तर्यर्थे प्रत्यय इत्यर्थे प्रथमोच्चारितसमा
नतीर्थशब्दस्य प्रकृतित्वं वासी तस्य प्रत्ययार्थत्वं यादिप्रत्ययविवक्षायां पूर्वमेव तीर्थे ये इति सादेशेऽप्ये
कदेशविकृतन्यायेन समानतीर्थशब्दात्प्रत्ययः पूर्वापरप्रथमेति तत्पुरुषः समानोदर्ये एवं। समाप्ता
भ्रातुर्व्यादिकाः॥ ॥ ५८ ॥ प्राक्क्रीता। अर्थस्यैव व्याख्यानतोऽवधित्वमिति। अर्थबोधकेष्वेवास्यापश्यि
तिरिति न प्राग्वतेष्ठञित्यत्र प्राक्शब्दयतो पूर्णेऽवधिरित्युक्तमित्यपास्तं। तदग्रेमाणांशास्त्राणामर्थ

कमित्यत्रापरिमाणत्वात्सूत्रप्राप्तकोनिषेधार्थं इति वाच्यम्। एतद्भाष्यप्रामाण्येन तत्र परिमाणग्रहणे ५

त० प्रा० शे० सू० २२३ तिन तत्र तदधिकारप्रयोजनमिति तदाशयः यद्यपि कालोपि परिच्छेदकत्वात्पितस्यनेह ग्रहणं परिमाणं तेन सिद्धे संख्यायाः संवत्सरसंख्यस्य चेति संवत्सरग्रहणेन परिमाणग्रहणे कालाग्रहणज्ञापनात्। नन्वेवं ज्ञापकव्याख्यायां संवत्सरग्रहणं। ज्ञापकपरभाष्यप्रामाण्येन तादृशसंज्ञायाः अभावकल्पनात्। एतेन संवत्सरस्य चेति संख्याया एवेति नियमार्थं तदित्यपास्तं। भाष्यप्रामाण्येन नियमव्यावर्त्यप्रयोगानभिधानेन ज्ञापकत्वस्यैवांगीकारादिति दिक्। ज्ञापकमिति। न च परमते सिद्धे नो ज्ञानस्यापि ग्रहणं तु। ध्वनितं चेदं निष्कस्य परिमाणत्वाच्चिलात्सूत्रे ग्रामाप्तो नेन द्विधा नञ्इति वदता कैयटेन परण पादात्ययि तु ज्ञानरूपमेवात्र गृह्यते। ज्ञापिते तु तत्संभावनामात्रेण तच्चारितार्थं तत्फलितमाह। इसत प्राग् इति। प्रत्यासत्त्या पांचमिके ष्वेवेदं तदाह। सुगमित्यादि। अन्यथा प्रत्ययविधित्वात्तन्निषेधः स्यात्।

ध्वदे इदमुपलक्षणं व्यपदेशिवदित्यस्यापि तेन गम् सिद्धिः व्यपदेशिवद्भावनिषेधस्य सूत्रे गृहीतांतादिशब्द विषयव्यपदेश कत्वाच्च। प्रतिषेध्यसमर्पकगोपुच्छादिष्वतदंतविधि व्यपदेशिवद्भावोस्त्येव तन्निषेधस्य प्रत्ययविधिविषयव्भावो त्वात्। अंत्यनिषेधस्योक्तयुक्त्याप्यप्रवृत्तिर्बोध्या। इत ऊर्ध्वं त्विति। वाचनिकमेवेदं। असमासे इति सूत्रादूर्ध्वंमा प्रातिपदि हीयेनाहीं येचेत्यर्थस्तदाह। प्राग्वतेरिति। तन्न्यालुकीति। लुगंतायाः प्रकृतेर्नेत्यर्थः। क्रीतं द्विशूर्पमिति। नताव केनेति १ देशात्लुगंता प्रकृतिरिति संख्यारूपपदाच्चयीदग्नन्यतरस्यामित्यनेन ष्ठोवा ध्यर्द्धे तिलुक्। अर्द्धीयजंगलधेत्विति सूत्रे विभाषितग्रहणस्योत्तरपदसंबद्धत्वाल्लुनर्वा ग्रहणं। तपरः किमिति। दीर्घस्य वृद्धिनिषेधे फलाभावात्प्रश्नः। निषेधो न स्यादिति। पूर्वपदस्य वृध्यभावपक्षे वृद्धिं प्रति फलोहितनिमित्तत्वाभावादिति भावः। तस्य रामः वृद्धिपक्षे लतामादायैव निषेधः सिध्यतीति बोध्यं। शताच्च। उत्तरसूत्रप्राप्तकनोपवादोयं अशत इति २२३

यांपोलोहिलादिगुणस्तद्दुहितावालेयाइत्युच्यंते प्रकृतिविकृतिभावोत्र यथाकथंचित्। आर्षभ्यइत्यत्राप्येवं योवत्
सतरूषभावस्थाप्राप्त्यर्थे योग्य तेसएवमुच्यते। पूर्वविप्रतिषेधेनेति। अत्र पेट्टाये त्ति शेषः। तदस्यतः। तदर्थं विकृते
रित्यादिनिक त्रामितिकैयटः। लौकिकीमिति लोकोत्र न प्रयोक्तास्मदादिस्तेनम दुह्यदोएतस्यापभ्रंशप्रयोगस्यैवकरण
त्। तस्माच्छिष्टोलोकोत्रलोकशब्देन लौकिकीविवक्षायत्र प्रायस्य संप्रत्ययः प्रायइतिलोकोव्यपदिश्यते इति भाष्या
र्तलोकः शिष्टोलोकइत्ति तदर्थः प्रायस्यसमग्र[illegible]क ल्पस्येति कैयटस्यापिसमग्रशब्दार्थविषयेसमर्थस्येत्यर्थः
ताहृशस्यशिष्टलोकएवेतिबोध्यं। प्रासादोदेवदत्तस्येति इहशेषे प्रासादीयोदेवदत्तइतिप्रयोगोलोकेनदृश्यतइ
तिभावः प्राग्वते। अत्र वतिशब्देनतदर्थोलक्ष्यते तेनार्थे बोधके च वासो प्यस्यानतेनापवादविषयेन। आर्हा
द। अत्राहतीति तिङंतैकदेशशब्दानुकरणं व्याख्यानात्। आङः अभिव्याप्तौ तदाह तदर्हतीत्येतदभिव्याप्येति। यद्यपिऊर्ध्व
मानंकिलोन्मानंपरिमाणंतुसर्वतः। आयामस्तुप्रमाणंस्यात्संख्याबाह्यातुसर्वतः। ऊर्ध्वंयन्मीयतेतदुन्मानंसर्वतोमा
नमितिचातःपरिमाणंआयामविवक्षायांप्रमाणमित्येतद्भवति संख्यासर्वतोबाह्याभेदमात्रंब्रवीत्येषाने धामानंकुतश्च
नेतिभेदोत्रवेलक्षण्यमितिकैयटस्तथाप्यत्रपरिमाणशब्देनोन्मानमपीत्यसमासइतिसूत्रस्थभाष्यस्वरसः प्रमाणंतु
नगृह्यंतेमानाभावात्। सप्तदशसूत्रमनुवर्ततइति संबध्यतइत्यर्थः। एतेनषोडशसूत्राणामेवानुवृत्तिविषयत्वमि
त्यपास्तं। परिमाणांत। इहपरिमाणशब्देन परिच्छेदकमात्रंशाणपर्युदासात् यद्यप्युत्तरपदस्येतिसूत्रभाष्येतदधिका
रस्यात्रसूत्रेप्रयोजनाभावप्रतिपादनायपरिमाणांतस्येत्यत्र संख्यायाइत्यनुवृत्तिकतोतथापितदनुवृत्त्यैवाव्यभि
देनव्याख्येयं तेनपरिमाणंतस्येत्यस्यासंख्यापूर्वेपदे [illegible] अत एवात्र परमतेनैवोक्तं [illegible] मि तिभाष्योदा
हृतं संगच्छते संख्यायाइत्येतत् [illegible] पुत्तरपदे ए वत्रवृत्तिरि

कन्न्रस्यये केणइति ह्रस्वेन च सिद्धे इकारोच्चारणसामर्थ्येन लोपबाध पूर्वकं सवर्णदीर्घकल्पने गौरवात्। खारीश
ब्दस्य स्वपर्याय पुंलिंगत्वात् घा द्युक्तातिकत्वे पुंवत्वेनेष्टासिद्धेश्च। पणपादः। पणादिसाहचर्याद् माषादशब्दः परि
च्छेदकवाच्यत्र। त्रयोदशेति ठञ्‌ १ ढकौ २ ठन्यतौ ४ कन् ५ ड्वुनटि ठनः ७ प्रञ्‌ ८ ञात मा नाद्यण। खईकनौ ११
पणदियत्‌ १२ द्वित्रीति वा ण्तौ कोलाणच्चे १३ सर्वं त्रयोदश सर्वः। अनुवर्तते न तु नान्य तमिति भावः। तेन क्री
तं। क्रयोनामद्रव्यनोदानपूर्वकं वस्त्वंतरग्रहणं। तेनेसनेन च प्रत्यासत्त्याक्रयघटकं द्रव्यमेव गृह्यते। सोस्यां
शवस्नेसनेन तु न सिद्धिः यस्य घातम् ल्पं न भवति प्रपञ्चका र्यवशात्तेनक्रीतं तत्र तस्याप्राप्ते। धन पतिसंयो
ग इति। संयुज्यंते येन पुरुषाः फलेन स संयोगः। अत एव संयोगो नामेदं कर्मेदम् वाप्यत इति भाष्यं। करणत्वे तु
त्पातयागादेरेव संयोग इति कैयट प्रसंग छ्यते। गोद्व्यचो ठकोपवादः। तस्येश्वरः। तस्येत्यनुवर्तमाने तस्यग्र
हणं। निमित्तमित्यस्यानिवृत्त्यर्थं। पात्रिकी ति। विवा ङीषू। तदस्मिन्। प्रत्येकमिति। एकैक कर्मकदाना
कोड ११ धिकरणेपि प्रयोगस्येष्टत्वाद्वृत्तु सौत्र त्वात् साधुरिति भावः। आयादिसाहचर्यात् संज्ञाच्छेर गृहणं उपदेतिटा
वंतं। रक्षानिर्वेश इति। रक्षानिमित्तभूतिरूप इत्यर्थः। उक्तो च इति। उपहार इत्यन्ये। रूपकस्येति। रूप्यकार्षापण
स्येत्यर्थः। अत्रमानं त्विंसं। असामर्थ्यं तु नित्य सापेक्षत्वात् द्वारपि तु शक्यं। अर्ह्द्धिमित्युक्ते कस्येति जिज्ञासायां रूपक
स्ये त्युत्तर मत एवसंगच्छते। भारभू तो भ्य इति। वंशादिशब्दानां भारभूतत्वं तद्भारभूतार्थाभिधायित्वाद्बोध्यं। सोत्र मेकव
चनं प्रत्राद्यं व्याख्यानमेव युक्तं। द्वाढकिकीति। न द्वाभ्यामिति सप्ता नंतरस्येति न्यायेन परिमाणांतस्येति वृद्धिर्निषे
धकत्वाभावादत्रैर्न। लुगभावे इति। अन्यतरस्यां ग्रहणमनुवर्तत इति व्याख्यानुरोधेन द। वस्तुतस्तु दत्र नानु राम: २२५

नञ्कृते विशेषणमसंभवात् । किं तु प्रत्ययार्थस्य तत्रापि यत्र प्रकृत्यर्थगतसंख्यैव प्रत्ययार्थत्वं तत्रैव निषेध
इष्यते तदाह । इहेति । तेन शतेन क्रीतं शत्यं शाटकशतमित्यादौ न निषेधः वस्तुत इति । अभेद एव पारमार्थिको भेद
स्तु काल्पनिक एवेति भावः । द्विशतेनेति । द्विगुराद्यस्तेनेत्यर्थः । तेन द्विगुत्वाभावात् कनो न लुक् । द्वाभ्यां शताभ्यां क्रीतमित्य
र्थे कलुगंतद्विशतशब्दात्त्वं । लुकीति तदंतविधिनिषेधार्थमपिरेवनेति बोध्यं । संख्याया अतेति सूत्रे द्वंद्वग्रहणं बहुव्रीहिग
र्भो निगंतपुरुषः । अंतग्रहणमेकसप्तप्राक्रीतमित्यत्र निषेधार्थं । अन्यथा प्रत्ययग्रहणपरिभाषया न स्यात् इति हरदत्तः ।
वतोरिः । अत्रेटं न प्रसज्जो व्याख्यानात् । योगविभाग इत्ति । अन्यथा त्रिंशतः शतत्वादिदशशब्दस्य विंशादेशस्तिः प्रत्यय
इति पदे विंशते स्यांतत्वान्न स्यादिति भावः । विंशकेति । विंशतेडिंतीति तिलोपे पररूपं त्रिंशकेटेरिति टिलोपः । अद्विपौइ
ति । असमभागवदपेद्वलेपि नित्यसापेक्षत्वान्नासामर्थ्यं । अध्यर्द्धपू । द्विगुसाहचर्यादध्यर्द्धपूर्वोप्यत्र समानाधिक
रणसमास एव गृह्यते । संख्यासंज्ञासूत्रे भाष्येध्यर्द्धपूर्वाद्द्विगोरिति पाठो दृश्यते । द्विगोश्च परस्येति । तन्निमित्तस्ये
ति शेषः । समाहारद्विगो द्विशूर्पी क्रीतमित्यर्थे खनभिधानात्तस्य परत्वं नेति बोध्यं । असंज्ञायामिति । द्विगुविशेषणं
पंचक लापाः परिमाणमस्य पंचकलापकं तद्धितलुगियं कस्यचित्संज्ञा ततः उत्पन्नस्य न लुक् । तस्य द्विगुनिमित्त
त्वाभावात् लुको प्राप्त्या भाष्ये प्रत्याख्यातमिदं । विभाषाका । कार्षापणं तद्द्विगोरध्यर्द्धपूर्वाच्चेत्यर्थः । अध्यर्द्धप्रतिकमिति ।
आदेशस्य प्रत्ययसंनियोगशिष्टत्वान्न तस्यादौ प्रत्ययलुगिति भावः । द्वित्रिपूर्वग्रहणं स्पष्टार्थं । अतएव द्वैवि
ध्यामिति यदुच्यते तद्वै योऽपमिति भाष्येऽनूदितं । द्विनिष्कमिति । कोलुक् । बहुत्वादिति । इदं वित्तान्चेतिसूत्रे
पि बोध्यामिति भाष्ये स्पष्टं । द्विशतिका [illegible] रवार्याइ । दीर्घोच्चारणं स्पष्टार्थं ।

हः समुदाय इत्यनर्थान्तरमिति पंक्त्यादिसूत्रभाष्यात्समूहमात्रं संघः परं तु तत्स्वबहुसमुदाये प्रसिद्धः पदद्वयात्मके केण इत्या
दौष्ठिकं सूत्रमित्यस्य सिद्धप्रेत इत्याहुः। पञ्चकमध्ययनमिति। पञ्चाक्षरं पः परिमाणमस्येति सर्पः। स्तोमे डः। मन्त्रसमूहे स्तोम
शब्दः शास्त्रकैयटः समूहे मन्त्रे प्रयोगस्तु लक्षणयेति। तदाशयः मन्त्रसमूहः प्रत्ययार्थः स्तुतिः स्तोम इत्यत्र स्तुति पदं स्तुतिक
रणमन्त्रसमूहपरं। पंक्तिविंश। अत्र विंशत्याद्याः संख्यायां संख्येये च उभयत्रापि एकवचनान्ताः। तेन विंशतिर्गवामित्यादि सि
द्धं तत्र नवत्यन्ताः स्त्रियां सहस्रादिवदेकद्व्यादिवच्चैमान्यप्यनुसन्धानीति वार्त्तिककृतः। एषां प्रदर्शनं तूदाहरणमात्रं।
पंचदश। डत्यन्तौ निपात्येते तदस्य परिमाणमित्यर्थे। त्रिंशच्च। आम्नात तदस्य परिमाणमित्यर्थे डण्प्रत्ययो भवति ब्राह्मणेऽभि
धेये समुदायेन चेत्प्रत्ययस्य ब्राह्मणस्य सञ्ज्ञा गम्यत इत्यर्थः। तदर्थमिति उपलक्षणमिदं क्रियामात्रस्य। तेनोपवासं कर्तुं यो
ग्यो भवतीत्यर्थे औपवासिकादि सिध्यति। नित्यमाक्षीणमिति। एतच्छब्दानुरोधेन वाक्यसदर्शनात् नित्यग्रहणमनर्थ
कमिति भाष्योक्तस्तदर्थत्वानौचित्यं दण्डादिभ्यो यदिति दण्डादिभ्यो यद् इति त्वपपाठः। पात्रात्। अत्र नित्यप्रत्ययः। कडंकर। कडमि
ति मदमित्यर्थकं। कडंकरं बुसं। तत्कर्महेतीति। यद्यपि यज्ञर्त्विक् शब्दयोस्तत्कर्मणि लक्षणया सिध्यति। तथाप्यत्र प्रकर
णे मुख्यार्थेभ्य एव प्रत्यय इति ज्ञापनार्थमिदं। पारायणमिति। यद्यपि तत्तुरायणशिष्याभ्यां निर्वर्त्तितेति तथापि [illegible] इष्यते ऽ
भिधानस्वभावात् तदाह। छात्र इति। एवं तौरायणिको यजमान एव न तु ऋत्विगिति बोध्यं। चान्द्रायणं तपोविशेषः। संश
यमापन्न इति। संशयशब्दस्तद्विषयत्वे लाक्षणिकः। आपन्न इति कर्त्तरि क्तः। ततो गमनमिति पंचम्यन्तात्तसिल्। पंथ्योण। पंथः
पंथादेशो णप्रत्ययः। प्र णि तिपाठस्तु छेदादिभ्य इति सूत्रस्थभाष्यासम्मतः नित्यं गच्छतीति वृत्त्यनुसारेण। भाष्ये नित्य
ग्रहणप्रत्याख्यानात्। कालात्। कालग्रहणं यथा कथंचिदपि कालबोधकस्य ग्रहणमिति। तदस्य परिमाणमिति सूत्रे

वर्त्तते।पुनःखग्रहणात्।लुक् ठञ् एव।खष्ठनोस्तु न लुक् सहविधाने द्वंद्वैकविधेयभावासंभावात्।द्वंद्वेन चेन न च
सहविधानस्यस्फुटत्वात्।अतएवभाष्येष्ठनेनाप्यनुक्षस्यलोपस्तस्यामित्यस्यानुवृत्तिं स्वीकृत्य लुक् खौ
चेतिप्रत्याख्यातं।तेनद्वैकुलिजिकीतिचिंत्यमेव।तदस्य परिमाणं।अनन्तरेण योगविभागो भाष्येध्वनितः।अत्र परि
माणशब्देन परिच्छेदकमात्रं तेनोत्तरसंख्यायाअनेन विशेषणासंगच्छते।तेन षष्टि जीवित परिमाणमस्य षा
ष्टिक इतिसिद्धं।द्विषष्ट्यादिप्रत्ययेनानभिधानान्न प्रत्ययः किंतु द्वे षष्टी भृतः इत्यर्थे तमधीष्टो भृत इत्यनेन
तस्य च न लुक् अनार्हीयत्वात्।कालाद्वित्यधिकारेपि यथाकथंचित्कालवाचकानां तत्र ग्रहणान्न दोषः।एवमग्नी
यादिभ्यो नभिधानान्न प्रत्ययः [illegible] स्पष्टं चेदं सर्वमत्र भाष्येषाष्टे इति वर्त्तमाने पुनस्तदस्येति तस्य प्रायं।तस्माण्णी
दार्हीयत्वनिवृत्त्या द्विषाष्टिक इत्यादौ लुगिति तू भाष्यविरोधादनादेयं।कालवाचित्ते नैव तदस्यत्वेनार्हीय
त्वनिवृत्तेरशक्यत्वाच्चेति दिक्।संख्यायाः संज्ञा।अत्र तदंतविधिः।ठ [illegible] न्विधौ संख्यायाः प्रयोजनमिति येन विधि
रितिसूत्रे वार्त्तिकात्।ठन्विधावेकेसंख्याया इतिपदच्छेदे सूत्रे तदंतविधिरिति तदर्थः।तेनद्वे षष्टी परिमाण
मस्य सूत्रस्य संघस्य वा [illegible] द्विषाष्टि तत्परिमाणमस्याध्ययनस्य तद् द्विषाष्टि [illegible] कमिति सिद्धं।अत्र द्वितीयस्य
न लुक् द्विगुनिमित्तलाभावात्।पूर्वं सूत्रमिति।तेन पंचगणावोस्य धनमित्यादौ न।ननु पंचादीनां संख्येयवृत्तित्वात्
परिच्छेदकत्वाभावः।पंचसंख्या कप्रस्थादिपरिमाणके तु नेष्यत इत्यत आह।तत्संज्ञायामिति।यद्वेति।वृत्तिविषये
तन्मात्रवृत्तित्वमितिभावः।संघे चेति पंचकः।पंच परिमाणमस्य संघस्येत्यर्थः।प्राणिसमूह इति।परेतु संघः समू

र्यस्त॰ दाहार्थी ष्टोभ्तो वेति । भूतो वेत्यपाठः । तत्र भविष्यत्वस्य कथमप्यनवगतेः । द्विनार्षिको मनुष्य इति । च्चि॰ तवती
त्यस्यारंभसामर्थ्यादेव नित्यत्वे सिद्धे पुनर्नित्यग्रहणं भूतकालेऽप्येवं नित्यं लुक् । तन्नैवाभिधानाच्चेति नात्र लुगिति
हरदत्तः । परे तु नित्यग्रहणेन वाच्यवृत्तौ कार्यालाभस्तस्मात् अध्येषण्भरणयोरोतन विषयकत्वेन तत्र लुको नि
त्यतयाऽविदाहित्वस्य प्रत्याभावेन तत्र कृद्विधाप्तिरेव न नित्यग्रहणं तु वेत्यस्यानिवृत्तये स्पष्टार्थमेवम् । तत्तु कस्य
रोधेनेत्याहुः । परिमाणं तस्य । व्याख्यातमिदं । अत्रापि कृत्यादि लिखनं तु प्रमादात् । केचित्पठंतीति । अत्रा रा चिवीजं लु
छु६ लिजा छुक् रवोचेत्यत्र दर्शितं । षष्ठिकाः । शालिविशेषा एवायं साधुर्न मुद्गेषु । एकवचनांतप्रयोगदर्शनादाह । बहुवच
नमिति । परिजप्य इत्यस्य विवरणं जेतुं शक्य इति । अप्सेत्सर्ये इति ब्रह्मचर्ये चेत्तत्कालपरिच्छेद्यमित्यपि बोध्यं । यद्वे
226 ति अत्रपदे ब्रह्मचर्ये चे द्विगोश्चेत्यर्थः । मासो सेति । अत्र मासस्य प्राधान्यात्प्रथमा । अत्यंतसंयोगे द्वितीया तु वि
शेषणादेवेतिभावः । भाष्ये तु । यद्वेति पक्षः पातस्यैव मासिको ब्रह्मचारीति तु आद्यजंतं बोध्यं । महानाम्न्यो नामेत्ति ।
अनेन रूढतया भाषितपुस्तकत्वाभावात्तु वर्त्तनेति स्वचयति । अत एव भाष्ये महानाम्निकमित्युदाहृतं । भाष्ये तु तद
स्य ब्रह्मचर्यमिति महानाम्न्यादिभ्य उपसंख्यानं महानाम्नीनां ब्रह्मचर्यं महानाम्निकमित्युक्तं महानाम्निक इति तु महा
नाम्नी सहचरितव्रतपरा महानाम्नीशब्दात्तच्चरतीत्युपसंख्यानमितिवचनेन साधितं । तस्य दक्षिणा । यज्ञाख्ये
भ्यः । षष्ठ्यंतेभ्यो दक्षिणेत्यर्थे ठञित्यर्थः । अ॰ कालादपीति परे तु यज्ञग्रहणादेवात्र कालादित्यस्यासंबंधः । नहि
द्वादशाहसाध्ययज्ञवाची सशब्दः कालशब्दः । अत एव भाष्ये आख्याग्रहणात्प्रसिद्धमग्निष्टोमादेः अप्रसिद्धं पंचौद रामः
नादिकं पाकयज्ञादिकं च ये आचक्षते तेभ्यः सर्वेभ्यः प्रत्यय इत्यर्थकमुक्तं । तत्र च दी । कालवाचिभ्योदीयते कार्यमि २२६

भाष्येस्यच्छमतिप्रसंगस्त्वनभिधानान्न।आह्निकमिति।अह्नष्खोरेवेति नियमाट्टिलोपः।तादृश एवेति।स्वसत्तया
व्याप्यमानकालइत्यर्थः।तमधीष्टइत्यस्य संतसंयोगे द्वितीयामुहूर्त्तं मध्ये मध्ये पितत्फलीभूताध्यपनक्रियाव्याप्तेत द्वाप्तलो
प चीरात्।यावत्कालमध्येयणामरणे क्रियेते तावत्ततः प्रत्ययोनेष्यते।भृतमादि द्विनोरुभयोरुपादानसामर्थ्यात्कालान्तर्भा
वो बोध्यः।मासादि निर्वृत्तादीनां पंचानामधिकारेपिभृतइत्येवसंबध्यते नह्यर्थांतरे प्रत्ययेतदंते नवयोगम्यते त
दाह।मासंभृतइति।यवपीति।अवयसीतिसूत्रभाष्यात्तु अत्रापि यपोननुवृत्तिरेवलभ्यते एवं हि तत्रभाष्यं।अवयासि
ठं अत्रेसनंतरस्य एपतोनुकर्षः।तद्धेयं विज्ञानीयात् ययव्यनुवर्त्ततइति ययव्यनुवर्त्तते इत्यस्यपूर्वसूत्रे इतिशेषः।
अनंतरस्येत्युक्त्यातस्यानंतरत्वेसूचितं तच्च पूर्वसूत्रेननुवृत्तावेवभवतीतिबोध्यं।व्यवहितस्यापि क्वचिदनुवृत्ति
२।८ दृष्टा यथाद्विती पादौ स्वेनइत्यत्रैतदङ्वेदमएवमिहापिकश्चिद्व्यभेदिसर्पइतिवदत्ता कैयटेन दृष्टांतेन व्यवहि
तस्यापीत्युक्त्याच पूर्वसूत्रेतदसंबंध एवोक्तो भृतंतु व्यस्यनुसारीतिदिक्।पाएपदिति।अवयसिवनिसूत्रद्वयंतु
त्पंसमा नक्तंशब्दगौरवादपियोगविभागस्यगौरीयस्त्वात्।पंचस्वर्यौ द्विति।यथायोगमितिशेषः।द्व्यहीनइति।तद्धिता
हार द्विगो र्थे द्विगौतु नखः समासांतेकृतेहून्शब्दांत द्विगोरभावात्।संख्यायाः सं।संख्यायाः परस्य संवत्सरसंख्याशब्दस्येत्य
५ र्थः।द्वैवर्षिकीति।वर्षीशब्दोत्रतत्संख्याके ऽहरादिरूपेकालेवर्त्तते।तः कालादिस्वधिकारस्यभृतार्थप्रत्ययः संवत्स
रग्रहणमिति संख्यायास्तु न परिमाणग्रहणे नास्ततिगमकेग्रहणं संख्यावाच्यानुवर्तत इत्युक्तेरितिभावः।वाचलुगि
ति।वाक्यभेदेनतयोरेवेत्यर्थः।द्वैवर्षिकइति।अस्यव्याधिरिति विशेष्यं तेनननिसोलुक्।प्रतिषेधो नेति।भवि
ष्यदर्थकप्रत्ययभिन्ने निदादावित्यर्थः इत्यदाह ... तीया द्विपदांतरसमभिव्याहारे ऽस्य

ल॰ ल॰ श्या॰ श्रौ॰ सू॰ २२७ २

ष्ठ्यर्थकतिङन्तार्थानामुपमानत्वमेव न न वैतिङन्तेनोपमानमस्तीति सन्सूत्रस्य भाष्यात् उपमेयत्वं तस्यैव छाद्यं तानां
क्रियान्वयनियमेन तुल्यशब्दार्थेनान्वय एव। अत एव मूकस्य विशेषणत्वेऽकर्तृत्वादासमर्थ्यं नाम क्रियास्यादिषु
क्रमाभावे यथार्थस्यात्तिङन्तादिवाच्यत्वे क्रियाक्तवतान्ष्ठ्यन्तसप्तमीत्यस्य ष्ठ्यन्तो पिक्रियेत्याश्रयिष्यत इति कल्पनेगौरवं न्यसव
क्रमनमिसादावस्तीसध्याहृत्यसत्तयोरेवोपमानोपमेयभावे नादोष इत्यन्यत्र विस्तरः। तत्रत्तस्यैव। यद्यपि मथुराया
मिव पाटलिपुत्रेऽधीत इत्यर्थे पूर्वे ण्येव सिद्धं तस्य मथुराया तुल्यमधीते पाटलिपुत्रे इत्यस्य च तुल्यत्वात्तथापि द्रव्यगुणा
दितुल्यार्थग्रारम्भः क्रियाचेदितितु नानुवर्त्तते। किंचैवाद्य स्योपमानविशेषणतया तुल्यपदार्थस्य विशेष्यतया बोधे
भेदः। एवं च उपमानमथुराभिन्ने पाटलिपुत्रे [illegible] मेऽध्ययनमित्यर्थे मथुरावत्पाटलिपुत्रे मेऽध्य
यनमिति साध्वे व उपमेयेनाभेदान्वयात्तत्समानेऽषष्ठीसप्तम्यावुपमानाद्वोध्येत्तदाह। मथुरायामिवेति। अत्र वाक्ये प्रा
काराद्दिपदाध्याहारेणैव बोधः प्राकारयोरेवचोपमानोपमेयभावः वक्तौ तु मथुरादिपदानां तत्संबंधिप्राकारे लक्षणेति
केचित्परे तु। षष्ठ्यर्थसप्तम्यंतात्षष्ठ्यन्तात्त्वायं साधुः अधिकरणसप्तम्यंतात्तु नायमसामर्थ्यादत एव तत्सूत्रे तत्र ग्रह
णस्यैव शब्दयोगे षष्ठ्यर्थे सप्तमी ज्ञापकतो नाभाष्ये देवेष्विव मनुष्येषु नामेत्युदाहृतं तत्रैव देववन्मनुष्येषु नामेति
साधुउपमानदेवसंबंधिनामाभिन्नमनुष्यसंबंधिनामेति बोधः मथुरावत्पाटलिपुत्रे प्राकार इत्यस्योपमानमथु
रासंबंधिप्राकाराभिन्नः पाटलिपुत्रसंबंधी प्रकार इत्येवं बोध एव साधुत्वमस्मादेव ज्ञापकादिवयोगे उपमान
विशेषणादुपमेयविशेषणाच्च षष्ठ्यर्थे सप्तमी साधुः। तदहँ। तदितिद्वितीयान्तादर्हमित्यर्थे वतिरित्यर्थः। सूत्रे रामः
सोत्रत्वाद्द्वितीया। विधिवदिति। विधिविषययोग्यत्ता कार्त्स्न्ये हरिकर्मकं देवदत्तकर्तृकं पूजनमिति बोधः। विधि २२७

227

स्तेत्रयोरर्थयोर्भविवक्षस्य याङ्ग्लर्पः। प्राक्च्युणप्रः। शारदे संधिवेलाद्य ... त्यात् इदं वत्सनुरोधेन। भाष्येतु चोभि
न्नक्रमः दीयते इत्यनन्तरं बोध्यः चकारेण चयज्ञाख्येभ्यइत्यावृष्यते। तत्र दीयते इत्यर्थे यज्ञाख्येभ्यष्ठ्मव
तीत्यर्थः। अग्निष्टोमे दीयते भक्तमाग्निष्टोमिकं कार्यकृता येरेवभव वदतिदेशाइत्युक्तं। अष्टमहमुखि मुखेदीयते
इत्यादि। भाष्यरीत्याप्युत्तरत्रोभयोरधिकारः संपादितिः। गुणोकवैःसंयादःसंपत्तिस्तद्धतीत्यर्थः। अभवतीति। सम
ल्यप् र्थइत्यर्थः। कालमिति। प्रातःकालवाचीकाल्य शब्दस्तद्वाचिकलशब्दवदव्युत्पन्नं प्रातिपदिकं बोध्यं। ततः
स्वार्थिकाणं त्वा। इंद्रमह। इन्द्रोत्सवः मंचो विलोडनदंडाधारः काष्ठविशेषः मंथदंडयोरूढावेतौ। चूडादिभ्यइति।
टिठ इदंमुख्योभ्योण ... कृतोरित्रिसनयोरपिबोध्यं तेन यथादर्शनं व्यवस्था। अग्निपदेदीयतेकार्यं वा अग्निपदं
पैलुमूलं उपवस्ताग्र ... ग्रोऽस्यौ पवस्त्रेग्रा वित्रंभाष्येऽग्निपदादिभ्यइति पाठः। एकागारकेट् चौरइति तेनाभिद्रो
न। टिलंडि वर्णे। आद्युदात्तत्वमप्यत्र निपात्यते अत एवठञा तिद्धेनिपानर्थक्यमितिभाष्येउक्तं। समानकाले
स्येति एतदर्थमेव निपातनं अयमाद्युदात्तः आद्यंतावुत्पत्तिनाशौ। अकालात्ठञेति वार्त्तिकं। निर्दयं प्रा
कालिका। समानकालिका द्युतान्चं चलेतियावत् चाद्यकालिकी तेनतुल्यं तुल्यमितिसामान्ये नपुंसकं प्रथमां
तं च। उदाहरणेष्वेवं। व्यापारविशेषणत्वात् क्रियेति च संनिहितत्वात् समानविभक्तिकत्वात्प्राधान्याच्च प्रत्यपार्थ
विशेषणं यत्तुल्यं सा चेत्क्रियेत्यर्थः। प्रकृत्यर्थे विशेषणं तु न ब्राह्मणेन द्विजाद्वा नोत्तराण्याध्ययन प्रत्वेन क्रियो
पमानत्वयोर्व्यार्थकत्वेपि तत्प्रत्ययीयाप्यन्वये न सत्वरूपतया क्रियात्वासंभवात्। स्यातद्येन तुल्यं गच्छतीत्या
दिप्रयोगसत्वे तत्रापि तत्प्रत्ययार्थ ... तुत्यलक्षणतास्य ... ष्ठेव। अस्त्व

मेतत्। तत्रच्छत्रमाण प्रातिपदिकाद्विधीयमानानां तद्धितेष्वप्राप्तभावादाह। पतित्वमिति। पदांते तीजंतान्त्वेति चकमेणपग
णोप्राप्तौ। आपदत्वमिति उत्तरोभावप्रत्ययो नञ्पूर्वाद्वहुव्रीहेर्नेष्यत इत्यादिभाष्यं। पदांते ति प्राक्तन कष्यादिभ इत्यादि
विषयमेवेतिभाष्यप्रदीपोद्द्योते ति निरूपितं। आचतुर्यमिति। नञ्पूर्वाणामेवामत एव भर्पुद्वासाङ्गणपाठानुमानेन
व्यन्वोध्यः। रत्न्रुतौ। हलादेः किंत्रजिष्णुः। लघोः किंकठिष्टः मेवरत्वमिति। तेनक्तयतीत्यादाविष्ठवद्भावाद्भावो न। त
थातथ्य। नञः शुच्वीत्यतो नञ इति वर्त्तते। यथातथा शब्दो निपातसमुदायः। यथातुरमिति पुराशब्देन पदार्थानतिवृ
त्तावव्ययीभावः। केचिदिति। भाष्यानुक्तत्वमत्रारुचिः। वाणिजमपीति आपिनादौत्सं यौवनमिति। मनोज्ञादित्वाद्यौवनकम
पिष्टकत्वाकेराजन्येत्यादिना प्रकृतिभावः। सहायादेति। पत्नीव्राह्मणादित्वात्प्यञ्। इदं भाष्ये क्वचिन्नजंप। श्रेष्ठोपायिकेति।
अस्यापि प्राप्तिरस्तीति भावः। गोपालपशुपा लिकेत्यादित्वस्योदाहरणं मुखं गोत्रं च। श्लाघादेः पञ्चपदांतरोपाता एवप्र
त्ययार्थान्वयिनो न प्रत्ययवाच्या इति बोध्यं। आर्गिकेयेति। स्वभावात्स्त्रीत्वं। तत्तोवाथनार्थ निसधिकारवशात् होत्रा
भ्य इतिभाव कर्मणोः प्राप्तस्येति भावः। एतेन कर्मणित्वस्याप्राप्तेस्तदर्थं त्वग्रहणं किं च रूवस्त्रात्राविहितस्य त्वादेरपि निषेधः
स्यादित्यपास्तं। शब्दोपात्तस्यैव निषेधात्॥ ॥ ॥ इति नञ्स्नञधिकारः समाप्तः॥ ॥ ॥धान्या
नां निर्देशात्क्षत्रसमर्थविभक्तिः। अलौकिके तु प्रत्ययार्थस्याक्रियात्वेपि कर्त्राभावेपि तद्धितविधावनुवादसामर्थ्य
नैवसावोध्याः। लौकिके अपमाप्रवेशेपि न क्षतिरिति कश्चित्। द्वेत्र शब्दस्य धान्यादीनामुत्प साधारणवचनः
भवतिक्षेत्रोत्पत्तिवाच्ची परस्परमन्वययोग्यत्वात्तेनेह नमुद्गानां भवनं मुद्गमत्तोयं कुसूलः। विभाषाति। अत्र पूर्वत्र
चपंचमी षष्ठ्यर्थे इति धान्यानामित्यस्य संवंधात्वष्ठ्येवसमर्थविभक्तिरिति केचित्। असामर्थ्येपीति। सर्वे इ

शब्देन तदुक्तप्रकारः साहश्या प्रतीतेः पूर्वे गाङ्गसिद्धौ वचनं गवि नीलवदागमनं चिह्नेदकोत्तहस्तवदिसा दौविनी
तानामिदं योग्यमागमनं कृतहस्तानामिदं योग्यं छेदनमिति प्रतीतेरिति दिक्। तस्य भावः। भावेन्वाकर्मकेभ्यो भावे
इत्यादौ भावपदार्थस्यान्याहशस्य प्रसिद्धेराह। प्रकृतीति भवन्ति अस्य बोधाय प्रवर्तन्ते तेनेनेति भाव इति करणे घञिति
भावः प्रकारइति। मुख्यविशेष्यतानिरूपितविषयत्वं इत्यर्थः तेन राजपुरुषादौ राजादेः प्रकारत्वेपि न हानिः स च न
न्वञ्चद प्रवृत्तिनिमित्तरूपएवप्रवृत्तिनिमित्तत्वं च यत्र बुद्धिस्थ सति विशेष्य भूतार्थबोधनार्थं शब्दस्य प्रवृत्तिः प्रयो
जकत्वं। कश्चित्प्रकारस्य न त्वं यथा घटादिपदेः कश्चित्संसर्गस्य यथोपगावराजपुरुषकारकादौ प्रकार इति च मूल
उपलक्षणं यद्वा संबंधस्यापि संबंधनया प्रकारतया चेति दिग्भानसंज्ञाशब्दे च प्रायशो दण्डवप्रवृत्तिनिमित्त
मिति केचित्। परे तु। संज्ञाशब्दे प्रवृत्तिनिमित्तं नास्त्येव डित्थलमित्यादौ विशेष्य भूततोर्थ एव लाप्यः प्रकृतिप्रदेशे शुशब्द
पराङित्थशब्दवाच्यः इत्यादिक्रमेणैव बोधः। डित्थइत्यादितः सर्वादिप्रकारकबोधान्नानिति कल्पकं कुलमित्यादेः कुश
ब्दार्थः कवर्ग इत्यादिबोधः। अन्यथा कुलं कस्मान्नभवतीत्यादौ कुलशब्दार्थः कुशब्दस्य प्राप्त्यभावात्तस्य स्वार्थो प्रयेलक्षणा
श्रयणीयास्यात् इत्यादि भाष्यप्रदीपोद्योतादौ विस्तरइत्याहुः। भावत्वेन च प्रवृत्तिनिमित्तं शक्यं। प्रकृतिजन्येत्यादि तदु
लप दण्ड घटत्वमित्यादेर्घटसंबंधी भावइत्यादिक्रमेण बोधः। भावप्रधाननिर्देशस्थले च तादात्म्येन व्यक्तिकारकः
स्वरूपेण जातिविशेष्यकोबोध इति न तत्रासाधुत्वमत एव जात्याख्यायामेकस्मिन्निति चरितार्थं। अपवादे रिति। अन्यथा
पवादविषये ऽस्यानुपस्थितिः स्यान्निराकांक्षत्वादिति भावः। चकार इति। अन्यथापवादार्थप्रत्ययानामिवैतयोरपि
तौ बाधकौ स्यातामिति भावः। गुरुत्वमिति। सूत्रानार्द्धविविक्षितं तु न। सवनादिषु पाठात्। ननञ्सूवित्तिः। अधिकारस्तत्र

ष्टीनं वाडवमिति। अवष्टब्धमासन्नं। आगवीने आङ् मर्यादायां गोशब्दो गोःप्रसर्पणे तदाह। प्रसर्पणेति। प्रस
र्पणं वा अस्त इत्यादिः। अलंगामीति। सुप्सुजातावितिणिनिस्तद्द्र्शयन्नाह। गच्छतीति। अनुग्विति पश्चादर्थेऽव्ययीभावः।
अध्वानमलं गच्छतीति। अलंगामिपदेन विग्रहे लब्धे नो लंगामीत्येव। अप्रमित्रान्दः। अलंगामीत्यनुवर्तते। लक्ष
णेनाभीत्यव्ययीभावः। गोष्ठा। अत्र केचित्तु। यद्यपि मुद्गतपूर्वे चरट् षष्ठ्या रूप्यचेत्येते त्रै चपाठेत्ता गोष्ठात्खञ्जित्येव प्र
त्रंयुक्तं। तथापि तयोरन्यत्र करणसामर्थ्ये न विशेषविहितेनापि खञा चरटो वाधो नेति ज्ञाप्यत इत्याहुः स्तम्भादम्बे
ज हृष्ठं। शालीनकौ। शालाकूपाभ्यां तत्र वेशात सतन लाद्वाणिकाभ्यामेवञ्जसपीनयोरूढिशब्दत्वात्। नानाजातीया
नामनियतवृत्तीनां शरीरायासजीविनां संघो व्रातस्तत्कर्म व्रतशरीरायासरूपं व्रातः। अतएव निपातनादिदमर्थेऽणिते
आमन्य तमेरवव्रातीन इष्यते। नवनीतमिति। भाष्येऽच्छतमिति पाठः संज्ञायामिति सुकेदन्द्वितिन। तस्य पाकः अर्थ
योः प्रत्यययोः प्रकृत्योश्च यथासंख्यं। विनञ्भ्यां। नसहेति प्रकृत्यर्थविशेषणमित्याह। असहार्थ इति। तथा स्वाश्रय
भावे इति असहार्थे किं विगत इत्यादौ क्रियाविशेषका भ्रमः। गोष्ठजिति। एतत्प्रत्याख्यानपरभाष्यबलादेतेषु वि
तः पठिता अत्रत्यादिशब्दार्थबोधकानिवात्तिकान्याह। संघातइति। षड्ङ्इति। हस्तिषड्वमिति भारतप्रयोगादिक
मुक्तं। अवाचीनः प्रसिद्ध ःनतइति। नासिकासंबंधिनतत्वे वर्तमानाद्वात्स्वार्थे प्रत्यय इत्यर्थः। नेविडि। निविडाः केशा
इति प्रयोगान्नतेन नासिकायाइत्यादेस्त्रासंबंधः। अग्रे तुमडूकानुवृत्तिर्बोध्या। अभिधेयइति। तत्र वर्तमानान्नेरि
त्यर्थः। विकादेशे कारउच्चारणार्थः। क्लिन्नस्येति। चिल्पिलाबादेशौ लश्चात्र संपइत्यर्थः। आसन्नं समीपं। आ
रूढमुच्चं। संज्ञाधिकारलभ्यमाह। पर्वतस्येति। समुद्रोपसकाहेमी पर्वताधिकाश्रुतीत्यादौ तु लक्षणया प्रयोगो
बोध्यः। कर्मठ इति। ठस्याणनिमित्तत्वाभावादिकादेशो न। प्रमाणेद्वं। प्रमाणे इत्यर्थद्वारा प्रकृतिविशेषणं। तत्रव

स्यसमस्कृतेनान्वयेनोत्तरपदार्थेनन्वपादसामर्थ्यमितिभावः। सर्वेण चर्मणा कृत इत्यर्थे तु तद्धितो नेष्यत इति भावः। निपा
तनादिति। प्रत्ययसंनियोगेनैवेदं निपातनं तदाह। सर्वश्चर्मणेति। समं सर्वमिति। अभिमुखार्थकसमित्युपसर्ग
पूर्वा तु प्रत्ययो नेष्यत इति भावः। यथामुखीन इति। प्रतिबिंबदर्शनाधिकरणं इत्यर्थः। तत्सर्वादेः। पत्रपात्रमिति
पंचम्यर्थे प्रथमा। सर्वादेरिति। बहुव्रीहिस्तत्सामानाधिकरण्याय पथ्यादिभिस्तदन्तग्रहणं तदाह। पथ्याद्यं
घ्यंतादिति। व्याप्तिक्रियाकर्मत्वलाभ[illegible]माह। द्वितीयांतादिति। अनुग्रामे इति। आद्यपादसंबंधिदे छोऽपिल
द्धितेत्यर्थः। अंसेपदेन सदृशीत्यर्थः। सादृश्यं तुल्यपरिमाणतया समर्थे विभक्तिद्वितीयानिर्देशात् योऽप्यतान्त्र। स्थल
विशेष इति। अयः अप्रदक्षिणगमनमयः सहितो नयोऽस्यानय इति यथा सोऽगति विशेषेण शक्तोऽत्त यापि प्रदक्षिणप्रसव्यगा
मिनां शाराणां यस्मिन् सुषमादिपदे स्थिता नापरकीयैः शारैस्तद्या नाम संबंधस्तद्बाधाभावरूपः ससहायस्य शा
रस्य परैर्नाक्रम्यते पदं असहायस्तु शारेण परकीयेण बाध्यत इति द्यूतशास्त्रात् तस्यानं लक्षणं प्रोच्यते इति भावः।
सर्वं चेदं सर्वं भाष्ये इत्यन्यत्र विस्तरः। तं नेय इति। प्रधानकर्मणि यत्। अप्रधाने द्वितीया। संनियोगेनैवेति। अ
प्रावरां ४ तत्र वभाष्येपरां [illegible] श्रेस[illegible]नादेशेनैव विग्रहो दर्शितः। राष्ट्रावारपारावार घारादित्य हीताद्यपीत्यादि पठितं तदिहापी
त्याशयेनाह वारीण इत्यादि। पूर्वपदे इति। उत्तरपदे तु विभक्तिलुकैव सिद्धिरिति भावः। यलोपनिपातनसामर्थ्या
दलुगिति तु भाष्यकृतः। विजायते गर्भं मुंचतीत्यर्थः। तेनात्र संयोगाभावान्न द्वितीया। खड्गस्यानुसृत्तावि
ति। पदद्वयेपीति शेषः। सूत्रे तु उभयत्रापि तत्प्रोच्चारणेन। विकल्पस्तु वाचनिक एव। समाशब्दो बहुवचनांतस्त
देसुक्तसूत्रभाष्यादिबलादुपेक्ष्यमितिभावः। अपदामीनेयविभक्तिकं व्याख्यानात् तेन। स्त्रियामपि। अध

त्रविस्तरः। किमिदं। वस्वग्विधानसामर्थ्याद्वतुपोप्यत्रविधिः। प्रत्ययांतरत्वभ्रमव्यावृत्त्यैवइति। एतेनादेः परस्येत्येवसि
द्धेवइतिअर्थमित्यपास्तं। यद्वा किमिदंभ्यामितिवाक्यभेदेनवतुपंविधत्ते। किमः सं। इदमोनिव्। [illegible] त्यर्थं किमइतिसं
ख्यापरिमाणमितिकर्मधारयः परिमाणशब्दः परिच्छेदकःपरः पूर्वत्रपरिमाणग्रह [illegible] णस्यसर्वतोमानार्थत्वात्पुनस्त
द्ग्रहणंसंख्यारूपपरिच्छेदकविषयेप्रश्नेवर्त्तमानात्किमोस्येतिषष्ठ्यर्थेडतिरित्यर्थः। संख्येतिकिं कियान्घटः।
कतीतिनित्यवहुवचनांतः। द्व्येकयोः संदेहाभावेनप्रश्नाभावात्‌वहुत्वव्याप्यसंख्यानांवहुत्वात्प्रश्नोयुक्तएव।
संख्यायाअ। अवयवेवर्त्तमानसंख्यावाचकाद्वयपविरूपेऽस्येत्यर्थे तयपिस्यर्थः। अवयवीचात्रानुभूतावयव
भेदोपिसमुदायः तेनमुनित्रयंवहुत्वपंपूथमुभयेदेवमनुष्याइत्यादिसिद्धं। द्वित्रिभ्यां। नन्वयवष्‌त्रित्वेमध्यं
चित्वेपिद्व्यादीनामंतोदात्ततयायस्येतिलोपेऽनुदात्तेस्यचयत्रेत्यनेनाद्युदात्तस्यैवप्रयोगेश्रवणाद्वित्त्वे
न। प्रत्ययसंवंधिआद्याकारस्यैवप्रकृतेरपिशेषनिघातेनानुदात्तत्वात्। उभादु। उदात्तग्रहणसामर्थ्यादादिरु
दात्तः। अंतोदात्तत्वस्यचित्वेनैवसिद्धेःसर्वोदात्तत्वंतुवाधितमनुदात्तंपदमेकवर्जमित्युक्तेः। नचोभयेसत्रसंवुद्ध्यामा
त्रिताद्युदात्तत्वंवाधितमुदात्तग्रहणमितिवाच्यं। येनूनाप्राप्तिन्यायेनचित्स्वरस्यैववाध्यत्वात्तस्यसतिशिष्टत्वेनव
लवत्त्वाच्च। उभयंस्थएवंचनइत्यादौमद्योदात्तप्रयोगाच्च। तयपइति। इदंतयादेशेप्रतिषेधउभयेइतिस्थानि
वत्सूत्रस्थवार्त्तिकानुरोधेन वस्तुतोनात्रादेशत्वंकिंतुप्रत्ययांतरत्वमेवउभयीसत्रङीवुद्धिरितिसूत्रेमात्रच
इतिमात्रशब्दास्यापि॥ अयचश्चकारेणप्रत्याहाराश्रयणादितितत्वसारख्यानभाष्यादत एवोदात्तग्रहणंसा रामः
र्थकिमन्यथानिरनुवंधकादेशांतरमेवकुर्यात्‌। आदेशत्वेप्याद्युदात्तत्वेसिद्धिको [illegible] रेणतस्याद्युदात्तता २३०

र्तमानात्प्रथमांतादित्यर्थः । प्रमाणमत्र परिच्छेदकमात्रं तत्र मात्रच् । अत एव प्रस्थमात्रमूरुमात्रमित्यादिसिद्धिः । आ
द्यौ तूर्ध्वमाने एव प्रथम अद्वितीयश्च ऊर्ध्वमाने मतौ ममेत्युक्तेरिति केचित् । अन्ये तु आयाम परिच्छेदकमेवात्र प्रमाणं । अ
त एव यत्तदेतेभ्य इति सूत्रे प्रमाणपरिमाणशब्दयोरेकार्थत्वं मन्यमानस्य परिमाणग्रहणं किमर्थमिति शंकायामुक्तोत्र
विशेष इति भाष्ये समाहितं तेनोक्तविशेषवाचकावत्र प्रकरणे प्रमाणपरिमाणशब्दाविति सूचितं । एवं च प्रस्थमात्रं इत्या
द्यसाध्वेव । मात्रच् वस्तुविशेषेण परिच्छेदकमात्रवाचिनः स्यादिति कैयटोपि चिंत्य एवेत्याहुः । प्रमाणे लः । प्रमाणे व
र्तमानाद्द्विगोर्हि तस्य लुगित्यर्थः । इह आयामस्तु प्रमाणं स्यादित्येव कथ्यते तेनोरुद्वयसमित्यादि सिद्धं । प्रमादीनामपि यदा
याम परिच्छेदकत्वं तदा मात्रचो लुक् पदात् ऊर्ध्वं धरादिगवस्थितवस्तुपरिच्छेदकत्वे द्वयसजादित दा । प्रमाणत्वान्न लुक् ।
द्विगोर्नित्यमिति । प्रमाणं तद्धि गोरित्यर्थः । एतत्सामर्थ्यादेव तदंत द्विगोः प्रमाणत्वे पि मात्रच् । प्रमाणपरीति । तेनेन्मानां
त्संज्ञायेमात्रज्ज्ञ । शममात्रमिति । शमः स्यान्न वेत्यर्थः । वक्तृतात्पर्येइति । बहुलग्रहणसहितोत्र पाठो भाष्ये । हस्तिनेइन
इतीति प्रकृतिभावः । यत्तदे । इह परिमाणग्रहणं सर्वतोमानार्थकं न तु परिच्छेदकमात्रार्थकं । ननु प्रमाणे इत्यनुवर्त्य तत्रै
वास्य विधानमस्तु यावान् ध्वैत्यादि प्रयोगा एवमुख्याः स्तु परिमाणप्रयोगा एव साहश्याभेदेन तु तदुक्तं भाष्ये किमर्थं परि
माण इत्युच्यते परिमाण इति वर्त्तते इति चेन्न यदादिभ्यो विशेषाद्धि हि तेन वतुपमात्रादीनां बाधप्रसंगात् परिमाणग्रहणे
तु भिन्नोपाधिकत्वान्न बाध इति प्रमाणोपाधौ तन्मात्रमूर्ध्व मानोपाधौ तद्द्वयसमित्यादि सिद्धं । यावानूर्ध्वं याव
तीरज्जुरधिकरणे तावदित्यादि प्रयोगास्तु साहश्याद्बोध्याः । तु दत्तमात्राद्यप्रतिघातायेति । प्रमाणग्रहणानुवृत्त्या वा
ध्यभेदेन परिच्छेदकमात्रे पि विधानात्सिद्धं । न चैवं वतुप् ते सेवोच्यतां सर्वतोमानोपाधाव पि मात्रजापत्तेरित्सन्म

ष्ठपूरणस्त्रीयशब्दोस्तीति पूरणाध्याजेइति स्त्रत्रस्य भाष्यासंगतेः। तत्र तस्य पूरणग्रहणं तु प्रागेकादशभ्यइत्युत्तरार्थमिति
भाष्ये स्पष्टं। विंशत्यादिभ्यस्तमडन्यतरस्याम्। विंशत्यादेः पंक्तिविंशतीति सूत्रस्य उत्तरस्य नैव संख्यादेरिति चिह प्रकरणे तदंत
विधिज्ञापकं तेनैकान्नविंशतितमः एकविंशतितमइत्यादि सिद्धं। ज्ञापकेन च प्रत्ययविधिविषयता बोध्यते। ग्रहण
वतेत्यादेरयं चागमविधिरिति मत्वादेरिति सूत्रे भाष्ये स्पष्टं। मतौ छः। असवामीयमित्यादौ अ... कृतिवदित्यस्यानित्य
त्वान्ङत्यादेर्न लुक् असवामस्येति वेदे पठ्यते तत्र द्वितीयाविभक्तिः प्राग्भागानुकरणाद् अनुकार्येणार्थवतः प्रत्ययइ
तिबोध्यं। विधानसामर्थ्यादिति। ज्ञापकसिद्धं विधानसामर्थ्यादित्यर्थः। भाष्ये वा लुगिति वचनमेवारब्धं। विमुक्ता
दयः शब्दपरागणे निर्दिष्टा गोषदादयोप्येवं मतौ छइत्यारभ्यैतदंतानुकरणशब्दादेव प्रत्ययाः साधवः। कामइ
छेति। नतु कामयितानभिधानात् तत्रैवानुवर्त्तते तदाह। धनेकामइति। तदर्चनायामिति। अत्रैवार्थे त्यसाधुत्वस्व
भावात्। उदरा। तत्र प्रसितइति चवर्त्तते यः प्रसितः सचेदविजिगीषुरित्यर्थः। उदरको मत्स्यः। प्रीतो भ्याम्। संज्ञायामित्य
नुवर्त्तते इत्याशयेनाह। लसइत्यादि। अधमर्णोत्तमर्णशब्दादिति। सुखादनमात्रे ... ह्रस्वयामिति बोध्यं। अनलुडिति।
संज्ञाधिकारादीदृशेर्थ एव साधुत्वं बोध्यं। दंभइति। दंभसाधनत्वात्। दांभिका हि प्रायेण दग्ध्वा जिनं धारयंति। तावति
थं। ग्रहणमिति भावे ल्युट्। तस्त्र प्रत्ययार्थः। तावतिथमिति पूरणप्रत्ययांतोपलक्षणं तृतीयार्थे प्रथमाः तृतीयांता
द्ग्रहणमित्यर्थे प्रत्ययः तावतिथेन गृह्णातीत्युपसंख्यानमिति वार्त्तिके तृतीयाया एव समर्थविभक्तित्वसत्त्वतत्वात्
तद्बलयन्वयत्मातिद्वितीयेन रूपेण ... ति पूरणप्रत्ययस्येति षष्ठेन गृह्णाति षष्ठ इति भाष्योदाहरणे तल्लुक एव दर्श
नाच्च द्वितिभावः। द्विकं वा ग्रहणमिति। अहीतर्थेपि प्रत्ययविधाने ... ना ... संदेहाय ग्रहणमित्युक्तं। द्वितीयेन रू
पेणेति। द्वितीयया गुरुक्तया शब्दान्वक्षेत्यर्थः। इति लौकिकविवक्षार्थः। तेन ग्रंथविषये ग्रहणमेवतेन द्विती

र्त्तमानात्प्रथमांतादित्यर्थः। प्रमाणमत्र परिच्छेदकमात्रं तन्मात्रं च। अत एव प्रस्थमात्रमूरुमात्रमित्यादिसिद्धिः। आ
द्यौ तूर्ध्वमाने एव प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ ममेलुक्तेरिति केचित्। अन्ये तु आयामपरिच्छेदकमेवात्र प्रमाणं। अ
तएव यत्तदेतेभ्य इति सूत्रे प्रमाणपरिमाणशब्दयोरेकार्थत्वं मत्वा मानस्य परिमाणग्रहणं किमर्थमिति शंकाव्यामुक्तोत्र
विशेषण इति भाष्ये समाहितं तेनोक्त विशेषवाचकावत्र प्रकरणे प्रमाणपरिमाणशब्दाविति स्फुटितं। एवं च प्रस्थमात्रं इत्या
द्यसाध्वेव। मात्रच् वस्तु विशेषेण परिच्छेदकमात्रवाचिनः स्मरणमिति केयटोपि चिंत्यएवेत्याहुः। प्रमाणे लः। प्रमाणे व
र्त्तमानाद्विगोर्विहितस्य लुगित्यर्थः। इहायामस्तु प्रमाणं स्यादित्येकल्प्यते तेनोरुद्वयसमित्यादि सिद्धं। शमादीनामपि यदा
यामपरिच्छेदकत्वं तदा मात्रचो लुक् पदातूर्ध्वं धरादिगवस्थितवस्तुपरिच्छेदकत्वे द्वयसजादि तदा प्रमाणत्वान्न लुक्।
द्विगोर्नित्यमिति। प्रमाणांताद्विगोरित्यर्थः। एतत्सामर्थ्यादेव तदंतद्विगोः प्रमाणत्वेपि मात्रच्। प्रमाणपरीति। तेनेन्माना
त्संशये मात्रज्न। शममात्रमिति। शमः स्यान्न वेत्यर्थः। वत्सांतात्स्वार्थे इति। बहुलग्रहणसहितोत्र पाठो भाष्ये। हास्तिनेइन
लीति प्रकृतिभावः। यत्तदे। इह परिमाणग्रहणं सर्वतोमानार्थकं न तु परिच्छेदकमात्रार्थकं। ननु प्रमाणे इत्यनुवर्त्य तत्रै
वास्य विधानमस्तु यावानित्यादिप्रयोगा एवमुख्याः सन्तु परिमाणप्रयोगा एव साधवः पादवं तु तदुक्तं भाष्ये किमर्थं परि
माण इत्युच्यते परिमाण इति वर्त्तते इति चेन्न यदादिभ्यो विशेषविहितेन वतुपा मात्रादीनां बाधप्रसंगात्परिमाणग्रहणे
तु भिन्नोपाधिकत्वान्न बाध इति प्रमाणोपाधौ तन्मात्रमूर्ध्व मानोपाधौ तद्द्वयसमित्यादि सिद्धं। यावानूर्ध्वं याव
तीरज्जुरधिकरणे तावत्येवेत्यादिप्रयोगास्तु साहचर्याद्बोध्याः। तुदत्तमात्राद्यप्रतिपत्तायेति। प्रमाणग्रहणं त्वनुवृत्तसावा
र्थभेदेन परिच्छेदकमात्रेपि विधानात्सिद्धं। न चैवं वतुप्येवेष्टेसर्वतोमानोपाधावपि मात्रज्जायतेति सत्य

ह्यपूरणस्त्रीयशब्दोस्तीति पूरणाद्भागेइतिसूत्रस्थभाष्यासंगतेः। तत्रत्यपूरणग्रहणं तु भागेकादशभ्यइत्युत्तरार्थमिति
भाष्येस्पष्टं। विंशत्यादिभ्यस्त इत्यत्र विंशत्यादयः पंक्तिविंशतीतिसूत्रस्थाउत्तरसूत्रे संख्यादेरिति त्विह प्रकरणे तदंत
विधिज्ञापकं तेनैकान्नविंशतितम एकविंशतितम इत्यादिसिद्धं। ज्ञापकेन च प्रत्ययविधिविषयता बोध्यते। ग्रहण
वतेत्यादेरयं त्वागमविधिरिति षष्ठ्यादेरिति सूत्रे भाष्ये स्पष्टं। मतौ छः। अस्य वामीयमित्यादौ प्र[illegible]कृतिवदिति स्यानित्य
त्वान्ङसादेर्न लुक्। अस्य वामस्येति विवेदपठ्यते तत्र द्वितीयविभक्तिश्चाभागानुकरणादनुकार्येणार्थवतः प्रत्ययइ
तिबोध्यं। विधानसामर्थ्यादिति। ज्ञापकसिद्धविधानसामर्थ्यादित्यर्थः। भाष्ये वा लुगिति वचनमेवार्थं। विमुक्ता
दयः शब्दपरायणेन निर्दिष्टा गोषदादयोप्येवं मतौ छ इत्यारभ्य तदंतानुकरणशब्दादेव प्रत्ययाः साधवः। कामइ
छेति। न तु कामयितानभिधानात् तत्रेत्यनुवर्त्ततेतदाह। धनेकाम इति। तद्वचनायामिति। अत्रैवार्थेत्यसाधुत्वस्व
भावात्। उदरा। तत्राद्यूनइतिचवर्त्ततेयः प्रसितः सचेदविजिगीषुरित्यर्थः। उदरकोमक्षः। प्रीतोस्माभ्यां। संज्ञायामित्य
नुवर्त्तते इत्याशयेनाह। लत इत्यादि। अध्यारूढ शब्दादिति। मुख्यादनमात्रे अध्यारूढस्त्वयमिति बोध्यं। अनुज्ञुरिति।
संज्ञाधिकारादीदृशेर्थएवसाधुत्वं बोध्यं। दंभइति। दंभसाधनत्वात्। दांभिका हि प्रायेण दंडाजिनं धारयन्ति। तावति
थं। ग्रहणमितिभावे ल्युट् तस्य प्रत्ययार्थः। तावतिथमिति पूरणप्रत्ययांतोपलक्षणं तृतीयार्थे प्रथमाः तृतीयांता
द्ग्रहणमित्यर्थे प्रत्ययः। तावतिथेन गृह्णातीत्युपसंख्यानमिति वार्त्तिके तृतीयाया एव समर्थविभक्तित्वसत्त्वात्
तद्ग्रहणं व्यर्थं स्यादिति द्वितीयेन रूपेण ग्र ति पूरणप्रत्ययस्येति षष्ठेन गृह्णातिपञ्चक इति भाष्योदाहरणे तच्छुकएव दर्शि
तम् इति भावः। द्विकंवा ग्रहणमिति। गृहीतर्थपि प्रत्ययविधाने [illegible] ना ग्र संदेहायग्रहणमित्युक्तं। द्वितीयेन रू रामः
पेणेति। द्वितीयया गुरुक्तया शब्दाकृत्येत्यर्थः। इति लौकिकविवक्षार्थः। तेनग्रंथविषयेग्रहणएवतेन द्विती २३१

यालाभात्। तदसंबंधे पिस्यानिसाहचर्येनानुदात्तत्वे ऽभ्यस्तांतोदात्तत्वाऽनुदात्तस्य च यत्र स्वरेनाद्युदात्तत्वसिद्धेऽयच्चश्चः
समुदायानुबंधः इत्यन्यत्र विस्तरः। तदस्मिन्। उपश्लिष्टपदाध्याहारेण पञ्चोत्तिके ऽधिकस्त्वेऽस्मि न्नमीति भाष्ये स्पष्टं
ग्रहणं वर्तते ति निषेधादंतग्रहणं। दशशब्दात्तु न व्यपदेशिवद्भावस्य प्रातिपदिकग्रहणेऽभावात्। समानजातीयत्वे इति।
इतिकरणं लभ्योयमर्थः। शदंत। तदस्मिन्नधिकमिति ड इति च वर्तते संख्याया अवयवे इत्यतः संख्याग्रहणं च वर्तते
ते न त्रयो त्रिंशदधिकाऽस्मिन् शते इत्यादिषु नांतग्रहणं देकविंशं शतमित्यादि सिद्धं विंशतावप्यंतग्रहणं कर्तव्यमेक
२८० विंशं शतमित्यादिसिद्धये। गुणस्य निमाने। गुणोऽत्र समानभागः निमीयते क्रीयते नेनेति निमानं मूल्यं। तदस्येति २
मंडूकप्लुत्यानुवर्तते तदाह। प्रथमांतात्षष्ठ्यर्थ इति। गुणस्येति मध्यमणिन्यायेनोभयान्वयि। गुणकर्मकनिमानवृ
त्तिमानाद्गुणगतसंख्यावाचकान्मयडित्यर्थः। निमानं निमेययोर्भागरूपत्वे निमेयसंख्यापेक्षया निमानसंख्याया
आधिक्येन च निमेयस्यैकत्वे एव चायं प्रत्यय इति भाष्ये स्पष्टमिति। तेनैकोयवभागो निमानमस्योदश्विद्भागस्येत्यत्र त्र्यो
यवानां भागानिमानमस्योदश्विद्भागयोरित्यत्र च न। द्विमयमिति। द्विशब्दस्य भागवृत्तेर्निरपेक्षत्वादु यवाना
मित्येतत्सापेक्षत्वेपि प्रत्ययः उदश्विद्भागस्य त्वुदश्विद्भागद्विमयमुदश्विदित्युक्तं। संख्याया इति किं। यवभागौ निमान
मस्योदश्विद्भागस्य। तस्य पूरणे। संख्याया इति वर्तते संख्येयार्थकसंख्यावाचिनो ग्रहणं प्रवृत्तिनिमित्तसंख्यापूरणे चायं
वाद्दीक्षामेवेतिवदवयवः त्तस्यार्थः। नांतादे। मुत्रुनकतः पंचम इत्यादौ नलोपानापत्तेर्डट इत्यनुवृत्तस्य नांतादिति
पंचम्या षष्ठी कल्प्यत इत्याशयेनाह डट इति। थट्यतावितिविशेषविहिताभ्यामप्याभ्यां चतुरोऽयमेन बाध्यते। पुग्विधा
न सामर्थ्यात्। डटोपवाद इति। सहापवादिद्वितीयशब्द त्वमुत्पन्नं प्रातिपदिकं। अनेन तु नास्य साधुत्वं। न

सू०
२३२ गोमान्देवदत्त इत्यादावधिकरणत्वेपि संबंधाभावेन षष्ठ्यप्राप्त्या सप्तम्युपादानं । सर्वत्र क्रियाकारकभावमूलकः संबंधो
द्रष्टान्वये षष्ठीनियामकः । न चैवमत्र संयोग एव ह्यत्राधारत्वमूलं न तु तन्मूलकः सः किंच संयोगो न षष्ठीनि
232 मित्तं । कथंचित्संयुक्तयोर्घटपटयोरन्यतरबोधकात्षष्ठ्यापत्तेः । अत एव भूमादिषु संसर्गपदेन संयोगग्रहणं । तस्मा
त्संयोगस्य भूमादिषु संबंधांतरस्येव प्रतीतिर्न तु षष्ठ्यर्थता । नापि मत्वर्थता तदुक्तं भाष्ये पर्वते कूटाः सन्ति न तु
ते तस्य किंचिदिति लोहितोष्णीषा इत्यादौ सप्तम्यर्थ एव बहुव्रीहिर्बोध्यः । अत्र षष्ठ्यर्थे मत्वर्थीयात् । षष्ठ्यर्थं
र्थे ६ मत्वर्थीयो न सप्तम्यर्थं तदर्थात्सप्तम्यर्थे सन्निमित्तत्वात्तावद्विसक्तः सप्तम्यर्थे चेन्नेनिठनाविति भाष्ये स्पष्टं ।
अत्रैव शब्दशक्तिस्वभावादेवैकार्थीभावव … त्वादेव बहुव्रीहाविव वर्तमानकालास्त्यर्थो त … भावो बोध्यः । गोमानासीदिति
देस्तु तथा व्यवहारविषयत्वमासीदित्यादिरर्थः । अस्तिग्रहणं त्वस्तिशब्दादस्तिसामानाधिकरण्याभावेन प्राप्तमतुपो
विध्यर्थं तेनास्तिमानिति सिद्धं सताकर्तृधनवानितीत दर्थ इति भाष्ये स्पष्टमिति शब्दलभ्यमर्थमाह भूमेत्यादि ।
संयोगत्व अत्र संसर्गः संयोगः स च संबंधांतरस्येव तन्नियामको तत एव दंडी सतः संयुक्तदं … डस्यैव तत्त्वाभिन्नः प्रतीतिः
प्रतीतिः१ येस्ति विवक्षायां मतुबादयो विधीयंते ते भूमादिषु विषयेषु भवंतीति वाक्यार्थः । एवं बहुव्रीहिरपि यथायथं भूमादि या११
षु बोध्यो मत्वर्थे बहुव्रीहिरिति वा तत्किं । रसादीनां विशेषणमिति । तेन गुणवाचकानामे … वेषां ग्रहणमिति जलादिवा
चि रसादीनां द्रव्यैकत्वेन गंधादीनां च नेति भावः । एभ्य इनिठनावपीष्येते इतीदमर्थमिति भाष्ये स्पष्टं । गुणाच्च
नेभ्य इति । गुणगुणिबोधकेभ्यः शुक्लादिभ्य इत्यर्थः । पटः शुक्ल इति गुणगुणिनोरभेदव्यवहारेपि पटस्य शु रामः
क्ल इति … भेदव्यवहारस्यापि सत्त्वेन प्राप्तमतुपोऽश्रवणार्थमिदं । अत एव गुणनिविशेष्यलिंगता सिद्धा तत्रापि २३२

यं ग्रहणं देवदत्ते जदंड्सेत्यादौ न एवं चग्रंथकृत्प कर्मणः प्रसयेनोक्तत्वादुभयप्राप्तावित्सप्राप्तेर्ग्रहणं पदथ
टितेउदाहरणे देवदत्तस्येति षष्ठी कर्त्तरि निर्बाधा। निरूलुगिति। तावतिथेन ग्रहणमिति तिउपसंख्यानं कर्त्तृ यं लुक् च
कर्त्तव्य इतिवार्त्तिकं पाठादिति भावः। षष्ठेनेति। पंचभिक्तैरसौ ग्रहणमिति किंतु म षष्ठेनेत्यर्थः। पंचलम्। पंचगल
मिति। भाष्ये कस्विलासः काष्ठमयं पाशकं यत्सदेव्यतिय उपातेतत्पंचगलमिति कैयटः। कालप्रयो। कालबोधकः पूरणप्र
त्ययांतस्ततः सप्तम्यंताभ्द्वे प्रत्ययः। कारणवाचकात् तृतीयांतात्प्राग्जितइत्यर्थे फलबोधकात्प्रथमांतादस्यकार्यमि
त्यर्थे ऽभिधान स्वाभाव्यात्। तदस्मिन्नन्नं। अन्नमात्रावमहार्यं। व्रत इकेम्यइति। संज्ञायामित्येव। वेसनुवृत्ते रीति
तावतिथमितिसूत्रान्मंडूकप्लुत्येतिभावः। अन्यथाघनावाधादौनस्यादिदं व्यसनुरोधेन सूत्रेधीतइत्यसाध्यय
नपूर्वं तदनुष्ठानमर्थः। तेनाध्येतृमात्रेण सिद्धइत्यन्ये। श्राद्धमिति। श्राद्धशब्दात्तत्साधनद्रव्यवृत्तेः प्रत्ययः पूर्वादि
नि। अनेन तिकर्तृबोधकमनुवर्तते तस्यक्रियाकांक्षायामतमित्याकेरोति क्रियैव ग्रहणते सपूर्वादिसर्वा
धमानपूर्वीस्त्वर्थप्राप्त्यादित्यर्थः। कृतपूर्वपोःसुप्सुपेतिसमासः। छंदसि। परस्त्वादसमर्थोद मनुवृत्तिस्तोकार्थायेहवा
ख्यातं। साक्षाद्द्रष्टरीति। साक्षादृष्टेत्यर्थेप्रथमोच्चारितादिनिरित्यर्थः। संज्ञायहणाच्चनदात ग्रहीत्रोरथप्रयो
गः किंतु पार्श्वे स्थितः सनुदासीनतयायः पश्यतितत्रैव इंद्रुश्चलेति। स एतमेवपुरुषं ब्रह्मततमपश्यदिदम
दर्शमितितस्मादिदंद्रोनामत मिंद्रं संतमिंद्रइत्याचक्षतइतिश्रुतेः कर्त्राधिष्ठितानामेवकरणत्वात्सलिंगमनुमा
पकं। तदस्यास्ति। गोमान्देवदत्तेइत्यादावाधाराधेयभावाभावादव्यक्तुपादानं। नचतत्राप्यधिव्रहदत्ते पंचाला
इतिवत्तत्संभवः। अधिशब्दयोगे तथा बुद्धिसत्वात्तत्रतादृशबोधाधिकरणत्वसत्वे प्यत्रतत्सत्वे मानाभावात्

शा॰
लं॰शो॰४॰
२३२

रणाद्यणउभयसंबंधोविनीनोर्यथासंख्यंच सिद्धमितिभावः। मतुब्चेति। समुच्चयार्थान्यतरस्यांग्रहणानुवृत्तेरितिभावः।
सिकताइति लुपियुक्तवद्भावः। हयवरट्सूत्रेएकासिकतेतिभाष्यात्। एकवचनांतोप्ययमिति सिकतेतेले वगेयुक्तः। दं
तुरइति। निम्नोन्नतेप्रयोगस्तुलक्षणया। उन्नतेकिंदंतवान् उषः ज्ञान्ध्यत्। मधु। माधुर्यमिति। रसवाचिनएवा
२३३ ग्रहणमितिभावः। स्पष्टंचेदंभाष्ये। नगरमिति। चातुरर्थिकप्रसंगेतनगरशब्दस्तुदेशविशेषनाम। अयंतुजाति ससनि
वाची। अतएवनगरीतिजातिलक्षणोङीष्। पुनर्ग्रहणमिति। पुनर्ग्रहणस्यद्युद्रुभ्यांमइत्यारब्धता याभाष्येउक्तत्वे न ५
व्याख्यानादेवास्यसर्वविभाषार्थत्वमितिवक्तुमुचितं। मणिवइत्यादिविंबांवकुरवामिथ्वकावमित्यस्योदाहरणं।
तो॰ ८ अन्येषामपीति दीर्घः। अणिसोलोपश्चेति भाष्ये नदृश्यते। नेहेति। घात्तुवलइत्यादौ। भात्वलऽणइत्यनुवृत्तेरपित
दभावः। अतइति। एकाद्यराल्कतोजातेः सप्तम्यांचनतौस्थताविति भाष्यं। यवब्रीहीति। ब्रीह्यादिगणेपिपाठादिहा
२३३ थग्रहणंतेनशालिलः शालिकइति सिद्धमिति वृत्तिः। एकगोपूः। सूत्रेबहुव्रीहिः। अधिकारप्राप्तंप्रातिपदिकादित्य
न्यपदार्थः। एकशतिकइति। पूर्वकालेकेतिसमासः तद्धितार्थोत्तरपदेतिसमासस्यमत्वर्थेनभिधानेनाप्रवृत्तेः। संख्यायाः
संवत्सरेत्युत्तरपदवृद्धिस्तुन। तत्रसंख्यापदमुच्चार्य विहितस्यतद्धितार्थे तिसमासस्यैवप्रतिपदोक्ततयाग्रहणात्। अत्रातइ
तिनिवृत्तेअतएवगोशकटिरस्यास्तीतिविग्रहे पिगोशकटिकइत्येवंनतु गोशकटिमानितिगोविंशतिरस्यात्यादौत्वन
भिधानान्नेतिस्पष्टंभाष्ये। इंद्रोपतापेत्यादौमंडूकप्लुतातइत्यस्यसंबंधः। समासांतादितिसूत्रस्थभाष्यादित्यलं। निष्का
त्यराविति। सूत्रेऽसामर्थ्ये पिसौत्रत्वात्समासः। प्रांतग्रहणंशतादिषुर्वादित्यर्थनिरासार्थं मितजितिपाठः। हृदया रामः
हृदयिकइत्यादि। अनेनान्यतरस्यांग्रहणेनातइनीत्यस्यप्रवृत्तौतत्रमतुसमुच्चयबाधकान्यतरस्यांग्रहणानुव २३२

रूढत्वेतु सर्वत्र सर्वलिंगता नियतलिंगता वा प्रसज्येतेति भाष्यकैयटयोः स्पष्टं। अयं च लुकद्रव्यवाचकसमभिव्या
हारे एव एतदेव ध्वनयता भाष्यानुक्तमपि इष्टइति वदता ताहशस्थल एवेष्ट इति तदर्थः ध्वनितं चेदं पूरणगुणे
ति सूत्रे भाष्ये गुणगुणिनोरभेदस्यापि सत्वादिदं वचनं भाष्ये प्रत्याख्यातं गुणिलिंगास्तु तद्वृत्तीति कोशस्य मतुप्लु
काभेदेन वा तद्वृत्तिवर्त्तमानाद् इत्यर्थः। भेदे पि मतुपो ऽनभिधानं गुणवाचिनामि वा पुंस्त्वमेव गुणिनि विशेष्यलिं
गतेति अभिधानस्वभावात्। मादुपधायाः। विधीयमानत्वेन सवर्णग्राहकत्वाभावसम्पन्नानुनासिको वकारः। प्रा
संदीव द्। अत्र सूत्रे कद्दीवच्छब्दपाठो नार्थ इति न संप्रसारणमिति सूत्रस्य भाष्यस्वरसः। तत्र हि कद्रुपायाः सं
ज्ञायां मतौ संप्रसारणं वक्तव्यमिति वचनमारभ्य वलंतु संज्ञापामिति सूत्रेण सिद्धमिति दिक्। राजन्वतीति। राजन्वान्दे
उ ८ श इत्यपि बोध्यं। शिखावानिति। शिखाशब्दस्य ब्रीह्यादित्वे तु चूडावती प्रतिमेति अनुदाहार्यं। मेधावानिति। न
चात्रास्मायामेधोति विनिनावाधात्मलत्वः प्राप्तिः चिकीर्षा वा निसस्मानेनोपलक्षणत्। चूडालोसीति। असी
ति तिङ्. तिङ् इति नि हतं। चूडाला सोरत्वे तस्य सुप्तेनानुदात्ततया तस्यानिकस्याङ् णस्यैकादेशउदात्तेने
नुदात्तत्वे तस्य परेण पूर्वरूपैकादेशे तस्य पदस्यानुदात्तेन सहैकादेशत्वात्स्वरितो वेऽसस्य प्राप्तिरिति बोध्यं
एतच्च वृत्तौ स्पष्टं। समुच्चयार्थमिति। भाष्योक्तव्याख्यानादिति भावः। वलं साभ्यां। आमालच्युत्यादिस्येव पा
ठः। मतुबंतेन स्नेहवल योरप्रतीतेरिति वृत्तेः। प्रज्ञाश्रद्धा। यद्यपि कर्तृशुक्लज्ञाश्रद्धाचर्चाभ्यो णः प्राज्ञः सिद्ध
ति। तथापि स्त्रियां ङीबभावार्थमिदं तदाह। प्राज्ञेति। श्रद्धासाहचर्यात् भावार्थकाङंतस्यैवात्र ग्रहणं। तपःसह
अर्थाभ्यां यथासंख्यं नास्त्वरितत्वात्। उक्तार्थ इति। तपः सहस्राभ्यामपि विनीनीइति विपासेन भिन्न विभक्त्युच्चा

तेनार्थिकप्रत्ययार्थिको धान्यार्थीत्यादि च सिद्धं धान्यकरणकप्रार्थनावानित्यर्थः। बलादिभ्यो ऽन्यतरस्यां ग्रहणं दृढं कोपता
पेति प्रकृतस्येनः समुच्चयार्थं। तेनैतस्माद् इन्न। प्र . पिमिनीति। इमनिजंता प्रकृतिः। अनिनस्मन्नित्य नर्थकेना
पितदंतविधिःस्येति। मांतस्योदाहरणमि त्यर्थः। वकारयकारपरस्येति। बहुव्रीहिरनुस्वारोन्यपदार्थः॥ छ ॥
इति मत्वर्थीयाः ॥ छ ॥ प्राग्दिशो। आख्यानादिदं संज्ञासूत्रं तदाह। विभक्तिसंज्ञा इति। स्वार्थिका इति। प्रायेणेति
शेषः स्वीयप्रकृतेरर्थेभिधा इत्यर्थः। तसिलादावर्थनिर्देशाभावादतिशायने इत्यादीनां प्रकृत्यर्थविशेषणत्वादिति भावः।
जात्यंताच्छबंधुनि प्रकारवचने इत्यादिविहितस्य तु वाचकत्वमेव। अत एव तदर्थस्याविशेष्यतयाभानमतः प्रायेणे
ति पूरितं। किंसर्वनाम। प्राग्दिश इत्येव। द्व्यादिपर्युदासात्किमः पृथग्ग्रहणं द्व्यादिभः प्रागेव किम्शब्दस्तु न पठि
तः कस्त्रभवान् क्व भवान् कोपि तत्रभवतः शेषाप ।। त्यदादीनां यत्परं तच्छिष्यते इत्युक्तेः विधेयानिर्देशादाह। अधिक्रि
यत इति। बहुशब्दस्यात्र संख्यावाच्येव व्याख्यानात्। प्रकरणलभ्यमाह। प्राग्दिशो ये परे इति। दिशः प्राक् प्राग्दि. शं त
त्र भवे इत्यर्थः। एते तौ। द्वितीयो व्यंजनांतः यथासंख्यकार्यनिमित्तयोः। न लोप इति। सर्वादेशत्वात्वानुपूर्व्यासिद्धं। इत्वं
त्वा तु न फलाभावात्। परत्वादनः पूर्वमेवत्यदाद्यत्वे निकृते लक्ष्ये लक्षणस्येति न्यायेन न पु रत्वा प्रवृत्तिरिति भावः।
कुतिहो। अष्टनष्टा इत्यतो विभक्ताविरयनुवर्त्तते तीत्यत्र इकार उच्चारणार्थः। तिहोरित्यस्य फलमाह। कस्मादिति। यत
इति तसिलादीनां विभक्तित्वात्त्यदाद्यत्वं। पररूपत से रिति। प्रतियोगे पंचम्यास्तसिरपादाने चाहीयरुहोरिति वर्णमा
णस्येत्यर्थः। प्रत्ययग्रहणपरिभाषयातस्य धातोर्नग्रहणं। स्वरार्थं। लित्स्वरार्थं। विभक्त्यर्थत्वात्वाद्यर्थं स्वरार्थमिति भाष्यं
तूपलक्षणं पूर्वोक्तविभक्तिकार्यस्यापीति बोध्यं। सर्वोभयेति। अभिधानमूलमेतत् भाष्योक्तं। ओदनं परिषिंच
त्वात्यादौ सर्वार्थत्वेपि वाग्रहणानुवृत्तेर्न तत्त्वात्। वाग्रहणमिति। साहचर्यात्कुत्रचिन्नान्य त्र कुत्रापि

न्तेः प्रत्ययत्वसौलभ्यमिति भावः। तप्पर्व। विदपूमिलेके। निदर्यमरुद्भिर्दत्तो मरुत्तन्दवेवं मरुत्तं साधय ति पित्वाऽस्य भाष्ये प्रत्याख्या
नात्। तत्र हि मरुत्तउपसर्गत्वे उपसंख्यानेनोपसर्गत्वसामर्थ्यादिजंतत्वाभावे प्यच उपसर्गा दिति तत्वं तन्न तत्व विधा वुपसंख्या
नेनासिद्धे प्रथमेउपसर्गसंज्ञायामुपसंख्यानमनेकसंज्ञात्वाभावार्थमिति निपातत्वान्मरुत्तश्चाद्युदात्तत्वेन तृतीयाकर्मणी
ति पूर्वपदप्रकृतिस्वरेण मरुत्तस्याद्युदात्तत्वं। एताश्च संज्ञास्तत्व विषया एवेति मरुद्भिर्दत्त इति भाष्ये प्रयोगोनानु
पपन्नः। एवं च फलाभेदाय निल मे वोचितं पित्वेतु मध्योदात्तत्वं स्यादित्यपरे। एतद्धि मयेमतुन्न। अस्य रूढिशब्दत्वा
दवयवार्थाभावेन तदप्राप्तेरित्यन्यत्र विस्तरः। पदत्वफोति। तेनयस्येतिलोपो न। अनुवर्तयतीति। बहुलं छंदसीत्यतः।
वाचो ग्मिनिः। गकारोच्चारणं प्रत्यये भाषायामित्यनुनासिकाभावाय। उत्तरसूत्रस्य बहुभाविणीत्यस्यात्रापि संबंधात्सम्यक् ब
हुभाषिणि वाग्मीति बोध्यं। ऐश्वर्येति। तेन धनवानित्यर्थे स्वामीति न। कटकवलयिनीति। कटकवलययोः कुंचिम्दं दं परि
कल्प्यमिदं द्वउपपाद्यः। अतइत्वेवेति। समासांताइति सूत्रस्य भाष्यान्मंडूकप्लुत्यातदनुवर्त्तते इति भावः। ठनादीति। आदिना
मतुपो ग्रहणं मतुप्समुच्चयार्थान्यतरस्यांग्रहणस्यैकगोइति सूत्रेनि संग्रहणात्। वलाद्विभोमतुवितिसूत्रेन्यतरस्यांग्रह
णं च संबंध इति भावः। अस्मायेसत्रतु संबंध्यत एवतस्याविति सूत्रेयशस्वानिति भाष्ये उदाहरणात्स्वकसैकाजितिसू सू
त्र १२ त्रेस्य गवत्तर इति भाष्ये उदाहरणाच्चेतिबोध्यं। वातातीं। कुणर्पमेवेदं। अदंतत्वादेवेनेः सिद्धत्वादिति वृत्तिः। ठन्वाधनार्थमि
ति। सामान्यसूत्रेण सिद्धेः सूत्रस्य फलांतराभावाच्च। वर्णाद्ब। वर्णेनवेदाध्ययनार्थं ब्रह्मचर्यं। अर्थाच्चेति। अर्थशब्दो
त्र धनवाची कालतो त्रासंनिधिर्निर्देशात्। तत्रविरोधादस्तीत्यस्यासंबंधइत्यप्राप्तएवेनिर्विधीयते सत्तोपाधिकादि
नि ठनो भावो नभिधानात्। अत एवासंनिहितइति किमर्थमर्थवानितिभाष्ये उक्तं। अर्थी समर्थो विद्वान्यः शास्त्रानुप
हतश्च यइति त्वार्थं। अर्थेनमर्थ [illegible] तव नतु मतुना नभिधानात्।

रम

वाद्दिपदनामिवास्तेवप्रत्ययंविनापिप्रकारवाचित्वमतएवैषांनित्यत्वंनोक्तं।दिक्शब्देभ्यः।नेहयथासंख्यमस्वरितत्वा
त्शब्दग्रहणात्वमप्रमर्थमाह।दिग्दिष्टेभ्यइति।संख्यायाइत्येतत्पर्यन्तमस्तातिपदरहितमिदंसूत्रमनुवर्त्तते।अस्ताती
पुराद्यादेशविधानार्थमस्तातिंचेतीहलेख्यं तत्रानुवृत्तिप्रदर्शनाय पूर्वेत्यादिसूत्रमपीहव्याचष्टे।पूर्वाधर।अ
सीत्सविभक्तिकसंनियोगशिष्टत्वायचकारः।अत्रवृत्तिःएणमित्यनंतरयोगेषष्ठी।अस्तातिच।लुप्तसप्तम्यंतमिदंतदाह।
अस्तातावितिाशब्दभेदादर्थभेदेपिसमानानुपूर्वीकत्वाद्दिक्शब्दोदेशादिवृत्तिरितिव्यवहारोबोध्यः।पूर्वादयस्तु
तद्दिक्स्थत्वप्रवृत्तिनिमित्तीकृत्यक्वचिद्वर्त्तं संमुखदेशत्वंतथाकृत्वाक्वचिद्देशेप्रवर्त्तंते।अतएवपुरइत्यस्या
२३५ ग्रेइत्यर्थकत्वंविश्वकोशादावुक्तं क्वचित्स्वसंयोगत्वं यथापरादिशाद्वेप्रकृतसूत्रेचसर्वेआग्रहणांविनिगमना
विरहात्।पूर्वस्मिन्पुरावितिपूर्वकालाध्यापनेकर्त्तरीत्यर्थः।दक्षिणोत्तर।ननुतसुरेवप्रत्ययोस्तुदक्षिणस्यां तट
दिशिदक्षिणतइतितुसर्वनाम्नोवृत्तिमात्रइतिपुंवद्भावेसिद्धं।नेष्यतइत्यर्थेतिसूत्रेनषष्ठीतस्यार्थेतिपाठ्यंतेनततो
ग्रामादन्यइत्यादौपंचमीवाधित्वापरत्वात्षष्ठीनेतिचेन्न।स्पष्टार्थत्वात्।अर्धमात्रालाघवेनादरेणत
थोक्तेः।प्राच्यामिति।लिंगविशिष्टपरिभाषयास्तातेर्लुकिविभक्तित्रयार्थंप्रकटयितुमाह।वसत्यागतइत्यादि।ए
नवन्यतः।अपंचम्याइतिप्रागसेरनुवर्त्तते।अदूरेइति।अवधिमानवधेरदूरइत्यर्थः।केचिदिति।अ
चसंतातुनअवस्थितविभाषयाविज्ञानादितितदाशयः।इयमेवात्रारुचिः।दक्षिणादाच्।चकारआजाहीत्यत्रवि
शेषणार्थः।तेनवाक्यस्मरणयोरङिदाकारवाक्यवृत्तिरितिभाष्यं।उत्तराच्च।चेनप्रवहितग्राजपिसमुच्चीं रामः
यतेव्याख्यानात्तदाह।उत्तरेति।संख्यायावि।विधस्यार्थइत्यर्थविधानंविधइतिघञंतेकिःविधशब्द २३५

चसाभिलाषमितिवहुतरप्रयोगदर्शनादिदमुक्तं।भाववृत्तिकादयस्तु किमोभावार्थं ग्रलं नेच्छन्ति भाष्यस्वरसोप्ये
वमेव।एतदस्त्रत।इदमोन्वादेशेश् इत्यतोश्नुवर्त्तते।एत दोनेत्सेदसिद्धे नुदात्तार्थं वचनं।ननु लित्स्वरे शेषनि
घाते नैवञतसोऽनुदात्तत्वे सिद्धे तयोस्तद्विधानं व्यर्थमिति चेन्न।लित्स्वरापवादे शो नुदात्तत्वे कृते लित्स्वराप्राप्त
त्ययस्वरेण च तसोऽनुदात्तत्वे प्राप्ते तत्सार्थक्यात्।अत्तो नेति।अतएतस्मा ज्झामादेरसर्थः।सप्तम्यंतेभ्य इति।सप्तम्या इ
त्येवानुवर्त्तते लुप्तस्वरितत्वात् नेतराभ्य इतीतिभावः।सर्वत्र देश इति।सर्वत्रिकालेइत्यपिबोध्यं।कालेइत्युपादा
नेन सर्वशब्दस्य तत्र कालापेक्षत्वाभावात्।अतएव वर्त्तमाने लडिति सूत्रभाष्ये नागतमतिक्रान्तं वर्त्तमानमिति त्रै
यं सर्वत्र च गतिर्नास्तीति प्रयोगे कालवृत्तित्वाविवक्षया दानकतइति कैयटः।विहितत्वादिति।सर्वैकान्येत्यसनेनएत
द्द्वाद्येस्पष्ट।तर्हीति।एतस्मात्तिद्वि भूतंयदीत्तदस्वंडमव्ययं।एतहीति।एतद इति योगविभागेनएतादेशः।अस्मि
न हनीति।पुर्वेण युक्ते यं काल इत्यर्थकेऽव्ययं पूर्वइत्यादौशक्ति मत्प्रधानताइदमहइत्यर्थेप्रिवेत्यन्ये व्यपदेशिवद्भा
९६ वेन सप्रयोग इत्यपरे।एद्युसिति।निपातनाद ... तोदतोयंभाष्ये ... चित्यपते।प्रकारवचने।पंचम्यर्थे सप्तमीत्याह।प्रका
रवृत्तिभ्य इति।वचनग्रहणात्प्रकारवत् वृत्तिभ्य इत्यर्थः।तेन प्रकारत्वेनास्य विशिष्य इति शेषः।सामान्यस्य भेदको विशे
षोत्र प्रकारः।वहुभिः प्रकारैर्भुंक्ते इत्यतो वहुभिर्विप्रोक्तैरित्यवगमात्।ताद्रूप्यं तु न गृह्यते।अन्यथा सर्वथेत्यादौत
दप्रतीत्यानभिधानात्।यथा हरिस्तथा हर इत्यादौ यत्प्रकारवान् हरिरिति बोधे हरिसदृशो हर इति फलतीति बोध्यं।
अत्यंतस्वार्थिकोयं।प्रत्ययं विनापि यथा समेत्र इत्यादौ प्रकारवचनत्वदर्शनात्।द्योतकत्वे तदर्थ सविशेष
णता पत्तिश्च।एवंजातीयविधावपि बोध्यं।स्थूलादिभ्यः कवि धोचैवमेव।स्थूलादीनामपि जोर्वाहीक इत्यादौग

ल०श०शे०
२३६ पृ०

दस्माद्बाहुलकात्कर्त्तरि ल्युट् । तत एव निपातनाद्दीर्घस्तत्र वर्त्तमानात्प्रातिपदिकात्स्वार्थे प्रत्यय इत्यर्थः । यत्तु यावद्
वृषायकर्षे तिशयेइति तावदतिशायन इत्युक्तमुपक्रममात्रं तत्र भावार्थकस्य कर्त्तृपर्यायघञंतस्य च तंत्रेणोच्चा
रणं बोध्यं । अथैर्गुणैरभिधीयत इत्युक्त्या कालमतिशेते कालो तिशेते इति विग्रह प्रदर्शनेन बाहुलकात्कर्त्तरि ल्युडि
त्युक्तं च । तथा भाष्याथलाभस्तदाह । अतिशयविशिष्टेर्थे इति । अतिशयकर्त्तृरूपेर्थे इत्यर्थः । भावे ल्युडिति तु
न युक्तं तत्रार्थे प्रत्यय इत्यर्थे तस्य प्राधान्यापत्तेः । अत एव भावे ल्युट् पक्षे लिंगवचनासिद्धिर्भाष्ये शंकिता । अ
तिशये वर्त्तमानात्प्रातिपदिकाद्दिलर्थे तिशयप्रकर्षादिभ्य एव प्रत्ययः स्यात् न यद्वादिभ्यः । न हि विशेषणी   द्वा६
भूतमादाय तत्रायं शब्दो वर्त्तत इति व्यवहारः सचेतसां । न चातिशयशब्दस्य तद्विशिष्टे लक्षणा । अभिभूयमानादेव प्र
त्ययापत्तेः । तलक्त्तरि लक्षणायां तु भाष्योक्तमेव साधु । अत एवं वा सामानाधिकरण्यं पक्वतितद्धितत्वेन व्यवहारो युष्म
द्युपपदे लटः शतृशानचावित्यादौ भाष्ये प्रातिपदिकार्थे तद्धितद्योत्यार्थस्य सामानाधिकरण्यमिति तदर्थः । तत्र
प्रकृत्यर्थद्रव्यस्य स्वरूपत इतराभिभवकर्त्तृत्वाभावेपि तत्प्रवृत्तिनिमित्तगुणादिनिष्ठेन तेन तत्स्यापि तत्त्वं बोध्यं गो
तर इत्यादौ प्रवृत्तिनिमित्तभूतजातेः स्वतस्तदभावेपि तत्सहचरितवाहदोहादिगतेन तेन तस्य तत्त्वं । एवं च तरबा
दिसमभिव्याहारे आढ्यादिपदानामितराभिभवकर्त्तृत्वविशिष्टे आढ्यार्थः प्रत्ययस्तु द्योतकः । कुमारितरा इत्यादौ
ङीपूर्वतुनतरप्प्रकृतिभूतेन तदंतघटकेन कुमारीशब्दादिना वयोविशिष्टार्थगतस्त्रीत्वस्योक्तत्वात्तरवंतस्य प्रकर्षः   राम:
वन २ प्रवृत्तिनिमित्तं । अतस्तद्विशिष्टार्थगतस्त्रीत्वे टाबेव यसी तिङी पूर्वयोमात्रविशिष्टार्थगते हि तत्प्रवृत्तिः । अत एव गो
तरेत्यादौ न ङीष् जातिप्रवृत्तिनिमित्तकत्वाभावात्तदुक्तं भाष्ये यदि प्रथमं तात्स्वार्थिकः कुमारितरेत्यादौ केवल   २३६
स्य वयसः प्रकर्षे वयोनतिरिक्तमिति ङीप्प्राप्नो तितरपोक्तत्वात्स्त्रीत्वस्य प्रत्ययेन भविष्यतीति तरपात्त

स्वार्थिकप्रसामान्यस्य भेदकविशेषरूपः प्रकारः स चाभिधानस्वाभाव्यात् क्रियाविषय एव गृह्यते तदाह । क्रिया
प्रकार इति । तदुक्तं भाष्ये विधियुक्तगतास्तु प्रकारा भवन्तीति । [illegible] धातुरूपेणेव धात्वर्थमित्यादाव सुपदिशतिभवतीति वा
क्रियावोध्या । चतुर्धेति । चतुर्भिः प्रकारैरित्यर्थः । अधिकरणसंख्यायास विचालनमन्यथाकरणं तच्चेह संख्यासंनि
धानात् तद्विषयमेवेत्याह । द्रव्यस्य संख्यान्तरेति । तदव[illegible]गवस्थपदान्तरस्य मात्मेव्याहारादिति बोध्यं । एकं पंचधेति ।
पंचत्वसंख्याविशिष्टमित्यर्थः । एकाद्धो ध्यातुग्रहणं धामात्रस्य यथा स्यात् । अन्यथानंतरत्वाद् धिकरणविचाले विहि
तस्यैव स्यात् । अत एव प्रत्ययो नाकारि अधिकरणविचाल एव हि निहितत्वादापत्तेः पदयने कर्म कं क्रियते सोधिकर
ण इति बोध्यं । ऐकध्यमिति । भुंक्तेइति । शिकुर्वि तिवापोषः । द्वैधानीति स्वभावात्सत्ववाचित्वं । एधाच्च । द्वित्र्योर्धा
इत्यस्य धाजित्यर्थः । पाप्पेया । याप्यमत्र कुत्सितं कुत्सा विशिष्टेर्थे वर्तमानात्पाश वित्यर्थः । अयं प्रवृत्तिनिमित्तकुत्सा
यामेव कुत्सित इत्यस्य प्रवृत्तिनिमित्तकुत्सायामपि प्रवृत्तिरिति बोध्यं । पूरणाद्भागे । पूरणप्रत्ययान्तात्प्रत्ययात्ताभ्याम्
गे वर्तमानादित्यर्थः । तीयादीकक् इति । वचनं द्रव्यं प्रस्फुसामेतत्र भाष्ये स्पष्टं । पूर्वं तमभागो नित्यावित । न च षष्ठाष्टमाभ्यां
भागार्थप्रतिपादनार्थं लुग्विधानं । प्रत्ययानां स्वार्थिकत्वेन प्रकृतेस्तदर्थलाभात् । पूरणाद्भि कं तु तत्वाप्यावश्यकं
स्वरस्तु लुकि नास्त्येवेति न लुमतेत्यत्र भाष्ये स्पष्टं । एकाद् । असहायवाचकादेकशब्दादित्यर्थः । असहाये किं प्रसि
द्धत्वात्संख्यावाचकस्यैवान्यत्रेवात्रापि ग्रहणप्रसक्तौ द्विवचनाद्यसिद्धिः स्यात् । वाक्यभेदेन कनाकिनिचौ रेव
लु[illegible]ग्विधानसामर्थ्यात् सदो ग्रहणमपि । भूतपूर्वे चरट् । तत्रार्थे वर्तमानात्प्रातिपदिकादित्यर्थः । पञ्चम्यात् । अत्र भूत
पूर्व इत्यनुवर्तनं भूतत्वात् षष्ठ्या विशेषणं भूतपूर्वे संबंधे या षष्ठी तदंतात्तत्वापे धृत्य यो त एव स्वार्थिकप्रकरणवि
रोधो न । अतिशायने । अतिशे[illegible] नो भिभवोर्थः । एवं च स कर्मका

कुट

राशि

घेतदुपन्नंभवति। अयंमेऽप्येष्टोमध्यमोयंकनीयानित्यादौतवत्सूत्रस्यभाष्यप्रयोगात्त्वात्ह्येयोपपदे यीमोसाधुःसू
त्रेद्विवचनेति तूदाहरणमात्र मितिकेचित्। परेतुनेदं शिकानामघ्नेन्येभ्यःश्वेभइत्यभ्याहृत्साविभज्योपप देत
रप्‌आभ्यामित्यध्याहृत्सां लेईयसुन्। अतएवनखल्वपिबहूनांप्रकर्षेतरपानभवति अंकेनुतर्हितमपेतितमसू
त्रेउक्तमित्याहुः। नत्तरामित्यादौप्रतियोग्यसमानाधिकरणत्वे तपासंतिकत्वेऽभावगतेप्रकर्षेतरप्। प्रवृत्ति निमित्त
गतेप्रकर्षेतरबादिरितितुप्रकृत्यर्थप्रकर्षासंभवविषयएवं। द्योत्यार्थप्रकर्षे पिद्योतकातरप्। यथाजितरांगच्छतीत्या
दौ। तुश्छंदसि। पूर्वनियममावर्तितप्रतिप्रसवत्वंस्फुटंबोधयितुंछांदसमप्यत्रोपन्यस्तं। तुरिष्ठेमनिचुग्रहण
९७ मुत्तरार्थं। नचेतरावज्ञाप्यकादिष्ठनीयसुनोःसिद्धौतुछंदसीतिमर्थमितिवाच्यं। इमनिचोपिकल्पनापत्तेः। लोके
पीष्ठनादेरापत्तेश्च। यद्यपिनिमित्तस्यछांदसत्वादिदंछांदसंतथापितस्येवेहोपन्यासादिदमप्यत्रोक्तं। लोपइति।
वचनसामर्थ्यात्सर्वादेशः। अंत्यस्यटेरित्यनेनसिद्धेः। प्रशस्य। अजादीइत्यनुवृत्तं। सप्तम्याविपरिणम्यतेइत्याह।
अजाद्योरिति। प्रशस्यत्वंगुणइत्यजादी। तस्यक्रियात्वे विअतरएवज्ञापकात्तौ। प्रकृत्यैकाच्। इष्ठादिष्विति। तेन पस्येति
श्रोदेवतास्यस्त्रुःस्थालीपाकइत्यत्रनेदं। अयंचप्रकृतिभावोऽल्लोपोनोनस्तद्धितेचटेरित्यादे रेतत्प्रकरणस्यलोप
मात्रस्येतिभाष्येस्पष्टं। अंतिकवा। अत्रनेदसाधोहलंतावेव। अन्यथाप्रकृत्यैकाजितिसूत्रस्य [illegible]
भाष्योक्तरीत्याश्रेष्ठइत्यादुच्चारणसामर्थ्यादकारस्यलोपाभाववदत्रापितदभावापत्तौनेदिष्ठइत्याद्यसिद्धेः
उत्तरसूत्रस्थकन्साहचर्याच्चकनिष्ठइत्यादौटेरितिलोपस्तुनप्रकृतिभावात्कनेस्तदपवादत्वाच्चनस्त
द्धितइत्यपिनअनउच्चारणसामर्थ्यात्। सर्वादेशस्तुकेत्यादेशेनापिसिद्धइतिबोध्यं। स्थूलदूर। यणादीतिलुप्त रामः
षष्ठीकंपदमितिषष्ठ्यर्थेप्रथमा। पूर्वत्वेवधिस्तुयणादेरेव। यणादीतिबहुव्रीहिः इक्परिभाषयाद्विप्र २३७

स्यकतिभूत्तेन वचोविशिष्टार्थगतस्त्रीत्वस्योक्तत्वादिसर्थः। एतद्वुत्तरटा वपि नप्राप्नोतीत्यादिभाष्यमेकदेशिनो
रुक्तिरिति बोध्यं। आतिशायनिकप्रत्ययपातादातिशायनिकोनानभिधानात्। श्रेष्ठतमायकर्मण इत्यादिकं तु छांद
सत्वात्स्वार्थे साध्विति सर्वं भाष्ये स्पष्टं। अतिशायनेति। प्रकर्षादित्वात्तृतीया। तिङश्च। अप्रातिपदिकत्वादप्राप्ते वचनं।
किमेत्तिङ। किमादिप्रकृतिकघादिसर्थस्तत्फलितमाहाव्ययाद्घ्योर्थइति। किंतमामिति। आमन्तस्याव्ययत्वात्ततः पर
स्य सोर्लुक्। पूर्वाह्णेतरामित्यादौ ततक्रिया विशिष्टस्यैव तत्तत्कालव्यवहारनियामकत्वात्तद्गुणद्रव्यप्रकर्षः। उच्चै
स्तमइति। उच्चैःशब्दोत्रोच्चत्वगुणवत्परः द्रव्यस्य प्रकर्षाभावे विद्यमाननिष्ठगुणादिप्रकर्षे एवं द्रव्यप्रकर्षं इ
स्वतः द्वे ति बोध्यं। तदुक्तं तरप्सूत्रे कैयटेनाद्रव्यप्रकर्षइति निषेधउपचरितगुणक्रियागतप्रकर्षे द्रव्यविषयो द्रष्टव्य इति।
उच्चैस्तमामित्यत्र त्वधिकरणशक्तिप्रधान उच्चैःशब्दस्तत्रोच्चत्वप्रकर्षे एतदाश्रयस्य प्रकर्षे पितस्य न द्रव्यसंक्रि
ना०८ याकारकभावरूपविशेषणत्वेनैव तस्याभाने प्रधानतया सर्वनामपरामर्शयोग्यत्वात् शक्त्याविष्टस्य सर्वनाम्ना
परामर्शाभावाच्चात एव तदादिशब्देभ्यस्तत्रादिभक्तयः पालिं चिदिदं तदादितिसर्वनामपरामर्शयोग्यं वस्तुतः द्रव्यत्वेन
विवक्षितमिति तरप्सूत्रे कैयटोक्तेः। तत्परामर्शयोग्यता च प्रधान एवेति स्पष्टमेव तत्र तच्छक्तिविशिष्टे चात्र प्रकर्ष
इति न द्रव्यप्रकर्षः। इदं पूर्वाह्णेतमामित्यत्रापि बोध्यं। द्विवचनविभज्यो। द्व्यर्थप्रतिपादकोविभजनीये चोपपदे
द्वयोर्मध्ये न्यतरापेक्षातिशयविशिष्टस्वार्थे वृत्ते विभागप्रयोजकीभूतधर्मवाचकाच्च स्वार्थे प्रत्ययः। विभज्यांशेउ
पपदे शब्दबोधितसुबंतत्वं प्रातिपदोक्तत्वात्सा पञ्चमी विभक्ते इति विहितपञ्चम्येवेति बोध्यं। तेन सांकाश्यकानां पाटलि
पुत्रकाणां च पाटलिपुत्रका आढ्यतमा इत्यत्र न तरप् पञ्चमी तत्र न विभागस्यैवाभावात्। चेन सम्रूह रूपतयाउ
विभागस्यापि सत्वात्। एतेरवत्वपि नैदे शाकानां वार्तिकाइति तस्मिन्निति सूत्रे भाष्यप्रयोगाद्द्रष्टव्ये

पदिकादिस्वर्थाः। स्वार्थिकानां प्रकृतितो लिंगवचनांगीकारात्। बहुगुडो द्राक्षा ऋषभकल्पइयं गौरित्यादि सिद्धं गुड
कल्पा द्राक्षेति तु क्वचित्प्रकृतितो लिंगवचनातिक्रमात् सिद्धं एवं च स्त्रियामिति सूत्रे स्त्रीग्रहणं तदतिक्रमः। अन्य
थाणचः स्त्रियां विधानादजश्च स्वार्थिकत्वात्सिद्धौ किं तेन। गुडशब्दस्य सादृश्याद्द्राक्षायां वृत्तिस्तत्र सादृश्यप्र
योजकधर्मस्य माधुर्यादेरीषदसमाप्तिर्यन्निरूपितसादृश्यप्रयोजकधर्मस्येषदसमाप्तिस्तद्वाचकात्क
ल्पादयः स्वभावात्। एवं च पटुः पटुः कश्चित्तत्सादृश्यादन्यः पटुकल्पः प्रचुरसादृश्यं च पटुः कल्पशब्द
गम्यमिति सर्वत्रोपमागम्या द्रष्टव्या। विभाषा सु। विभाषाग्रहणं कल्पबादिसमावेशार्थं कल्पादयस्तिङः तेषु
सावकाशा वाक्यार्थं तु न तत् तस्येष्टत्वे महाविभाषयैव सिद्धेऽनिष्टत्वे तु न तदर्थता तस्येति बोध्यं। सुप्ग्रहणं
तिङः प्रत्ययस्यात्रासंबंधयत उत्तरत्र त्वनुवर्त्तते एव। पुरस्तादिति प्रत्ययपरत्वनिवृत्त्यर्थं तु ग्रहणं पुरस्तादित्यस्या
कस्या पुरस्ताद्यादृशे लिंगवचने तादृशे एवेत्यर्थबोधनद्वारा स्वार्थिकानां प्रकृतितो लिंगाद्यतिक्रमे ज्ञाप
कं। वृत्तौ प्रागेवेत्येवकारः सर्ववाक्यस्यावधारणमिति न्यायसिद्ध इति सर्वं भाष्ये स्पष्टं। प्रकारे। अत्र प्रकारो
भेद एवेति जयादित्यः सादृश्यं भेदश्चेत्युभयमपीति प्रकारे गुणवचनस्येत्यत्र वामनः। पालस्तु प्रकारमात्रे ... इति
तत्रापि प्रकारवचने इत्यस्य वाक्ये: सोपि प्रकारवति न्याय्य इति चिंत्यं॥ किंच तथा सति तप्येत्यादेः सप्रकार इत्यादि
र्थः स्यात्। न च यथा लाजातीयरो बाधापत्तौ तज्जातीय इत्याद्यसिद्धिरिति वाच्यं। जातं ता छवं धुनी सनेन
सि... ष्टेष्टापत्तेः। वामतोक्तरीत्यादित्वेन वष्याला पिबाधो नेष्यते इति वक्तुं शक्यत्वाच्च। अत एव यप्याजाती
यक इत्यादि भाष्यप्रयोगाः संगच्छन्ते। अव्ययसः। अयमप्यधिकारः। अज्ञाते इत्यादौ तु वाक्यभेदेनाकचोपि
विधानं बोध्यं। कस्यायमिति। अज्ञातत्वाभिन्नयोयं अज्ञातो श्वइत्यपि विग्रहो बोध्यः। अममेति सूत्रे त्राति रामः
२३८

अनुकरणमात्र १

छुद्र्योः पकारदकारयोर्न गुणः। युवशब्दस्यागुणवचनत्वादत एव ज्ञापकादजादौ। अन्ये तु गुणवच
नाएव। न चादिप्रक्षुद्रावगुणवचनो इमनिचि तदग्रहणस्य चारितार्थ्यात्त्वयोरिष्ठनाद्यनापत्तौ दोषिष्ठ
इत्याद्यसिद्धेः। वस्तु तो युवशब्दो गुणवचनो पीत्याकृगरस्तूने जातिरस्त्रीति सूत्रभाष्याभ्यामालभ्यते। प्रियस्थि
र। वंहीयादावि कारउच्चारणार्थः। अन्यथा भीयादिसिद्धत्वादिकारोच्चारणसामर्थ्याद्धाकारादावि वटिलोपो नाप
त्या वंहिष्ठ इत्याद्यसिद्धेः वरादित्याह चर्यादौ दो हलंतः तेन ढंदिष्ठ इति। प्रस्थस्फोस्तुवेष्ठ इत्यादेर्भाव्ये
उदाहृते लेनादंत एव। प्रेष्ठ इत्यादौ सवादेशस्यासिद्धत्वादकृतिभावान्न। तन्निमित्तकटिलोपो न स्था
निनिमित्तकोपि। प्राद्यादेशानां टिलोपापवादत्वात्। बहोर्लोपो। इष्ठनश्चतरसूत्रेण कार्यो तस्य विधाना
त्स्पेहनग्रहणमिस्यासिश्यप्येनाह। इमेयसोरिति। लोपश्चादेः परस्येत्यादेः। भावस्यासिद्धत्वाद्भूमानित्य
त्रो गुणेन दीर्घोच्चारणं तु भूमेत्यादौ सावकाशा। कनिष्ठप्रकृतिभावाद्धिलोपादिन। विन्मतो लुंक्।
अजादीत्यनुवृत्तेराह। इष्ठेयसोरिति। अत एव ज्ञापकादिमाजादौ। न च विन्विषयमतुपः स्त्वेन
तल्लुकेवासिद्धो विन्नग्रहणं व्यर्थमिति वाच्यं। तकारेतीं त्यादिना ण्यन्तीस्य वन्दादेन विनोलुगर्थं तत्स्वत्वाद्धि
त्वकादिप्रभृतेस्त्वेतु तस्यैव विन्मतोरिष्ठेमेयस्सुतुरिति नोक्तं। तत्र सलुक्यपदस्यासवरितत्वादत एव तु रे
स्त्रलोपइत्येव [illegible] प्रारब्धातं। प्रशंसायां रूप। प्रशंसाविशिष्टेर्थे वर्त्तमानात्स्वार्थे रूपविधिस्यर्थः। प्रशंसा
चात्र परिपूर्णत्वं रूपप्रत्ययस्य प्रकृत्यर्थतावच्छेदकधर्मनिष्ठा तत्समानाधिकरणधर्मनिष्ठा वाप्र
कर्षे आरोप्यते। तेन चोररूपोयं यद्दृष्टारंजनं हरेदिति सिद्धं। प्राशस्त्यप्रतीतिर्या जिनिरपेक्षमात्ति
शाय नं तु तत्सापेक्षमिति न तदनुवृत्त्यानिर्वाहः। ईषदसमा। ईषदसमाप्तिविशिष्टे वर्त्तमानात्स्वाति

ल०शा०शे० पू० २३९

तस्यात्राप्रवृत्तेः। अत्राजिनांतस्येत्यत्रलोत्तरपदेतिष्ठपकयदंलुप्तविभक्तिकं तेनलोपपदमेवानुवर्त्तते तएवषष्ठ्याजा
द्विर्वचनात्सिद्धमितिसंगच्छते अतिप्रसंगस्त्वनभिधानाद्वार्णीयः तेनसावित्रियइत्यत्र राजा दावित्तिलोपोन
उपेइदंतेचचतुर्थ्यादेश्चइतिलोपोन। विनापिप्रत्ययमिति। समुदायशक्तिग्रहकालेवयवानामपिशक्तिग्रहाद
वयवतोपितद्बोधः। एवमेवग्रामविशपिंडीमित्यादौवाक्यैकदेशाद्वाक्यार्थबोधः। अस्यैवानुवादकमिदं वर्णमा
त्रप्रयोगस्तुनततोऽवबोधात् उवर्णेऽत्रलइति। लोपस्यपूर्वाचार्यसंज्ञाउवर्णात्परस्येलप्रत्ययस्यलोपःसचादेः
परत्वेन द्वितीयादच्चऊर्ध्वलोपःसूत्रसिद्धएवानूद्यते अप्यवर्णादपीति। भाष्येनदृष्टम्। पूजार्थमिति।
ठन्वैसतोवेत्यनुवृत्त्यैवसिद्धेरितिभावः। उपडइति। नेडस्येतिज्ञापकेनपूर्वोत्तरपदनिमित्तकार्यापेक्षयांतरं
गस्याप्येकदेशस्यपूर्वमप्रवृत्तेः। द्वितीयसंध्यक्षरश्चेदिति। एकपदेपीदं संध्यक्षराण्येच। एकाक्षरेति। अक्ष
हितंव्यंजनमक्षरं एकाच्कूर्वं पदानामित्यर्थः। द्वितीयादच्चऊर्ध्वमित्यनेनद्वितीयाज्विशिष्टस्यलोपोप्राप्तेरिदं॥
वागाशीर्दत्तइति। वाक्आशीर्यस्यतेनदत्तोवाक्यएणशुभाशंसनेनदत्तइतिवार्थः। अत्रैकादेशपर्यंतं तत्तत्सपा
दसप्ताध्यायीस्थकार्यप्रवृत्तियोग्यतयानपूर्वं कुत्वादिप्रवृत्तिः। यद्यपिद्वितीयादच्च [illegible] ऊर्ध्वस्याशीर्दत्तश
ब्दस्यलोपेयस्येतिलोपेचातेइकनिमित्तभसंज्ञासत्वात् कुत्वाद्यप्रवृत्तावपिदं सिध्यति। तथापिभत्वेऽल्लोपस्य
स्थानिवत्वादाकारांतनिष्ठभत्वेनचांतनिष्ठपदत्वाभावात्। कुत्वजश्त्वयोर्वाणिकइतिस्यादितिभावः। न
चसाक्षात्परं परपावापदांतविध्यादिप्रापकस्यप्रतिबंधकस्यवास्थानिवत्वस्यानिषेधइतिसिद्धांता रामः
ल्लोपस्यानिवत्वनिषेधइतिवाच्यं। बहिकेपिदोषापत्तेः। यदित्वत्रद्वितीयादच्चऊर्ध्वस्यलोपविधाय २३९
कवचनप्रामाण्यात् ल्लोपस्यानिवत्त्वतर्हि प्रकृतेपितुल्यं। एतेनपूर्वत्रासिद्धीय इति निबेधोज

पदिकादिति तु सुप इति च संबध्यते तेन क्वचित्सुबंतावयवप्रातिपदिकटेर्ग्रहणं क्वचित्सुबंतटेर्ग्रहणं तत्रैव
स्यामाह । ओकारेति । इदं वाक्यं युष्मदस्मच्छब्दमात्रविषयं भाष्ये तयोर्वोदाहरणं तु । अन्येषां तु सर्वनाम्नां
प्रातिपदिकटेरेव प्रागकच् । अत एवकादेशः साकच्कार्थः कः कौ के इत्येवमर्थमिति भाष्ये संगच्छते । त्वय
केति । पत्वादिसुकृते त्वकच् । पचतकीति । अकचो द्वितीयो ककार उच्चारणार्थ इति भावः । कुत्सिते । येन
धर्मेण कुत्स्यते वस्तुतस्तद्धर्मयुक्ता [illegible] भिधायिनः प्रत्ययः । अश्वक इत्यादौ धावनादेः सम्यगननु
ष्ठानात्कुत्सितत्वं बोध्यं । कुत्सितगतकुत्सायां कुत्सितक इत्यादि प्रकृष्टतम इतिवत् । संज्ञायां कन् । कुत्सादिहेतु
कसंज्ञाविषये कन्नित्यर्थः । तद्युक्तादित्यस्य विवरणमनुकम्पायुक्तादिति । धानकाइति । धानाशब्दात्के केण इ
ति ह्रस्वे कान्ता द्वापि अभाषितपुंस्काच्चेति विकल्पात्पक्षे इत्वाभावः । पूर्वेणेति । अनुकंपायास्तद्विषयत्वादिति
भावः । परंपरासंबंधेपीति । आरम्भसामर्थ्यादिति भावः । अनुकंप्यमानो दानादिना राधयतीति धानादेरनुकं
प्यमानसंबंधादनुकंपायुक्तत्वमिति बोध्यं । ठच्चेति पदे कः । पूर्वसूत्रे द्वयेपि । अनुकंपायां नीतौ चेत्येतत्
व्याख्यानादिति भावः । घनिलचौ । पूर्वसूत्रेणैव ठच्कयोः सिद्धौ योगविभाग उक्तविषयातिरिक्तेपीति तेन ठच्
सिध्यर्थं च चकार इत्येके । ठाजादौ । अस्मिन्निति । बुद्धिसन्निधानादिति भावः । ननु ठग्रहणं व्यर्थमिकादे
शे जादित्वासिद्धेरत आह । ठग्रहणमिति । तस्मिन्हि वायुदत्तशब्दात् ठे नित्यत्वाद्ठावस्थायां लोपे कादेशे वा
युक सिद्धिः । अन्यथा मा भूदिति कवत्त्वं निपातपरिभाषया कादेशाभावेन हि [illegible] ध्येदिति भावः । न च ठच् अस्मि
लेन ज्ञापकेनेकादेशः सर्वतः पूर्वविप्रतिपत्तिरिति वाच्यं । ज्ञापकसिद्धस्यासर्वत्रिकत्वात् । ठग्रहणसामर्थ्याद्धि

ल०श०शे०सू०
२५०

इवार्थोपमानत्ववृत्तिवर्त्तमानात्प्रातिपादकात्तान् यदुपमेयं साप्रतिकृतिश्चेत्सर्व्वः। प्रतिकृतिर्मृदादिनिर्मिता प्रतिमा।
प्रकरान्तरे स्वार्थिकप्रकरण विरोधः। अध्वक इति उपमानान्याभिन्ने ति बोधः। लुम०। असत्तु मुं प्रकृतिवल्लि
गायवचनं तु। विशेष्यवदेव। हरीतक्यादिषु व्यक्तिरिति अत्र पाठात् तेन चंचेमनुष्याविसेव। देवलकानामिति। प्रति
मां गृहीत्वा भिक्षार्थं प्रवृत्तिगृहमटतामिति सर्व्वः। तत्तदायतनेषु प्रतिष्ठापित पूजार्थं प्रतिमासु चित्रेषु नटेषु च भ्रमा
त्मिकाश्चिवाभेदबुद्धिरेव न तु साद‍ृश्यबुद्धिरिति प्रत्ययोत्पत्तेरेवाभावः सत्यं च चित्रनटविषयेतादृशीबुद्धी रस
प्रकरणे शंकुकमतनिरूपणावसरे प्रकाशकारेण तायस्तु तत्र तद्बुद्धे भ्रमत्वाभावो युक्तः सत्वनंतरावती एवा
थायाएवबुद्धेस्तत्र भ्रमत्वेनप्रक्रमान्न विरुद्ध इतिदिक्। अर्च्चासु पूजनार्थासु चित्रकर्मध्वजेष्विति देवपथा
दिषु पाठात्तत्र न दोष इतितत्त्राजसे तिसूत्रे कैयटप्रकृतसूत्रे प्रवृत्तावप्येतत्। निवृत्तमिति। अस्वरितत्वाद
नुवृत्तिरेवात्र निवृत्तिः। शाखादिभ्यो यदितिपाठः। य इतिपाठः मुखा [illegible] दीनामाद्युदात्तत्वदर्शनात् उणवा
दिसूत्रभाष्यविरुद्धत्वाच्च। भवआत्मवान्। अभिप्रेतानामर्थानां पात्रभूत इतियावत्। तद्धि धयादिति। इवार्थवि
षयसर्व्वविषयवकादित्सर्व्वः। भाष्ये तथैवोदाहरणात्। इवार्थविषयसर्व्वविषयवकादिवार्थोपमानत्ववृत्तिवर्त्तमाना
च्छइत्सर्व्वः। अत एव शस्त्रीश्यामेसादाविवाप्येष्टेन। काकतालमिति। द्वंद्वान्विवार्थेन। काकतालीयइति। काक
इवतालमिवेति इवार्थे इत एव ज्ञापकात्सुप्सुपेति समासः। तत्र पूर्वपदमुपमानकाकागमन समानाधिकरणचौरपतनपरः
परमुत्तरपदं चोक्तपूर्वपदार्थस [illegible] मानाधिकरणोपमानतालपतनपरस्समुदायश्चोपमेयदेवदत्त गमनसमाना
धिकरणचोरपतनपरः। एवं चोपमानकाकागमनसमानाधिकरणोपमानतालपतनोपमेयदेवदत्तगमनसमा
नाधिकरणचोरपतनमितिसमासार्थः। विशिष्टे विशिष्ट निरूपितोपमेयत्वबोधात् विशेषणे विशेषण निरूपित राम:
२५०

240

शिच्चनेतिनिषेधश्चास्पादिलपास्तं।नपदांतस्सूत्रोक्तरीलातैयोः पदांतजश्लेष्प्राप्तेश्चोत्तरपदलोपेत्वक्कला देशु
त्वेनस्थानिवत्वाभावात्तुल्यावधिकृयाभसंज्ञापापदसंज्ञाबाध्यतेतत्रतद्धिताश्रयायाविभक्त्याश्रयाश्रवाध्यसामान्यवि
तयापवादत्वाद्बाधः।पूर्वछेति।स्पष्टंचेदंस्वादिष्विति सूत्रे भाष्ये।शेवतस्तु।रमामिति।शेवलादयश्चादिभूतायेषांतेषा जि
मित्यर्थः।एवामकृतसंधीनांतृतीयाद्यचइतिवक्तव्यंतेनसुपथीशीदतिशब्दादूचिसुपरिकइतिसिध्यति।अजिनांतउत्तर
पदग्रहणंसर्वलोपोत्र।अल्पेअल्पत्वंमहत्वप्रतिद्वंद्विह्रस्वत्वंदीर्घत्वप्रतिद्वंद्वीतिभेदः।कुत्सितेकृतिलिंगात्तिक्रमस्यापि
सत्वेनाह।कुटीरइति।कासूःशक्त्यास्प्रेशस्त्रविकलाक्तु।किंयत्तदो।द्वयोरेकस्यनिर्धारणेजयेनिर्धार्यमाणवाचिभ्य
किमादिभ्योडतरजित्यर्थः।द्वयोरितिपलक्षणं।अतएववहुषासीनेषुकश्चित्कथित्रछतिकतरोदेवदत्तइतिप्रत्ययइति
सूत्रस्थभाष्यप्रयोगःसंगच्छते।एतद्धिनयिनुमेवसूत्रेएकग्रहणं।द्वयोरितिनिर्धारणषष्ठीआख्यानादेवभविष्यतीति
तं।अत्रनिर्धारणंनप्रत्ययार्थः।तदपि नापिप्रतीयमानतयान्यलभ्यत्वात्किंतुविषयनिर्देशइतिवृत्तौ।वावहूनां।प्र
त्याख्यातमिति।द्वेपार्थस्यत्वन्नभिधानान्न।अतएवततोडतरच्च।प्राक् टेरिति।पूर्वसूत्रस्थद्वयोरित्यस्यप्रत्या
ख्यानभाष्यवाख्या वसरेकैयटग्रंथेइत्यर्थः।अतएवकतमाकतमेषामाद्यन्ते तिपदद्वित्वप्रकरणेभाष्यप्रयोगःसंगच्छ
ते।तेनकतमोभवतामध्यापकःकठोदेवदत्तोवेतिसिद्धं।वाग्रहणमिति।न्यावययसर्वनाम्नामित्यधिकारत्वात्तदनुवृत्त्यैवसिद्धे
वाग्रहणंव्यर्थमितिवाच्यं।तन्निवृत्तिज्ञापनार्थत्वात्।तेनडतरजिविषयेनाकच्।महाविभाषयेति।अतएववावचोपणडइतिसू
क त्रेकएतयोरर्थयोर्विशेषइतिभाष्यप्रयोगसंगच्छते।तस्मादयः प्राग्वचोपणकेनोनित्याःप्रत्ययाइतितुप्रायिकमितिभावः।
किमइति।वहुष्वासीनेष्विस्यादिभाष्यप्रयोगादितिभावः।एकाच्च।प्राचामितिपूजार्थं।वाक्यस्वेच्छत्वे महाविभाषयै
वसिद्धेः।अकजर्थमपिनतस्यानित्यत्वादितिस्पष्टंभाष्ये।येनेतरइति।अवद्योपणइतिकरणेलघुडेतिभावः।इवेप्र०।

241

स्थूलादिभ्यः प्रकारो भेदः सादृश्यं च आख्यानात्तद्वृत्तिवर्त्तमानादिसर्थः। जातीयपरोपवाद इति। जातीयविधौ भेद एव प्रकार इ
तिजयादिसमन्ते पवाद इत्यस्य परत्वाद्बाधकः। तत्राप्युभयं गच्छते इति वामनमते यथाश्रुतमेव। अनसं। अनसंतग
तिरशेषतः संबंधाभावः। सामिकृतमिति। समासे पि सामी त्वस्य क्रियाविशेषणत्वेन कारकत्वात्समुदायस्य क्तांतत्वं। कृद्ग्र
हणे गतिकारकपूर्वस्यापि ग्रहणादनलंतगतिरित्यस्य पद्यपीतादि। अकृतमेवेति। समस्तत्वेतदेकदेशसामिशब्देने
त्यर्थः। असमस्तत्वे तत्त्वानि हि तेनैतनेत्यर्थः इदमेवेति। असतथापीतादि। बहुतरकमिति। यदितु बहुतरकं पेकना हू
सुकरतरकमित्यादि तना घंतात्स्वार्थिकेन्वत्तमइति वचनेनयावादित्वात्स्वार्थे सिद्धमित्युच्यते तदानास्य प्रयोजनं
एतदेवाभिप्रेत्येदं भाष्ये प्रत्याख्यमेतदेव भाष्यतस्याकृतिगणत्वेनानं। विभाषाग्रहणादिति। प्राक्प्राचीनमिति रूपद्वयं
महाविभाषयैव सिद्धमितिभावः। तदस्यनित्यत्वे ज्ञापकमितिभावः। तेनाशितं भवित्यादौ असाधुरितिबोध्यं। आशिता गावइ
त्यादितु स्वप्रत्ययप्रकृतेर्थे कथनं। इयमप्यभ्युच्चयमुक्तिः। वहतीजात्यंता इति बहुवचनेनास्यापि ग्रहात् जात्यंताच्छ
से वास्यापि स्वभावतो नित्यत्वलाभात्। अंचतेः स्वस्यनित्यत्वाभावाय विभाषाग्रहणमिति भाष्यसंमतः पंथाः। प्राकृन
इति। तेनावद्धोपण्ये कन्वैकाल्पिकरवेतत्त्वायिकुमित्युक्तं। वहतीजास्यंताः। कन्वेवछ्यः। अदिक्स्त्रियामिति कर्मधार
यगर्भो नञ्तत्पुरुषः। प्रागिति। अस्त्यास्तंतप्राग्विदेशाइत्यर्थकं निर्लिंगं। खांतत्वाधेयप्रधानतयास्वभावा लिंगयो
गिलिंगं च नपुंसकमेव लिंगसर्वनामत्वात् नस्त्रीत्वादिप्रकृत्यासहास्यंतविरोधापत्तेरेकवचनं च। एवं च ग्रामावधि
कप्राग्देशवृत्तयग्रामाइतिबोधस्तदाह। प्राचीनमिति। पदसंस्कारपदेइदं यदा प्रागादिशब्दास्तद्देशकालस्था
म्रादिबोधकास्तेभ्यः अस्तदोपस्थितविशेष्यलिंगत्वाणे मानाभावात्प्राचीनाः ग्रामाः प्राचीनावाटी प्राचीनं व रामः
नमित्यादिकमित्यनत्त्रमानं चिंत्यं। प्राचीदिगिति। लिंगविशिष्टपरिभाषयाप्राप्तिः। प्राचीनं ग्रामादिति। अत्रप्रा २५१

तद्विशिष्येच विशेष्यानिक्तपितं तत्सर्यवस्यति। तत्तदुपमेयबोधे तत्तदुपमेयवाचकस भिव्याहारस्तंत्रं ततस्तद्धितसम = धः २
भिव्याहारे समासार्थोपमानभू त तालकृतकाकवधोपमेयः समासार्थोपमेयप्रयोज्यश्चोरकृतदेवदत्तवध इतिबोधः।
द्शक्ति एकार्थीभावबलाच्चैतदर्थलाभः। एतेन परस्परं सामर्थ्याभावाद्वृत्तिद्वयमपि दुर्लभमित्यपास्तं। तत्फलितमाह। इह काके
स्वभावात् २ त्यादि। अत्र सर्वत्रातर्कितपतनत्वं साधारणधर्म इत्याह। अतर्किते ति। पद्गेड णिति। अन्यतरस्याग्रहणमनंतर
ठकः समुच्चयार्थमिति भावः। एकशालाशब्दस्यागुल्यादिषु पाठादिति भावमन्ये। ऋणात्। ऋणेति न स्वरूपग्रहणं
व्याख्यानात्। अथामणीवाचकपूर्वविषयकाभिन्नात् ऋणवाचकादित्यर्थः। लोहितध्वजपइति। लोहिताध्वजायस्य पू
गस्यस एवलोहितध्वज्यः। व्रात च्यः। शरीरायासजीवीनानाजातीया नामनियत वृत्तीनां संघो व्रातः। च्फञिति। गो
त्रे कुंजादिभ्य इत्यनेन। अस्त्रियां किं। कौंजायनी। टिलाड्डीविति। टित्वसामर्थ्यादस्त्रियामिति अत्र न संबध्यत इति भावः।
तद्देशेति। व्याख्यानादिति भावः। जानकिस्त्रिगर्तः। पञ्चादियो। अत्रास्त्रियामित्यनुवर्त्तते यञश्चेति सूत्रस्य भाष्यप्रा मा प्राट
ण्यात्। तेनपर्शूः स्त्री स्यट्टेरणएव विधायकयोष्टित्वसामर्थ्यादसंबंधे ऽप्यत्रासंबंधेमानाभावात्। अभिजिदइति। अ
पत्याणंताद्यन्नं तस्य स्वार्थिकत्वेन गोत्राप्रत्ययकत्वादाभिजित्यमित्याद्यभावेति विग्रहेतु वुञ् आपत्यस्येति यलोप आभिजितकः।
अयमपत्याणंतेभ्यएव तेनाभिजितोमुहूर्तइत्यादौ नस्यः चेदं सर्वं भाष्ये ऽस्त्रियामिति चात्र संबध्यते। अनैमित्तिकत्वा
र्थमिति। ननु तन्द्रावभावित्वरूपनिमित्तत्वस्य सहविधाने पितन्द्रावोत्तरभावइत्यर्थं वत् तन्द्रावसमकालभावइत्यपितद
र्थात्। अतएवाध्यान्विकाप्यौरित्यत्र वलोपएव कार्यो न धातुलोप इति गुणनिषेधसिद्धेरकारादेशविधानं व्यर्थं
मित्याशंक्यत त्सत्वाख्याने गुणवारणाय तदिति भाष्येऽक्तमिति चेन्न लोपवचनसामर्थ्यादचः परस्मिन्नित्यत्र तथा
निमित्तत्वानाश्रयणात्। दं ड्य दंडोदं डनं। भवसर्गसाहचर्यात्। एतयोरर्थयोविवियेत्यर्थे बुनित्यर्थः।

वेति स्पष्टं। हास्तिके यदादिग्रन्थेऽस्यान्यत्र निरूपितं। द्वौ पाकावित्यादौ न सुजादिक्रियाजन्मगणनस्याभावात् तद्गण
नार्थत्वे पाकावित्यादौ द्विवचनाद्यनापत्तिः। अत एव बहिः प्रयोगाविति न तदुक्तं भाष्ये द्वौ पाकावित्यत्र कस्मान्न भवति
नैतत्क्रियागणनं अभिमुखीप्रव ... त्तिरभ्यावृत्तिरिसा ... च जन्मरूपा एवं च नैतत्क्रियाजन्मगणनमिति तदर्थ
इति निरूपितं भाष्यप्रदीपोद्योते। यद्यपि संख्यागणना लौकिके वत्याधिगणन इति गणनायां ये प्रसिद्धास्तेषामेव ग्र
हणार्थं तेन युग्मोभादिशब्दान्नेति दिक्। विभाषाव। अविप्रकृष्टकालक्रियाजन्मगणनवृत्तेरित्यर्थः। प्राचुर्ये ग्रे
ति। व्याख्यानादिति भावः। भावेऽइति। प्रचुरस्य वचने बोधने सति प्रातिपदिकात् प्रत्यय इत्यक्षरार्थः। प्रचुरार्थबो
धकात्तदिति प्रथमासमर्थात्स्वार्थे मयडिति यावत्। अधिकरणे इति। प्राचुर्येण प्रस्तुतान्नादिवचनात्प्रथमा
समर्थादधिकरणेऽर्थे प्रत्यय इत्यर्थः। प्रकृते तिलुप्तसप्तम्यंतं तत्र वर्तमानादित्यर्थः। अत्र पदे वचने इत्यत्र
प्रकृत्यर्थो विवक्षितः ते न भवन्मयो ध्यापतिनावनीतियति रिसादौ प्रकृत्यर्थाधिकरणमात्रे मयडुपपन्नः। २१८
तत्रेगार्थद्वयेस्तु ... तात्पर्यं व्याख्यानात्स्वार्थिकप्रकरणपाठस्वाद्य पदोच्चरितार्थः वस्तुतोऽयस्वार्थिकाद्गल
स्याग्रायेणे त्यादिप्रकारवचने जालता ... चव धुनिदेवत्तात्राद ... र्थे यदित्यादौ वाचकतायाएव प्रतीतेरिति
बोध्यं तज्जहणं वाक्यभेदेन प्राचुर्यभावेऽप्यसंतस्वार्थिकमयडर्थं तेन चिन्मयं ब्रह्मेत्यादि सिद्धं। अन्नमयीइति।
क्वचित्प्रकृतिलिंगातिक्रमाद्विशेष्यानिघ्नताय ... वा गूरिति विशेष्यं। सन्नह्व। बहुल विशिष्टेऽर्थे प्राचुर्येऽर्थे च व
र्तमानादित्यर्थः। मोदकिकादावचित्ते तिढक् स्वार्थिकत्वेपि लिंगातिक्रमः कुटीरवत्। भेषजमिति। भियः शुक् रामः
ह्रस्वश्चेति सुलादित्वाद्भिषक् शब्दादिदमर्थे ... एपत एव निपातनादेकारः। देवताता। तदर्थे वस्तुनी स २४२
र्थः। वैध्यकर्मणि सज्यमानद्रव्योद्देश्य ... त्वं ... लं ... चदेवता त्वं। ... दुतान्नाये देवरे अर्थकर्मणा दे वत्तस्मा

च्यां दिशीत्यर्थे स्तात्यंतात् प्रागिति प्रकृतिः सा चाव्ययत्वादस्त्री स्थानिवत्सूत्रे भाष्ये चायं प्रयोगः। जात्यंता च्छ। जात्यंता
दं धुनिवर्त्तमानात् ज्ञात्या अयदव्यलत्वकादित्यर्थः। जातेर्व्यंजकमिति। वक्ष्यत्ते स्मिन्जातिरिति व्युत्पत्तेः। अत्र प्रकरणं
बाधेन वाचकत्वमपि वक्तुं शक्यं। इतिप रे। स्थानांता। सस्थानशब्दस्तुल्यवाची तुल्यरूपार्थे न च स्थानांतमर्थ
वस्त्ववतितदा प्रत्ययः इत्यर्थः। इति शब्दादर्थवादितिलब्धं। अनुगादतीति। अत्रार्थे नुगादिशब्द इत्यर्थः। असानि
तिप्रकर्षे सत्वोदस्व पदविग्रहं दर्शयति। सएव। अनुयाप्यादिवत्सुप्जाता वितिणिनिः। दिसारिणे। अणिनुगाइसतोणइ
त्यनुवर्त्तते इनणीतिभावः। क्रियाजन्मेति। अत एव नद्विः प्रकृतौ द्विःपचतीति न। कृत्वो पंचादिशब्दोस्तत्संख्यास्य
ति परास्तस्येव सुज् द्योतकस्ते यां च क्रियायामन्वयः सूत्रे स्वरसात्। द्विदशाइत्यादौ समास एव द्यादिशब्दानांत
त्र त्वद्योतक इत्युक्त्वा पत्वान्न सुच्। समुदायस्यापरिसमाप्तत्वाच्चभुंक्ते इति वर्त्तमान प्रयोगः। त्रिराकृत्वा दशे
त्यादावावृत्तिक्रियाजन्मगणनेकृत्वसुच्। संख्यायाः किमिति। गणनेकृतिः संख्याशब्दानामेवेति प्रश्नः। भू
रिवारानिति। नायसंख्यावाची लोके गणनायामप्रसिद्धेरिति भावः। वहुशब्दस्तु संख्या संज्ञकत्वात्तत्कार्यं भा
गिलुक्। तदभावे हि क्रियाजन्मगणने गम्ये इत्यर्थः स्यादितिलभ्यं। वारशब्दः कालपरः स च भोजन पर्याप्त इ
ति कालाध्वनोरिति द्वितीया। यद्यपि द्रव्यगुणयोर्गणने नयो न्य जन्माप्रसिद्ध्ये मेके वर्त्ते चामुलत्तिः क्रियाया
स्त्वनेकाया अपि निवृत्तभेदाया धातुवाच्यत्वेन तत्संभवः तथापि क्रियाग्रहणस्य फापेसाध्यस्वभावेवय
त्र क्रिया तत्रैतत्स्यकृत्यर्थं तु न तत् द्विर्वचनेत्वीति द्विराकृतिर्द्विः प्रयोगः द्विर्बद्धं सुबद्धं मित्यादि प्रयोग विरो
धात्। पंचकृत्वः कर्त्ता कटानाद्विकर्त्ते त्यादौ तु एभूतक्रियायोगे कारकविभक्तेरेव साधुत्वमिति कर्म

अपेतापोढे तिसूत्रे ल्यपशइतिसौत्रः प्रयोगः। एतेनास्मात्सौत्रप्रयोगात् मंगलेत्यादिप्रयोगमित्यपास्तं भाष्यानुक्तेः।
अत्राल्पार्थ शब्देनस्तोकादीनामेवग्रहणं न तदर्थकैकशब्दस्य तस्य तेमानाभावात् सत्वेपि तत्रार्थे तस्याप्रसिद्ध
तरत्वेनाल्पार्थ शब्देनन ग्रहणं संख्यैक। संख्यावाचिन एकत्वविशिष्टार्थकात्सुप्प्रातिपदिकात्कारका
सित्यर्थः। एकार्थाएवेति। एकवचनशब्देनात्रतएव गृह्यते इतिभावः। घटंघटमिति। ततः शसि घटंघटमिति
वत् घटौघटौददातीत्यपिबोधसंभवइत्यभिमानः। पदशः स्वरशइतिप्रयोगास्तेभ्योपिच्छाबुकत्वाविशिष्टस्येवबोध
इतिजातिशब्देभ्योपिशस्इतिपरे। एकवचनादितिघटौघटौददातीत्यादिबोधेशसोसाधुत्वायेतिकेचित्। वस्तुत एक
वचनादितिसंख्यातिरिक्तार्थानांपरिग्रहीतैकत्वानामेववीप्सयानुवादकं अतएवमाषोमाषोददातीतिनकिंतु द्वौद्वौद
२४३ दातीत्येवतत्रेतिवोध्यं। अत्राहुः। चकारोवीप्सायामित्यनंतरंद्रष्टव्यः संख्यैकवचनाद्वीप्सायांचवात्स्वार्थे पिसवाभिधा
नस्वाभाव्यादेकशब्दादेवते नैकशब्दाद्वीप्साशसभावे द्विवचनेततोपितस्वार्थिकेशसिपद्वोजातेएकैकशइत्येत
त्सिद्धिः। नचैवमेकशइत्युक्तेसंदेहःस्यात् शास्त्रव्याख्यानतोलोकेप्रकरणादितोनिर्णयात्। न
चास्यशसएकंबहुव्रीहिवदितियद्वादत्वाभावादेकशब्देपरत्वाद्द्विवचनमेवप्राप्तमितिवाच्यं। तत्रापिनित्यवीप्स *वदे*
योरितिवद्वित्वस्यत्वात्। तदनुवादेनबहुव्रीहिवद्भावस्यैवतेनविधानात्। ध्वनितंचेदंसर्वस्य द्वेइतिसूत्रभाष्ये
इतिभाष्यप्रदीपोद्योतेनिरूपितं। यापंचमीविहितेति। प्रतिनिधिप्रतिदानेचेत्स्यैवेत्यर्थः। आद्यादिभ्यइति। अय
मेवसार्वविभक्तिकस्तसिः। चातिव्रतइति। बहुभ्योसीनेष्वन्यातिक्रमेएतौकौएहतइत्यर्थः। फलितमाह। अन्या
नतिक्रम्येति। हीयमानः हीयमानेनपापेनचयुक्तादित्यर्थः। तद्युक्तत्वंसाक्षात्ज्ञानान्वयेनवा। अर्जुनतइ *रामः*
तिपद्वेइतिशेषः। प्रवाहिकाविषूचिका। अभूतेति। गम्यमानेइतिशेषः। तद्भावेति। करणस्तृतीययासमासः। अ *२५२*

स्वार्थे तल्लितितेन देवदेवत्वमितिसिद्धं तद्धूनयन्नाह । पितृदेवत्वमिति । एतेन पितृ बुद्धे बलजात्यभावादिदमयुक्त
मित्यपास्तं । नवस्येत्यादि वार्त्तिके विधीयमानाः प्रत्ययाः स्वार्थिकाः साधारणा इति । अत एव निपातनात्सादेश्य
स्य दीर्घः । सहसमानं धारणमस्येत्यर्थः । अनेकप्रत्ययविशिष्टसंबंधमित्यर्थः । दैवतेति । लिंगातिक्रमात्स्त्रीत्वं । वर्णे च ।
वर्णे किं । लोहितं रुधिरं यावदाश्रयमवस्थानयोग्य त्वाभावाऽनित्यत्वं । लोहितादिति । अस्मादेव ज्ञापकादसंत
स्वार्थिकानां सुवुत्पत्तेः प्रागेवोत्संगीकारेणांतरंगत्वात्स्त्रीलिंग बोधकप्रत्ययस्य बाधनं स्वार्थिके न वा भवती
त्यर्थः । अत एव ज्ञाप्या प्यदस्याप्यत्र प्रकरणे ऽसंबंधः तेनैतादिभ्योऽसंतस्वार्थिके केऽ एतिकेऽस्वनत्वे निकेति । वे
लक्ष्येणेति । लक्षयेत्यर्थः उपायादिति अत्र चेति वक्तव्ये ह्रस्वग्रहणं दीर्घस्यानित्वं । एतेनास्यस्यात्तत्सामर्थ्यात्स्वलो
पाभावइत्यपास्तं । आख्यानात्त्व । वाचो । व्याहृतौ त्वेनोक्तो यौ यस्साऽस्यपर्यन्तदाह । संदिष्टेति । तद्युक्तात् । तच्छब्देन
वाक् । वाचा युक्ताद्वाग्व्याहृतार्थप्रतिपादककर्मशब्दादित्यर्थः । तेन स्वयं वाचा कथनरूपं कंप लम्म क्रियते तत्का
र्मणं तदुक्तं भाष्ये तदित्यनेना किं प्रतिनिर्दिश्यते वागेव यदेव वाचाख्या ह्रियते तदेव कर्मणा क्रियते इति । क दे
अत्र वाग्वेत्सु उत्तरस्येव कारे व्याहृतार्थायामित्यस्यासंबंधो लभ्यते । क्रियायोरुत्सर्ग तएकर्त्रकत्वं च प्रती
यते पश्चाच्चावदति तत्कर्मणा गुरुतइतिम्भूत्यर्था नुवादक त्वाद्व देवत्वादि भाष्यस्य तद्युक्तादिति किं वाचा कथनं
विनैव यत्कर्म क्रियते तत्र मा भूदिति । ए वं च मंत्रविशेषप्रयोगपूर्वं क्रियमाणकर्मविशेषेरूढो यमित्याहुः इदं त्व
याकर्तव्यमिति संदेशवाचकश्लोकत्वात्कर्म क्रियते तत्कार्मणमिति वदतः कैयटस्याशयस्तु चिंत्यः वाचकश्लोकत्वे तिम्द
लं कैयटानुसारेण । द्वैवैरुक्ताद्भुति । तत्रोत्पन्नाइत्यर्थः प्रज्ञाना तीप्रज्ञः निर्मोयमिति वक्तौचेदं स्वर्षं भाष्ये नि
त्यस्यागणनान्नास्यानित्यत्वप्रसंगात्स्वस्मादस्याप्यवादत्वान्न भविष्यतीति परे । मंगलाम गलवचनमिति ।

लस्यैवतत्रारोपणेकार्यत्वस्यसुतरांतत्वंसत्वंतद्धिताइतिबहुवचनेनसंगृहीतः। अभूततद्भावेद्भीभवतीत्यादितुछांदसंकम्र
भूततद्भावसामर्थ्यात्संपद्यत्सनेनकर्तृलाभेकर्तृग्रहणंकिंयत्रसंपद्यकर्तृलाभेवनकारकांतरत्वंतत्रयथास्यादित्यर्थः
तेनादेवगृहेदेवगृहेभवतीत्यत्रन। अदेवगृहंदेवगृहंसंपद्यतेतत्रकृष्टेजातोपिकृष्टोदिदेवगृहेसंपद्यतेतथाभवतीति
तदर्थः। अत्रवृद्धाभवनानिरूपिताधिकरणत्वमपीतिनदोषइत्याकरेस्पष्टं। दोषाभूतमिति। आधिकरणशक्तिप्रधानस्या
पिवृत्तौप्रयुक्तिमत्प्रधानत्वेवोध्यं। गार्गीति। यजंताच्चावापसस्येतिलोपोनाकारेणव्यवधानादितिभावः। च्वौच। अ
कृत्सार्वधातुकयोर्दीर्घइत्यनुवर्त्तते। पदिनेष्यतेइति। अनेनानिष्ठोहउतरमानाभावइतिसूचितं। च्वेश्रेति। अनु
वादेपरेतेनोत्मनीत्यादिसिद्धं। अन्यथाप्रत्ययविधौतदंतविध्यभावान्नस्यात्। अनेनोत्सलोपेयप्यायेयमीत्यादि।
साकल्येइति। अभूततद्भावइत्यपिवोध्यं। कृत्स्नं। सर्वावयवोपेतं। वाक्यमेवेति। नतुच्विरित्यर्थः। तदधीन। अभूत
तद्भावइतिनिवृत्तं। विप्रत्रेति। स्वरादेराकृतिगणत्वात्रातस्याव्ययत्वंएवंडाजस्यापि। देवमनुष्य। सातीतिकृभ्वस्ती
तिचानिवृत्तं। वंदेरमेवेति। देवान्वंदेतेषुरमेवेत्यर्थः। पुरुषशब्दोवहुवाची। वहुत्रेति। जीवतोजंतोर्मनोवहुषुविषयेषु
गच्छतीत्यतिवहून्विषयान्प्राप्नोतीतिवेत्यर्थः। अव्यक्तानु। मंडू भूत्वाकृभ्वस्तीत्यनुवर्त्ततेसंपदेतिनिवृत्तमेव।
नतुततोन्यूनमिति। द्व्यजवरेत्यस्यद्व्यजपदायान्यूनमित्यर्थस्तुनपटपटाकरोतीत्यादावव्याप्तेः। विवादीतेइति।
अन्यथाडाचिद्वित्वंद्वित्वेचाद्धीनेकाच्त्वेडाजित्यन्यान्याश्रयःस्यादितिभावः। वहुलग्रहणंद्वितीयाकरोतीत्या
दौनद्वित्वंडाचश्रवंत्वोहिताद्विडाजमइतिविशेषणार्थंतेननाभाष्यथिमाइत्यादौडेर्डादेशोनिष्पन्नस्यानुकरणे
पटपटायतीत्यादाविवनाभाइतिभवतीत्यर्थेक्यषुवारणायेतिभाष्यरसः। अनेकाच्इति। द्व्यजवराद्धीदित्यपनी
येत्यर्थः। पटितीति। अव्यक्तानुकरणस्येतिपररूपं। कृञोद्वितीय। कृञइतिसमासातात्इत्येतत्सर्वंतमनुवर्त्त

244

भूतपदेन कर्तृविशेषणं तेन तस्य । समासः अभूततत्त्वं च प्रत्यासत्या तद्भावशब्दघटकतच्छब्दार्थकरणकत्वेनैव ग्राह्यं ।
एवं च येन रूपेण प्रागभूतं तेन रूपेण तस्य भावे इति फलितं । एवं च यत्र प्रकृतिस्वरूपमेव विकाररूपतामापद्यमानं वि
वक्ष्यते तत्रायं प्रत्ययः संपद्यत्यादेः सं पद्यकर्तरि वर्तमानादित्यर्थः । अस्मादेव निपातनात्संपदेर्भीवशः दिवादि
त्वाच्छब्दान् संपद्यस्य कर्त्तेति तत्पुरुषः । एवं च संपद्यकर्तृबोधकात् विकारवाचकात्प्रत्ययः तस्य च प्रकृतौ वर्त्त
मानत्वं गौणमुख्यया । अत एवमहंभूत इत्यादौ नात्वसामानाधिकरण्यनिबंधनपुंवत्त्वं च भवति तदाह । विकारात्म
तामित्यादि । चकारो तोदात्तत्वाय इकारो वैरित्यत्र सामान्यग्रहणाविघातार्थः । च्वौ तलादिति ऊर्यादिच्वीति निपा
तत्वेऽप्यत्वमित्यर्थः । ब्रह्मीभवतीति । अत्र भवनकर्तृत्वं प्रकृतिभूतस्य ब्रह्मण एव विकाराभेदेन बोध्यं । कृष्णीक
रोतीत्यादौ कर्मत्वमप्येवं । अत एव संघीभवंति ब्राह्मणास्त्वं भवसि चैत्र इत्यादौ वचनपुरुषव्यवस्था । अन्यत्र तु प्र
कृतिविकृत्योः उभयोः कर्तृत्वं तत्र सा द्राक्षिका रसो वस्तुणं पिंडः । खदिरांगारसदृशो कुंडलो भवत इति यस्यप्रा
स्य भाष्यप्रयोगे विकृतेः कर्तृत्वात् । अलंलं संपद्यत इत्यादौ च्वांतस्य वाक्ये लोके प्रकृतेरपि कर्तृत्वदर्शनाच्चैवं प्रयोगो
युष्मद्युपपदे इति सूत्रभाष्ये स्पष्टः । अनारोपिता तथाभूते आरोपिततद्भावसंपत्तावेव च्विरत एवेश्वरप्रसादेनामहतिमु
ख्यमहत्त्वसत्त्वेन च्विरत एव च मुख्यतार्थसगोभवदित्यादौ गोत्वेन प्रच्छत्वाभावसिद्धा । प्रोतश्च्व्यंतस्य प्रतिषेध इति वा
र्तिकमोक्तं सूत्रे भाष्ये प्रत्याख्यातं कारणीभूतो दंड इत्याद्यसाध्येव । तत्र कारणत्वारोपकत्वे कारणत्वादिबुध्या च्वि
रिति तु न युक्तं । अगोत्वारोपकत्वे गोत्वबुद्ध्या च्वौ गोभवदित्यादौ च्व्यंतप्रतिषेधस्यावश्यकत्वेन तत्प्रत्याख्यानप
रभाष्य विरोधापत्तेः प्रकृतसूत्रभाष्ये विध्वनितमेतत् संज्ञोपसर्जनीभूतानामितिवार्तिके प्रयोगे एकार्थी
भाव इति भाष्यादिप्रयोगे च व्यक्तिवाक्ययोरसंतमेदादुपसर्जनत्वस्यैकार्थत्वस्य चारोपितस्य वस्तुत्वाच्चित तत्पद

द्वे इति द्विवचनबलेनानस्तमिताव्ययवभेदस्समुदायस्यैवाद्ये ग्रासोपस्थितपद समुदायालकस्य विधानात्स्वसेकम
प्यनर्थयोः पदत्वमित्यग्रे ग्रइत्यादौ पूर्वरूपादिसिद्धिः एतेनैकैकमित्यादौ बहुव्रीहिवन्द्वावपि तदवयवयोः सुब्वि
मानाभावात्सुब्लुगनापत्तिपरास्त। अतएव तद्विषयेसंहितायानिलत्वं संहि तैकपदे इत्यस्य समासग्रहणा
दस्वं ऽपदे एव तन्नियताबोधकत्वात्समुदायस्यापिस्या निबन्धावेन पदत्वमिति प्राम्पचसिपचसिदेवदत्ते
त्यादावामएकान्तरतासिद्धिः कस्कादिषुकौतस्कुत पाठे कृताघामिकाद्विबाद्ग्राति पदिकत्वे पि ताद्धितासत्तिज्ञाप
नेनाद्विः प्रयोगपक्षेपिनदोष इत्यन्ये। पदस्येत्यपकर्षे पिद्रपचति द्रपचतीतिसगतिकस्याद्वित्वंसगतिकस्यैवा
245 तिंकेनसिद्धमितिदिक्। नित्यमाभीक्ष्ण्ये आख्यानात्तत्त्व पौनःपुन्यंतदाहाभीक्ष्ण्येइति। ननु याक्रियाकर्त्रीप्राधा
न्येनानुपरमन्करोतितन्नित्यम् पुनः पुनः क्रियायाविच्छेदेनोत्पत्तिराभी क्ष्ण्यमितितयोर्भेदस्यकैयटादिभि
रुक्तत्वेनेदसंगतमितिचेन्न। मानाभावात्। यद्वा आभीक्ष्ण्ये वर्तते तस्येदं ग्रहणमिति प्रकृतसूत्रस्थाविरोधाच्च।
स्वा १० आभीक्ष्ण्यमिति। शब्दशक्तिस्वाभावादितिभावः। हिरुगादीनांक्रियाविशेषणत्वेन क्रियाप्रधानत्वंनतुक्रियावा
चकमतोनद्वित्वमनभिधानाद्वा। परेर्व र्जने। वर्जनद्योतकस्यपरेरित्यर्थः उदाहरणेपञ्चम्यर्थवर्जनस्याप
संबंधस्यपरिद्योतकः पंचम्यपाङ्परिभिरितिपंचमी। परित्रिगर्तं वृष्टो देव इतिसमासेतु नद्वित्वं कर्मप्रवचनी
त ३ यानांस्वयोगविहितविभक्तेर्थसंबंधेपरिच्छेदकत्वया समासे विभक्त्यभावेन तत्वासंभव इति परेर्ने रथक्यात् किंच वाक्य
दृष्टविभक्त्यर्थीत भावेन तत्र समासस्यैव शक्तिकल्पनेन परेस्तद्योतकत्वाभावः। नहि समासस्य यदर्थप्रतिपत्तिर्भवति गाश
त्तिस्तत्रतद्द्योतकापेक्षा। अतएवघनस्यामादाविवाद्यप्रयोगः परिशब्दस्तुसाधुत्वार्थमेवव्रतौ प्रयुज्यतेसमू रामः २५५

द्योर

ते।बीजेनेति।बीजावापेनसहेत्यर्थः कृषधातुः कर्षणे वर्तते इति तत्त्वबोधिन्याम् आपाद्य द्विकरणेपि कृषावितिकिं द्विती
यंकरोतिपटं।संख्यायाश्च गुणान्ताया इति गुणशब्दान्तसंख्यावाचकस्येत्यर्थः।कृषौ किं द्विगुणं करोति रज्जुं।समयाकरोतीति।करोतिर्या
पनायांतदाह।यापयतीत्यर्थ इति।निष्कुला।अंतरवयवानां वहिःकरणं निष्कोषणं तत्र किं निष्कुलान् करोति
शत्रूनिति।आनुकूल्यमाराध्यचित्तानुवर्तनं तत्र किं सुखं करोति सोमयं चित्तपीडनं प्रातिलोम्यं।शूलाकरोतीति।
करोतिः पचत्यर्थे सुसाधुसखं॥ ॥ इतितद्धितप्रक्रियासमाप्ता॥ ॥सर्वस्य द्वे।नचवाक्यादि
द्वित्ववारणायावश्यकेन पदस्येत्यपकर्षेणसिद्धे सर्वस्येति व्यर्थं।एकाज्द्विर्वचनन्यायेन चसर्वावयवद्वित्वसिद्धि
रिति वाच्यं।द्वितीयषष्ठ्युच्चारणेनद्विर्वचनत्वबोधनात्।द्वेइत्यस्यसंख्यापेक्षापोशब्दानुशासन प्रस्तावाद्द्वे
शब्दरूपे प्रसासत्तास्थानिसमानाकारे सर्वस्य पदस्य स्थाने भवत इत्यर्थः।अन्यथा काचोद्वे इत्यादावेवाच्
एकक्रियापेक्षायापदस्येति कर्मषष्ठी स्यात्।तेनपौनःपुन्यंपौनःपुनिक इत्यत्रप्यञ्ठञौ सिद्धौ।तत्र हि पुनःपुन
र्भवितरिवर्तमानात्पुनःपुनःशब्दाद्भावेभवे च प्रत्ययः।अन्यथांतरङ्गत्वात्सुपि लुकृते ताभ्याम्प्रयात्सुपोलुकि वी
प्सारूपेर्थे द्वित्वप्रवृत्तौ यत्वत्वेपि समासग्रहणकतत्त्वमेन स्यात्तन्निर्माणप्रयोगाद्यपिप्रसमुदायविषयकेन प्रातिपदिक
त्वाभावात्त्वेनस्यात्स्थाने द्वित्वेतु स्थानिवद्भावात्प्रातिपदिकत्वं।अप्रत्यय इति निषेधात्प्रत्ययस्था
निनःप्रातिपदिकत्वेऽतिदेशो नादेशेत सुलभं।नन्वेवमपि वीप्सारूपेर्थे तत्प्रकृतिकत्वं तत्वं दुर्लभं।पुनःपुन
रित्यासुलभत्वात्।पक्षातत्त्ववधिभाव इत्यादावर्थे प्रातिपदिकात्प्रत्यय इत्येव वाधः।सच कुत्सिते इतिसूत्रभाष्या
द द्यकालेतिज्ञापकाच्च सतिसंभवेसु दमवहितइत्यन्यत तत्त्वबोधिन्यां तथा चरूपमादेश इत्यर्थे केचिदितिवक्तव्ये

किंच प्रियादिषु प्रतिषिद्धं पुंवत्त्वस्यापि विधानार्थं कर्मधारयवद्भावः। अत एव सूर्वत्सूत्रयोः कर्मधारयवदिति नोक्तं
प्रियादिषु पुंवत्त्वापत्तेः। सर्वस्य द्वे इति तु न स्वरातिदेशो भाष्यप्रामाण्यात्। अत एव तत्र किंप्रयोजनं सुप्लोपपुंवद्भावाविति व
भाष्य उक्तं। अन्यच्च कानि प्रयोजनानि सुप्लोपपुंवत्त्वान्तोदात्तत्वानीत्युक्तं प्रकारशब्दः सादृश्यवाची आख्यानादित्याह।
सादृश्यपद्योल इति। पुंवद्भावश्च इति। पुंवत्कर्मधारयेत्यत्र नेन गुणवचनस्य हाकाङ्क्षसूत्रभाष्यपरिभाषित इति बोध्यं। प्र
कारः सादृश्यप्रतियोगिस्वरूपमुपमानत्वं उपमानं तु भिन्नमिति बोध्य इति परे। आनुपूर्व्ये इति। वार्त्तिकेषु कर्म
धारयवदिति न संबध्यते तदुदाहरणेषु भाष्ये सुप्लोपादर्शनात्। संभ्रम आदरो भयं च। क्रियासमभिहारे चेति।
246 पौनःपुन्यं भृशार्थश्च क्रियासमभिहारः लोट् चैवेदं। अत एव क्रियासमभिहारे लोड् इति सूत्रे क्रियासमभिहारे लो
ड्मध्यमैकवचनस्य द्वे भवत इति पठित्वा तस्य लोटः ज्ञापकत्वमुक्तं। अथ मध्यमस्य लोटोऽवोदाहरणमुपन्यस्तं। अत
एव यङन्तेन द्वित्वं यत्तु लोटः समुच्चयादिष्वपि विधानेन केवलस्य तद्द्योतने सामर्थ्याभावात् क्वचित्त्वं यङस्तु तद द्वे
वा द्वे तिरिक्तार्थाभावाद्यङैव तद्द्योतनसंभवाद्यङन्तेन द्वित्वमिति तन्न। अकजादेरनेकत्र द्योतनेऽर्थे विधानेऽपि केवलस्यैव
प्रकरणादिना तत्तदर्थद्योतकताया दृष्टत्वात् भृशार्थे यङि ततः पौनःपुन्यविवक्षायां तु नित्यवीप्सयोरिति द्वित्वं
भव...त्वे वृ पापच्यते पापच्यते भृशं पाकं पुनः करोतीत्यर्थः। नन्वस्य भृशार्थे द्वित्वफलकत्वे भृशार्थ इत्येवास्तु द्वे
क्रियासमभिहारपदं व्यर्थमत आह। पौनःपुन्येपीति। इदमेव ज्ञापकं पौनःपुन्यस्य केनचिद्द्योतने सौत्रं द्वित्वा
प्रवृत्तेरिति पौनःपुन्ये यङन्तेन सौत्रं द्वित्वमिति भावः। भुक्त्वा भुक्त्वा भोजं भोजमित्यादौ त्वाभीक्ष्ण्ये द्वे वाच्ये रामः
इति भाष्यपठितवचनान्तरेण द्वित्वम्लेलेतत्कादं ते वद्दृश्यते। पुनः पुनः क्रियायां विद्वेदेनोक्तत्वा २४६

लकाबमित्ता दौ कबेरिवतत्‌ उक्तं भाष्ये तत्र पदर्विर्जने वर्त्तते कस्त्तर्हि समास इति । वा क्यादेरा विनापि को पास्त्यभर्त्स
नकुत्सनयोः शिष्यादौ संभवात्तद्ग्रहणं । द्विरुक्त इति । वीप्साविषये इ तिभावः । अस्य सूत्रस्य वीप्सायामेव प्रवृत्तेर्भाष्ये सम
लात्‌ । अत एवैक इत्यादौ न वहुव्रीहिवत्‌ । तथा सति सुपूलुकि दधीत्यादौ विभक्तिरहितस्येवात्रापि ता दृशस्यैव साधुत्वा
पत्तिरनेनैव द्वित्वं विधीयत इति तु न युक्तं श्रासरतद पवाद त्वानापत्तैकश इत्यसिद्धेः । अन्ने ईवो ध्यं अल्पार्थे क
शब्द सत्वे पि तदर्थे वीप्सायां द्वित्वापवादः शसेव संख्याशब्दातिरिक्त शब्दस्यार्थानां परिगृह्णीते कत्वानामेव वीप्सासत्वे
न तस्या सत्वेन तस्याप्येकवचनत्वात्‌ किंचाल्पत्वमपि परिमाण विशेष इत्यत्व इति स्फुटं भाष्य कैयटयोः तत्रापि
स्थास्य द्यर्थानामिवास्यापि परिगृह्णीते कत्वसैव वीप्सा एकैकश इति भाष्य प्रयोगस्योपपत्तिरुक्तेसन्यत्र विस्तरः ।
तेनेति । अत्र सुप्लोपशब्देन तन्निमित्तं प्रातिपदिकत्वं लक्ष्यते । अन्यथा सुब्लुक्‌ सत्तेरपि वक्तुं व्यस्यात्‌ । भाष्येप्येवमेव
गोस्त्रियोरिति ह्रस्वस्तु नातिदिश्यते तस्योपसर्जनार्थ निमित्तत्वात्‌ । वहुव्रीहिवद्भावादेवेति । मध्यमणिन्या
येनोभयान्वयि समुदाये जातस्य प्रातिपदिकत्वस्यैकदेशविकृतन्यायेनहुत्वेपि सत्वकार्यकालपक्षे तु तेनैव
पुनः प्रातिपदिकत्वं । सुविति । न चात्र द्वयोः सुपोर्लुकि तदर्थं पुनः प्रातिपदिकार्यं तिर्भावेण द्वितीयाद्युत्पत्तिः वा
शिविशिष्टस्य कर्मत्वादिवोधार्थं तदुत्पत्तेः सुलभत्वात्‌ । एकैकस्मै इति । द्वयोरपि सुपोर्लुकि पुनः सर्वादिपठितैकश
ब्दांतत्वेन सर्वनामत्वात्स्मै भावः । इह पुंवदिति । वहुव्रीहिवत्त्वातिदेशेनोत्तरपदत्वस्य कार्ये निमिन्नार्थत्वाभा
वेनन्च सामा नाधिकरण्यस्य च सत्वात्स्त्रिया पुंवद्वदिपनेनेति भावः । अंतोदात्तत्वानीति । अनुदात्तत्वेस
स्याधिकारत्वेपि भाष्यप्रामाण्यान्नेहोपस्थितिः । अत एव वहुव्रीहिवद्भावे प्रकृते पि कर्मधारयवद्भावः

धु २
वै ४

रमित्रञ्चेति। उत्तरादिसूत्रे सर्वादीनि सूत्रस्थभाष्यरीत्या विहितविशेषणानन्दाद्यन्ये। सोर्लुकृचेति। स्वादेशविधा
नंत्वन्योन्यमित्याद्यावसमासे चरितार्थमिति प्रकृतवार्त्तिकेति। स्त्रीनपुंसकयोरितिवार्त्ति केन्योन्यमिमे ब्राह्म गो३
णाविइतरेतरमिमे कुले इत्यादि तत्रोदाहृतं। क्रियामितीति। अन्योन्यसहाया इति सर्वस्यद्वे इति सूत्रस्थभाष्यप्रयोगो
पिबोध्यः। अन्यान्यप्रादुर्भावादिति अपादाने इति सूत्रस्थभाष्यप्रयोगे कर्मव्यतीहाराभावः स्पष्ट एव। अक्र
हृ इति। तत्र वर्त्तमानयोस्तदर्थ कयोरित्यर्थः। पुनस्तदेवेति। अनुवादकविभक्तेर्न्याय्यत्वादिति भावः। यस्यदाने
लेशसंभावना तत्रैव तदभावप्रतिपादनस्य फलमित्याशयेनाह। प्रतिप्रियमिति। पद्मञ्चेति। स्वशब्दस्योभयार्थ
कत्वात्। ज्ञातिधनवाची तु न गृह्यते न भिधानात्। द्वे इति वीप्सायां यथाशब्दस्यावृत्ते द्विर्वा प्राप्त्यात्तदपि निपा
त्यते इति भावः। लीवलंचेति। तेन ह्रस्वासिद्धिः। न्वेन कृत द्वित्वस्याव्ययत्वाभावसंग्रहः। ज्ञातेत्यस्य त्वन्तत्वात्
क्ली नत्वं चियथाप्यस्य ज्ञाते त्येव। यथास्वभावमिति। यथास्वरूपमित्यर्थः। ज्ञाताः सर्वे पदार्थाः। यथायथं
यथास्वभावं सर्वे पदार्था ज्ञाता इत्यर्थ इति संमतं। पूर्वपदस्याम्भाव इति। द्वौ द्वाविति द्वित्वे कर्मधारयवद्भा
वे लुकि पूर्वपदावयव स्यैकारस्यामादेश इत्यर्थः। अत्वमिति। संज्ञात्वादप्राप्तिः। नपुंसकत्वंचेति। न्वे
नकृतद्वित्वान्नियत द्विवचनोत्सत्व भावस्य संग्रहः। कर्मधारयवद्भावादतो दात्तत्वं। वाच्यमिति। द्वंद्व
तोस्पष्टं। अभिव्यक्तिरप्येवमित्यन्ये। आचतुरमिति। आङभिविधौ आङमर्यादेत्यव्ययीभावः शरत्प्रभृति
त्वाट्टच्। चतुर्थंतिमितिफलितोर्थः। मिथुनीयंतीत्यनेनान्वयः। मिथुनशब्देन तत्कर्म मैथुनं तदि
च्छतीत्यर्थे क्यच्। मिथुनं गच्छतीति। मिथुनस्य प्राप्नोतीत्यर्थः। फलितार्थकथनमिदं। मिथुनायां

247

भीत्यंपतदेवचनिसलंभुत्काभुक्तेसादौविद्धेदिकाक्रियाचोपात्ताव्रजनादिरूपैवगम्यतेनुपस्थितकल्लेनेमा
नाभावात्।एवंचत्वोद्यतद्वित्वेनैवव्रजनाद्याभीक्ष्ण्यस्यद्योतितत्वान्नत्वोद्यतसमभिहारेतिङ्।तस्यद्वित्वंजी
वत्सेवायमित्यर्थकेजीयतीत्यादौकमलानिकमलानीतिवद्देकजीवतिपददीर्घोविधिर्न्नलद्दोकमितिनतत्र
शास्त्रीयंद्वित्वं।कर्मव्यतिहारः।क्रियाविनिमयःनिसमेवेदंद्वित्वं।वाहुलकन्तुसमासवद्भावस्यैवतदाह।वहुल
ग्रहणादिति।अतएवान्यशब्दस्यसमासवद्भावरहितमेवेतरशब्दस्यतत्सहितमेवोदाहरणंभाष्ये।परस्परशब्दे
परस्परान्वेतिवार्त्तिकप्रयोगात्समासवद्भावाभावः।अन्यपरेतरव्यतिरिक्तौपुनर्नास्यप्रवृत्तिर्वाहुलकादेव।अन्येषां
कर्मव्यतिहारावोधकत्वाच्च।अन्योन्यादौकर्मव्यतिहारःस्फुटएव।अन्योन्यस्मैइति।अन्यस्मैइत्यस्यद्वित्वे
पूर्वपदस्थसुपःसौक्तपासिद्धिः।इतरेतरामित्यादौतुएकैकस्मैइत्यत्रोक्तरीत्यासर्वनामत्वंवार्त्तिकेसुकर्मधारयवत्स
वं॰ ८ दासंवंधवोधनायसमासवदित्युक्तिःसुप्लुग्विधिनैवसिद्धेःसमासवदित्युक्तिराम्रेडितानुदात्तवाधेनांतोदात्ता
र्था।कस्कादित्वादिति।कुप्वोःकपौचेतिवाधित्वेतिभावः।सिद्धांतिमतमाहान्येत्विति।तदुक्तंकय्यटेनचोदाहरणमा
दरणीयमितितदतिरिक्तोदाहरणाभावइत्येवंपरतयानादरणीयमित्यर्थः।दलद्यपेइति।समासवद्भावेतदभा
वेच।इतरेतरामित्यादौपूर्वखण्डस्यसर्वनामत्वमितिपुंवत्त्वेनयद्यपिसिद्धंतथाप्युत्तरखण्डेटावभावार्थंवाहुलक
मावश्यकं।क्लीबेचेति।अन्योन्यमित्यत्रपूर्वपदेप्राप्ताड्डिरहइत्यर्थः।उत्तरखण्डेतुअसमासदपामाणं न्यत
मरीत्यापितदभावः।समासेसोरिति।कर्तरि।हित्वस्यादनेवनसमासेपूर्वखण्डस्यसेत्यर्थः।इदमुपलक्ष
णंपरस्परमित्यत्रपूर्वपदेनपुंसकसोरमभावस्यपरमाइत्यादावपिवस्याभावे।पिसर्वनामत्वस्यच।इतरेत

ल॰श॰शे॰ तइति कथं तोपपाठः उपमानाद्यभिभावात् द्वंद्वपदयोस्तामर्यादातु एताव देवपशूनामायुरिति। एवंरूपाः स्वसा
पू॰ हितेन च चतुरोभिआप्येत्यर्थः। पुत्रपौत्रपुत्रेणापि चतुरोभिआप्येत्यर्थ इति फलितस्वरसः। अन्यसहचरितत्वेन लोक
२५८ विज्ञानमत्राभिप्रायः। असंतसहचरिते लोकविज्ञाने द्वंद्वमित्युपसंख्यानमिति वार्त्तिकात् तदाह। साहचर्ये
णेति। तेनेह न द्वौ युधिष्ठिरार्जुनौ। द्वंद्वं न पंचीसत्रवीक्षायां द्वित्वमन्यत्र स्वार्थे। अन्यत्रापीति। द्वंद्वं युद्धान्य
वर्त्तते तियथाऽत्र द्वयोर्द्वयो रित्थं पाद्वीप्सायां द्वित्वं। शीतोष्णसुखदुःखक्षुत्पिपासा द्वंद्वानि सहतो इसत्रस्वार्थे द्वि
त्वमेकशेषाद्बहुवचनं यथा चार्थे द्वंद्व इतिस्वार्थे द्वित्वं पुंस्त्वं लोकात्। असंयोगविभागो भाष्ये न दृश्यते द्वंद्वं युद्धे
तीसत्रमर्यादावचनेन सिद्धं। एषा हि युद्धमर्यादा शीतोष्णादिष्वभिव्यक्त्या सहचरितत्वं शब्दप्रयोगबोध्यं। चार्थे द्वंद्व
इतितु संज्ञाशब्दोऽनुसन्नः। अवयवार्थाभावादितितदाशयः। विस्तरस्तु बृहच्छब्देन्दुशेखरे द्रष्टव्यः। शब्देन्दु
शेखरे स्वल्पे पूर्वमर्द्धमपूपुरं। प्रीयतां तेन भगवान् शिवया सहितः शिवः। १। भूषितः फणिभाष्योक्त्या लघुः
शब्देन्दुशेखरः। सतां हृत्कमले भास्तां पादवत्फणिफणा धृता। २। इति श्रीशिवभट्टसुतसतीगर्भजनागो
जिभट्टकृते लघुशब्देन्दुशेखरे पूर्वार्द्धं समाप्तम्। उमामहेश्वराभ्यां नमः। गौरीशंकराभ्यां नमः। राधाकृष्णा
भ्यां नमः। श्री। संवत् १८७६।

248

रामः
२५८